छिन्नक्रियायां अनुलग्नाखे कीलं उद्धृते मोक्षः ।

Colophon :—

इति वीरभद्रतन्त्रं समाप्तं ।

Post Colophon :—

संवत् १८६२ माघमास कृष्णपक्षे अमातिथौ इदम् पुस्तकं दुलभराम मिश्रं नागरजः रामकृष्णस्य आत्मजस्य ।

5844.

9372. *Vīrabhadratantram.*

Substance, country-made paper. 9 × 4 inches. Folia, 6. Lines, 12 on a page. Extent in slokas, 180. Character, Nāgara. Date, Samvat 1891. Appearance, tolerable. Complete.

The work explains in Hindi the application of a number of mantras intended for use in sorcery. The MS contains three Paṭalas.

Post Colophon Statement :—

संवत् १८९१ पौष सुदि १ ।

5845.

3476. कुलोड्डीशमहातन्त्रम् । *Kuloḍḍīśamahātantram.*

Substance, country-made paper. 16 × 4½ inches. Folia, 1-21, of which fol. 6 is missing. Lines, 9-13 on a page. Extent in slokas, 925. Character, Bengali. Appearance, good. Complete in four Paṭalas.

For a description of the work see L. IX. 2961.

The object of the work is indicated thus (Fol. 1A):—

देव्युवाच ।

... ...

... ...

... ...

श्रुतानि सर्व्वशास्त्राणि त्वत्प्रसादान्महेश्वर ।

शेषोऽस्ति केवलं यो हि श्रीमहामोक्षदो परा ॥

उद्दिष्टा मनसा नाथ कथ्यतां भक्तवत्सल ।

... ...

ईश्वर उवाच ।

आदौ तु श्रूयतां देवि या या विद्या समीरिता ।
तदा तु कथयिष्यामि श्रीमच्छ्रीषोडशीं ध्रुवम् ॥

देव्युवाच ।

दुर्लभा पञ्चमी विद्या पञ्चकूटात्मिका शुभा ।
नित्या च मुक्तिदा शुद्धा सुखदुःखविनाशिनी ॥
तां विद्यां वद देवेश यदि तुष्टोऽसि मे प्रभो ।

ईश्वर उवाच ।

... ...
... ...

आदौ कामेश्वरी ज्ञेया तथा वज्रेश्वरी शुभा ।
तृतीया भगमाला च तुर्य्या त्रिपुरसुन्दरी ॥
नित्या च पञ्चमी शक्तिः परब्रह्मस्वरूपिणी ।
नित्यचैतन्यरूपा च परमाह्लादकारिणी ।

The Last Colophon :—

इति कुलोड्डीशे महातन्त्रे ब्रह्मज्ञानप्रस्तावः समाप्तः ।

5846.

10418. रावण उड्डीश । *Rāvaṇa-uḍḍīśa.*

Substance, foolscap paper. 6½ × 4½ inches. Folia, 48. Lines, 7 on a page. Extent in ślokas, 336. Character, modern Nāgara. Date, Saṃvat 1922. Appearance, discoloured. Complete.

The work is called रावण उड्डीश in the first line as well as in the last colophon of this MS. In the remaining two colophons, e.g. of chapters I and II (Foll. 12B and 15B), it is called वीरभद्रमहातन्त्र.

Post Colophon :—

श्रीतो फाल्गुने कृष्णे पक्षे षष्ठी शौमवासरे संवत् १९२२ रामलाल ठाकुरप्रसाद कुमरी वाकिम मध्ये श्रीरामचन्द्रलिखा ॥

5847.

8475. रावणोड्डीशडामरतन्त्रसारः ।

Rāvaṇoḍḍīśaḍāmaratantrasāraḥ.

Substance, country-made paper. 10⅞ × 4¼ inches. Folia, 37. Lines, 7 on a page. Extent in ślokas, 480. Character, modern Nāgara. Appearance, fresh. Complete.

It will be noticed that Meghanāda, presumably a name of Bhairava, is found here, at least once, in the extract quoted below, answering the question of Pārvatī. It may be due to a confusion with this name that Indrajit, son of Rāvaṇa who is also called Meghanāda, is associated as its author with a work called *Kriyoḍḍīśa* (Kalyan, 1924). The association of this work with the name of Rāvaṇa might have also given rise to a similar association with the name of Indrajit.

Beginning :—

ॐ श्रीगणेशाय नमः ॥

उड्डीशे च समाकीर्णे योगिवृन्दसमाकुले ।
प्रणम्य शिरसा गौरी परिपृच्छति शङ्करम् ॥ १ ॥
शिवेशेन तु तत्सर्वं कथयस्व प्रभो मम ।
यन्त्रेपि विविधैः कार्य्यं मन्त्राश्च ब्रूहि भैरव ॥ २ ॥
ईश्वर श्रोतुमिच्छामि लोकनाथ जगत्प्रभो ।
प्रसादं कुरु देवेश ब्रूहि कर्म्मार्थसाधनम् ॥ ३ ॥
हर शङ्कर महादेव सर्व्वसिद्धिप्रदायक ।
इच्छामि त्वां जगन्नाथ संसारस्थितिकारकं ॥ ४ ॥
इच्छामि देवदेवेश लोकानां हितकाम्यया ।
वशीकरणमुच्चाटं मोहनं स्तम्भनं तथा ॥ ५ ॥
शान्तिकं पौष्टिकं कर्म्म विधानेन महेश्वरि ।
यक्षिणीभिर्मोहिनीभिः भूतिनीभिस्तथैव च ॥ ६ ॥

ज्ञानहानिः क्रियाहानिः कीलकं च तथापरं ।
कार्य्यस्तम्भः सुरेशानि शोषणं पोषणं तथा ॥ ७ ॥
षडङ्गन्यासि विशेषेण तत्परं ब्रूहि मे प्रभो ।
अन्यांश्च विविधान् कार्य्यान् सात्त्विकान् ब्रूहि रावणे(?) ॥ ८ ॥
सा गत्वार्थजदोषाश्च भूतैश्चैव सदुर्ग्रहै[ः] ।
ज्वरैश्चैव महारौद्रैर्ल्लूता च महाद्रुमैः ॥ ९ ॥
मानवा दुर्ज्जने दुष्टे परार्थतत्त्व-तत्परैः ।
पतत् व्याघ्र (?) जगत् सर्व्वं नानाव्याधिसमाकुलं ॥ १० ॥
उदयं च कथं भद्रां साधकानां सुखाय च ।
दुर्ज्जनानां च दुष्टानां पापिष्ठानां तथैव च ॥ ११ ॥
अशुभान् कथयं योगान् नानाव्याधिकरानपि ॥ १२ ॥

मेघनाद उवाच ।

शृणु देवि वरारोहे सिद्ध्यर्थं यदि वाञ्छसि ।
तद्वदिष्यामि देवेशि तत्सर्व्वं समुदाहृतम् ॥ १३ ॥
देवि प्रयोगि तत्सर्व्वं भवत्येव न संशयः ।
उड्डीशयोग ते देवि मयोक्ता भक्तितस्तव ॥ १४ ॥

पार्व्वत्युवाच ।

उड्डीशं च नमस्कृत्य वक्ष्यशुभयं तथा ।
कपर्द्दिनं विरूपाक्षं सर्व्वदुःखभयापहम् ॥ १५ ॥
ब्रूहि सद्यो भयोद्वेगान् राजशत्रुर्विनिर्ज्जनात् ।
येन प्रयोजितैः सद्यः प्राणान् हन्ति न संशयः ॥ १६ ॥

भैरव उवाच ।

प्रथमं भूपाकर्षणं द्वितीयोन्मादनं तथा ।
तृतीयं विद्वेषणं चैव उच्चाटनं चतुर्थकम् ॥ १७ ॥
अन्यानपि प्रयोगानि वक्ष्ये शृणु वरानने ।
शिवेन कथिता योगा उड्डीशे प्राणनिश्चये ॥ १८ ॥

ग्रामोच्चाटन पद्य षष्ठं जलस्तम्भनं भ्रमणम् ।
+ + चाग्निस्तम्भनं वशीकरणमुत्तमं ॥ १९ ॥
अन्धीकरणं मूककरणं गात्र सङ्कोचनं तथा ।
खञ्जीकरणं भूतज्वरकरणं शास्त्र शास्त्रदूषणं ॥ २० ॥
आतीयं विनाशं दधि-मधुनाशं सुखकरणं
वाजिवाजिप्रकोपनं आवेशनं भुजङ्गानां तथैव च वरानने ॥ २१ ॥
सर्पाणि नाशनं पर्णविनाशनं तथा ।
गर्द्दभकरणं परपुरप्रवेशनं ।
वेतालसिद्धि अजमूलकं च
अन्यानपि तथा रौद्रान् विनाशास्त्रप्रयोगकं च ।
औषधान् विभाकरान् गुह्यगुह्यतरा कार्य्यान् ।
सिद्धयाथ प्रयत्नतः ॥ २२ ॥
अभक्तीने यथा चौरे भक्तिहीने सुरेश्वरि ।
निन्दकाय न दातव्या नास्ति कार्य्यान् सिद्धयाथ प्रयत्नतः ॥ २३ ॥

It ends with a direction in Hindi.

End :—

पालाशबीज मैदाकरि मदारके दूधमे पुट देय १०१ फेर दूधसों गोली बांधि + + + जहा विच्छूमारै तहां मदारकै दूधसौ पिसिक लगावै तौ विच्छू उतरि जाय ।

Colophons of the different chapters :—

8B, इति श्रीरावणभाषातन्त्रे उड्डीशे महातन्त्रे प्रथमः पटलः; 10B, इति श्रीरावणतन्त्रे उड्डीशे मन्त्रकोशो द्वितीयः पटलः; 14A, इति श्रीरावण उड्डीशे महातन्त्रकोशे तृतीयः पटलः; 22A, इति श्रीरावणतन्त्रे उड्डीशकोशे चतुर्थः पटलः; 29B, इति गोरोचनकल्पसमाप्तं; 30B, इति उलूकशास्त्रौषध समाप्तं. 31B, इति विधिसिद्धिर्भवति समाप्तं; 33B, इति श्वेतार्ककल्पं समाप्तं ।

37, इति श्रीतन्त्रराजमन्त्रे सारोद्धारे रावण-उड्डीश-डामर-तन्त्रसारे शिवपार्वतीसंवादे शङ्करप्रसादात् सत्यं सत्यं सत्यमिति सम्पूर्णम् ॥

5848.

5621B. उड्डामरतन्त्रम् । *Uḍḍāmaratantram.*

Substance, palm-leaf. 14 × 1¼ inches. Folia, 27–54. Lines, 4, 5 on a page. Extent in ślokas, 550. Character, Uḍiya. Appearance, good. Complete.

The *Uḍḍāmareśvaratantra*, included in *Vividhatantra-saṃgraha* of Rasik Mohan Chatterji, refers to itself, in the last colophon, as an extract from the *Rudrayāmala* (*Rudrayāmaloddhṛta*). The last chapter is styled *Uḍḍiśa* in this colophon.

Colophons :—

32B, इति उड्डामरमहातन्त्रे प्रथम पटलः; 35B, इति उड्डामरेश्वरे महाकोषे द्वितीयः पटलः; 36A, इति उड्डामरेश्वरे महातन्त्रे अङ्गमाधिकारस्तृतीयः पटलः; 36B, °चतुर्थः पटलः; 37A, °भूतवाद्ये पञ्चमः पटलः; 38A, इति उड्डीशे मन्त्रवारे षष्ठः पटलः; 39A, इति श्रीउड्डामरेश्वरे महातन्त्रे पुत्रवशाधिकारः सप्तमः पटलः; 39B, °अष्टमः पटलः; 41A, नवमः पटलः; 42B, °लम्पटो नाम दशमः पटलः; 44A, °एकादश पटलः; 46A, °द्वादशः पटलः; 48B, °भूतभैरवी नाम त्रयोदशः पटलः; 52A, इति श्रीवीर-भद्रमहातन्त्रे मन्त्रकोषो नाम चतुर्दशः पटलः; 54B, इति श्रीउड्डामरेश्वरे महातन्त्रे मन्त्रकोषो नाम पञ्चदशः पटलः ।

5849.

804. भूतडामरतन्त्रम् । *Bhūtaḍāmaratantram.*

Substance, country-made paper. 17¼ × 2¾ inches. Folia, 28. Lines, 5, 6 on a page. Extent in ślokas, 532. Character, Bengali. Appearance, old. Complete in 15 Paṭalas.

The present manuscript is described in L. IV. 1598. Another MS has been described in IO. IV. 2551 (I). Three editions of the work in 16 Paṭalas, as edited by Rasik Mohan Chatterji, were published (Calcutta, 1879, 1891, 1931).

The work is in the form of an interlocution between Unmatta-Bhairava and Unmatta-Bhairavī. The cult of Bhūtaḍāmara has been dealt with by Dr. B. Bhattacharya in *Man in India* (Vol. XI, pp. 83ff.).

5850.

2801. *Bhūtaḍāmaratantram.*

Substance, country-made paper. 16½ x 3½ inches. Folia, 33. Lines, 7 on a page. Extent in ślokas, 980. Character, Bengali. Appearance, discoloured. Incomplete.

The present MS contains the first 15 Paṭalas and the beginning of the 16th.

The 16th Paṭala begins thus :—

30B, अथातः संप्रवक्ष्यामि योगिनीसाधनोत्तमम् ।
सर्व्वेषां सर्व्वकामार्थं देहिनां सर्व्वसिद्धिदम् ।

It will be noticed that the first verse of the 16th chapter, as found in Chatterji's edition of the work, is absent here and in 5856 *infra*.

5851.

4025. *Bhūtaḍāmaratantram.*

Substance, country-made paper. 15 x 4½ inches. Folia, 20. Lines, 11 on a page. Extent in ślokas, 560. Character, Bengali. Date, Śaka 1644. Appearance, old and discoloured. Complete in 15 chapters.

Post Colophon :—

20A, श्रीमद्गुरुचरणे मम भक्तिरस्तु ।

यद्यभावादस्मत्कारे श्रीभाखाख्या-परगणाधिकारिणः श्रीनरेन्द्र-रायस्य ताड़गायामे भाद्रस्य त्रयोविंशतिदिवसे बुधवासरे त्रयोदश्यां तिथौ समाप्तोऽयं ग्रन्थः । शुभमस्तु ॥ शकाब्दाः १६४४ । श्रीश्रीकृष्णदेवशर्म्मणो वटोरिदं ग्रन्थ धर्म्मार्थं मोक्षार्थञ्च । श्रीभवान्यै नमः ॥

5852.

4651. *Bhūtaḍāmaratantram.*

Substance, country-made paper. 19 × 4½ inches. Folia, 25. Lines, 7 on a page. Extent in ślokas, 700. Character, Bengali. Appearance, old. Complete.

The chapters are not numbered in the present MS. What is apparently the 15th chapter is followed by the *mantrakoṣa* according to the ***Bhūtaḍāmara*** and the *Yakṣa-ḍāmara* (Foll. 22A–25B). The last colophon has striking agreement with that of 5857 ***infra*** except for the name of the work.

5853.

5861. *Bhūtaḍāmaratantram.*

Substance, country-made paper. 9¾ × 4¼ inches. Folia, 41. Lines, 8, 10 on a page. Extent in ślokas, 760. Character, Nāgarī. Date, Saṃvat 1780 and Śaka 1645. Appearance, fresh. Incomplete.

The present MS is incomplete in the beginning. The leaf marked 1 is not the beginning of Bhūtaḍāmara, but that of Jyotiṣmatīkalpa which runs :—

अथ ज्योतिष्मतीकल्प[ः] लिख्यते ।

श्रीभैरव उवाच ।

अत्यन्तमद्भुतप्रख्यं लोकविस्मयकारकम् ।

ज्योतिष्मतीति विख्यातं रसायनमनुत्तमम् ॥

After the end of the 15th Paṭala of the *Bhūtaḍāmara* the MS gives (Fol. 40A-B), like IO. IV. 2551 (I), a few verses which are found as the beginning of Bhūtabhairavatantra (*infra*).

The date of the copying of the manuscript is given (Fol. 40B-41A):—

शुभमस्तु संवत् ++++ १७८० शाके १६४५ वर्षे आश्विनि मासे कृष्णपक्षे दशमी बृहस्पतिवासरे पुष्यनक्षत्रे सिद्धिना योगे काशीखण्डे आनन्दकानन-अविमुक्तक्षेत्रे कर्णघण्टेश्वरनिकटे श्रीव्रजमानवनसुखे श्रीवटुकभैरवसन्निधौ मणिकर्णिका-तारकेश्वर-ललिता-देवी-सिद्धिपीठे लिखितं मङ्गलायनी ।

यदि शुद्धमशुद्धं वा ... ...

इति श्रीचूडामणितन्त्रे भूतडामरयन्त्रं संपूर्णं । शुभं मङ्गलं ददातु ।

5854.

8434. *Bhūtaḍāmaratantram.*

Substance, country-made paper. 8¾ x 5 inches. Folia, 51. Lines, 10 on a page. Extent in ślokas, 900. Character, Nāgara. Appearance, fresh. Complete.

The 15th Paṭala comes to an end on Fol. 41B and then begins the *Bhūtabhairavatantra* (*infra*) which runs up to the end of the MS. This latter work is also complete in this MS but for the last verse.

5855.

10652. *Bhūtaḍāmaratantram.*

Substance, country-made paper. 11 x 4 inches. Folia, 5. Lines, 12 on a page. Extent in ślokas, 140. Character, Bengali. Appearance, fresh. Incomplete.

The present MS contains chapters I–III and four lines of chapter IV.

5856.

2819. भूतडामरे योगिनीसाधनम् । *Yoginīsādhanam from Bhūtaḍāmara.*

Substance, country-made paper. 16 × 5½ inches. Folium, 1. Lines, 13 in all. Extent in ślokas, 22. Character, Bengali. Appearance, fresh. Complete.

This constitutes the 16th chapter of the Bhūtaḍāmara.

Beginning :—

श्रीदुर्गायै नमः ।

योगिनीसाधनम् । भूतडामरे ।

अथ तं संप्रवक्ष्यामि योगिनीसाधनोत्तमम् ।
सर्व्वार्थसाधनं नाम देहिनां सर्व्वसिद्धिदम् ।

Colophon :—

इति डामरोक्त-योगिनीसाधनम् ।

5857.

4584. भूतभैरवतन्त्रम् । *Bhūtabhairavatantram.*

Substance, country-made paper. 17½ × 4 inches. Folia, 6. Lines, on a page. Extent in ślokas, 300. Character, Bengali. Appearance, n good. Complete.

Beginning :—

वह्निं वसन्तमीडे योगमुखं दुर्निरीक्ष्यमविरीक्ष्या ।
विबुधा हि यस्य +++ भूतान्तकमीश्वरमनादिम् ।
मन्त्राद्यैरविशेषणार्थं चार्चितं हरेर्वैनात् ।
श्रीभैरवप्रोक्तं तन्त्रं भूतभैरवं नाम ।
... ...
... ...
यन्त्रो यन्त्रे मनुजोऽयं सर्व्वार्थि [illegible] ।
[illegible] भैरवविचारं तन्त्र योगादिसिद्धयत्नम् ।

It should be noted that the beginning of this work is also found at the end of No. 5853 above. An incomplete MS of the work is appended to another MS of *Bhūtaḍāmara* (5854 above). The work gives, *inter alia,* the meanings of words used to indicate mantras. A short notice of the work is given in IO. IV. 2551 (II).

End :—

यो भूत-यक्ष-डामरतन्त्रं श्रीभूतेशिवं वेद ।

स स्वर्गं मोक्षभागी स्थिर + + ज्ञानं समपदः ।

Colophon :—

इति परमहंस-परिव्राज-परमब्रह्मावतारगुरुचरणाश्रय-श्रीमत्-

क्रोधीशभैरवविरचितं भूतभैरवनाम महातन्त्रं समाप्तम् ।

This colophon **is in striking agreement** with that of a different work **described under 5852 above.**

5858.

8433. मातङ्गीडामरम् । *Mātaṅgīḍāmaram.*

Substance, country-made paper. 7¾ × 5 inches. Folia, 15. Lines, 10 on a page. Extent in ślokas, 300. Character, modern Nāgarī. Date, Saṃvat 1961. Appearance, fresh. Complete.

The Tantra is written mostly in Hindi and deals with a number of magical rites.

Beginning —

अथ मातङ्गीडामर लिख्यते ।

देव्युवाच ।

कैलासशिखरं देवं गृह्णात् प्रभोः ।

ईश्वरोवाच ।

किं पृच्छसि त्वया देवि गुह्यवार्त्ता महेश्वरि ।

त्वदग्रे कथयिष्यामि सत्यं सत्यं वरानने ।

देव्युवाच ।

देवाधिदेव देवे[श] यथा उदत्तमम ।
एवं [पृ]च्छामि मया नाथ मातङ्गीक्रमसाधनं ॥
केन प्रकारेण सिध्यंति प्रयोगाणि युगानि च ।
ईश्वर देवि वरारोहे पूर्व्वमातङ्ग ऋषिर्भवेत् ॥
तस्यांके कुले जाता मातङ्गीश्व[री] विश्रुता ।
चांडालि प्रेषिता भद्रा मांगानी वशुलाभृषि ।
एते चतुर्महागोप्यं भेदगुह्यंश्च पार्वती ॥
एतत्क्रिया समाः श्रेष्ठजेकारेदिमुंडभेदतः
सर्वार्थसिद्धमाप्नोति नान्यथा शंकरोब्रवीत् ॥
उच्चाटनं मारणं च मोहनं वश्यकर्म्मणि ।
आकर्षणं विद्वेषणंश्चैव प्रयोगे षटमेव च ॥
मोहनं द्रावणंश्चैव राजकर्म्माणि चेटकं ।
पश्चादि रसायनं सिध्य नाथ कार्य्यं मया युतं ॥
ब्रह्मयामले दशविद्या सिद्धिमाप्नोति ।
सर्वोपरि महाश्रेष्ठ मातङ्गिकामगानि च ॥

End :—

नरनाथमुंड १ आगनाथमुख २ मातङ्गनाथ ३ ब्रह्मनाथ ४ कांकली-
पुत्र-बालनाथ ५ पञ्चभद्र ।

Colophon :—

14B, इति श्रीमातङ्गीडामरे हरगौरीसंवादे संपूर्ण ।

Post Colophon :—

संवत् १६४० मीति जेष्ठ कृष्ण २ वार पैके रोज लिखा
वालगोविंदा ।

After this post-colophon occur two small sections in **Hindi** on two peculiar rites followed by the date of copying

of the MS, the previous date apparently being the date of the original from which the copy was made. This portion runs thus:—

अथ मालकांगुणीकल्प लिख्यते मालकांगुणी सेर २ तिलका तेल सेर २।

इति श्रीमालकांगुणीकल्प संपूर्णः। अथ हाथमे पारा चटावन विधि ... ...

इति श्रीहाथमो पारा चटावनका विधि संपूर्णः—

Post Colophon :—

साल सं १९६१ मार्गशीर्ष शुक्ल १४ बुधवासरे मालवीय पंडित रघुनाथ रामेण लिखवाइतं लिखितं हनुमान द्विवेदी काश्याम् गोघट्टतटे।

5859.

8412. गौरीडामरम्। *Gaurīḍāmaram.*

Substance, European foolscap paper. 10 × 4 inches. Folia, 11. Lines, 7 on a page. Extent in ślokas, 152. Character, modern Nāgarī. Date, Saṃvat 1961. Appearance, fresh. Complete.

A Tāntrika work full of Hindi incantations. It begins in Sanskrit thus:—

श्रीपार्वत्युवाच।

देवदेव महादेव + + + +

डामरस्य च व्याख्यातं विधिवत् कथ्यतां प्रभो॥

... ...

... ...

आकर्षणं वश्य मोहनं च मारणो उच्चाटनं तथा।

यक्षिण्यां + + व्याख्यानं विधिवत् कथयेश्वर॥

End :—

अथ कौलोद्धारमन्त्रः। ॐ चण्डेश्वर ह्रौं डामरजनित कौलोद्धारं कुरु कुरु स्वाहा इत्यनेन कौलोद्धारं कुर्य्याद्विधि विधि ८ दे च यथा।

इति श्रीगौरीडामरे वीरसाधनं संपूर्णं।

Post Colophon :—

श्रीसंवत् १६४० मीति जेट कृष्ण ६ वार बुध लीखा बालगोविन्द हाल सं १६४१ मार्ग शु १३ भौ० लिखितं रघुनाथमालवीयेन।

Fol. 11A-B describe a rite called मानभङ्गवीरसाधन. This description is again followed by the name of the copyist, Raghunātha Mālavīya, and the date of copying (same as that given above).

5860.

3185. **बृहद्भूतडामरतन्त्रम्।** *Bṛhadbhūtaḍāmaratantram.*

Substance, Serāmpore paper. 13 × 5 inches. Folia, 110. Lines, 6 to 9 on a page. Extent in ślokas, 1,700. Character, Bengali. Appearance, fresh. Incomplete.

The present MS contains 24 Paṭalas and a part of what seems to be the 25th Paṭala. A MS of the work in 25 Paṭalas is in the library of the Vaṅgīya Sāhitya Parishat of Calcutta. An edition of the work in 15 Paṭalas was published in the *Indrajālādisaṃgraha* of Rasik Mohan Chatterji (Calcutta, 1879).

Beginning :—

महोग्रं श्योमवक्त्रं कोटिसूर्य्याग्निभास्वरम्।
महाकालात्मकं नौमि श्रीबृहद्भूतडामरम्॥
भुवनाधिपतिं कान्तं सर्व्वलोकप्रपूजितम्।
महोन्मत्तं भैरवेशमनन्तं भैरवेश्वरम्॥

मन्त्रब्रह्ममयं गौरं सर्व्वव्यापकविग्रहम् ।
उन्मत्तभैरवं नत्वा पप्रच्छोन्मत्तभैरवी ॥

उन्मत्तभैरव्युवाच ।

हृदयानन्द-भूतेश सतीश भक्तवत्सल ।
वदस्व सर्व्वभूतेश श्रीभूतडामरम् ॥
कथं यक्षा नरा नागाः किन्नराः प्रमथादयः ।
डाकिन्यः कुलखेचर्य्यो देव-गन्धर्व्व-नायिकाः ॥
सिद्धदानवकन्याश्च योगिन्यः कामनायिकाः ।
जम्बुद्वीपे कलौ सिद्धिं यच्छन्त्येषां वराङ्गनाः ॥
ये स्युः पापरता मिथ्यावादिनः शीलवर्ज्जिताः ।
सालस्या ये नराश्चेभ्यः साहाय्यं कुरुष स्वयम् ॥
केनोपायेन गच्छन्ति कलौ क्रोधीश्वराश्रयः ।
महापातकजन्यानि तथोपपातकानि च ॥
दुष्टयक्षा दुष्टनागा दुष्टभूतादयस्तथा ।
विनश्यन्ति तथा दुष्टा महाविघ्नकराश्च ये ॥
अष्टमे सिद्धयः सर्व्वाः मोक्षपद्धतयः शुभाः ।
सिद्धयोऽप्यणिमाद्याः स्युर्महापातकनाशनाः ॥
ब्रह्मज्ञाघ्नतः पापमन्यस्त्रीगमनादिकम् ।
परद्रोहकृतं पापं परद्रव्याभिलाषकम् ॥
विश्वासघातादिकं पापमभिनिन्दा महाभयम् ।
कथं नश्यति देवेश कृपया नरकं तमः ॥
यन्त्रमन्त्रार्थप्रभो भूत्वा स्थिरीकृतपुरं चिरम् ।
सुरेन्द्र-सिद्ध-नागेन्द्र-भूत-यक्षेन्द्र-नायिकाः ।
गुह्यवेतालगन्धर्व्व-महेन्द्रकुलनायिकाः ॥
हठादानय कामार्त्ता बलादालिङ्गयन्ति तम् ॥
ब्रह्मयोगेन्द्रकन्याश्च भूतडामरनायिकाः ।
मन्त्रस्मरणमात्रेण केन सिद्धा भवन्ति ताः ॥

तथा ब्रह्मेश-ब्रह्माद्या देवानामधिदेवताः ।
त्रयस्त्रिंशत्कोटयश्च देवाः समरभैरवाः ॥
कथं सु-मारिता एते विद्याशक्तिसमन्विताः ।
पुनः केन प्रकारेण मृता जीवन्ति निर्ज्जराः ॥
कृपया वद भूतेश त्वमेव शरणं प्रभो ।
श्रुत्वेति भैरवीवाक्यमुन्मत्तभैरवोऽब्रवीत् ।
उन्मत्तभैरवीं प्राह सर्व्वं नियमपूर्व्वकम् ॥

Colophons of the different chapters :—

5A, इति श्रीभूतडामरे महातन्त्रे यन्त्रफलकथनं नाम प्रथमः पटलः; 8A, ०द्वितीय पटलः; 13B, ०क्रोधराज्ञा शतनामस्तोत्रे तृतीय पटलः; 17A, ०सिद्धिमन्त्रप्रभेदो नाम चतुर्थः; 24A, ०कालात्मक-सिद्ध-चक्रप्रभेदो नाम पञ्चमः; 30B, ०पञ्चभेदो नाम षष्ठः पटलः; 35B, ०कामभेदचक्र-प्रभेदो नाम सप्तमः पटलः; 41B, ०सारनिर्णय-चक्रप्रभेदो नामाष्टमः पटलः; 49B, ०भैरवी-भैरवसंवादे वेदचक्रप्रभेदो नाम नवम पटलः; 57B, ०षट्-कालात्मक-चक्रप्रभेदो नामः दशमः पटलः; 61B, ०सुन्दरीमन्त्रकथने एकादशः पटलः; 66B, ०सुन्दरीध्यानकथने द्वादशपटलः; 73A, ०भूतिनीसाधन-विन्यासो नाम त्रयोदशः पटलः; 78A, ०भूतिनीसिद्धिसाधनं नाम चतुर्दशः पटलः; 82A, ०कालरात्रिसाधनं नाम पञ्चदशपटलः; 85A, ०कालरात्रिस्तोत्र-मन्त्रविन्यासो नाम षोडशपटलः; 88B, ०कालरात्रिकवचं नाम सप्तदशः पटलः; 91A, महाभूतचेटिकासाधनं नामाष्टादशः पटलः; 93B, भूत-कात्यायनीसिद्धिसाधनं नाम ऊनविंशतिः पटलः; 95B, भूतकात्यायनीसिद्धि-साधनं नाम विंशः पटलः; 97B, ०उन्मत्तभैरवभैरवीसंवादे नायिकास्तोत्रकवच-विन्यासो नामैकविंश पटलः; 100B, ०दिव्यनागेन्द्र-नागिनीसाधनं नाम द्वाविंशति पटलः; 102A, ०नागेन्द्रनागिनी-स्तोत्रात्मककवचविन्यासो नाम त्रयोविंश पटलः; 107A, ०देवेन्द्रकुलयोगिनीसिद्धसाधनं नाम चतुर्विंशपटलः ।

5861.

9999. त्रिदशडामरे प्रत्यङ्गिराविधिः ।

Pratyaṅgirāvidhi from Tridaśaḍāmara.

Substance, palm-leaf. 11¾ x 2 inches. Folia, 14. Lines, 6 on a page. Character, old Newari. Date, N.S. 309. Appearance, old. Complete.

The present MS contains only two Paṭalas of the Ḍāmara which is in the form of an interlocution between Devī and Bhairava.

Beginning :—

ॐ स्वस्ति । ॐ नमः शिवादिभ्यो गुरुभ्यः ।
हिमवच्छिखरे रम्ये सुरासुरनिषेविते ।
तत्र स्थाने सुखासीनं देवदेवं महेश्वरम् ॥
सुरासुरैर्नमितं सिद्धगन्धर्वपूजितम् ।
कृताञ्जलिपुटा देवी इदं वचनमब्रवीत् ।

श्रीदेव्युवाच ।

सर्व्वलोकोद्भवं ज्ञानं त्वत्प्रसादान्मया श्रुतं ।
का विद्या डाकिनीनां तु दैत्यानां गतिनाशिनी ।
संसिद्धा या युगे घोरे सर्व्वसंशयभेदिनी ।

श्रीभैरव उवाच ।

पूर्व्वं गौरि महाघोरे श्मशाने करवीरके ।
आराधितोहं देवीभिर्योगे संपूजनाय च ॥
तां घोरसंख्यां ज्ञात्वा तु यातस्तत्र वरानने ।
चतुर्द्दिक्षु ये कोट्या डाकिन्याद्या महाबलाः ॥
यज्ञभागं प्रयच्छन्ति यदं कृत्वा सबान्धवान् ।
भुञ्जामि तमहं भद्रे क्रीडामि च चरामि च ॥

End :—

गुरुविद्वे भयार्त्ते च कामलोभसमन्विते ।
दातारो नरकं यान्ति सत्यं सत्यं न चान्यथा ॥

Colophons :—

7B, इति त्रिदशडामरे चतुर्विंशतिसाहस्रे प्रत्यङ्गिराविधि एकाशीतितमपटलः।

14A, इति त्रिदशडामरे चतुर्विंशतिसाहस्रे प्रत्यङ्गिराविधि द्व्यशीतित[म]पटलः। समाप्तं प्रत्यङ्गिराकल्पं।

Post Colophon :—

त्रिदशानां तु सिद्ध्यर्थं डामरं निर्मितं पुरा।
साधूनां तु हितार्थाय दुष्टसत्त्वनिपातनं॥
संवत् १०९ वैशाख शुक्ल-पञ्चम्यां रविवासरे श्रीश्रीचन्द्रदेवेन लिखितं। शुभोस्तु।

5862.

3171. रुद्रयामलतन्त्रम्। *Rudrayāmalatantram.*

Substance, country-made yellow paper. 18×4 inches. Folia, 77. Lines, 6, 7 on a page. Extent in ślokas, 900. Character, Bengali. Appearance, fresh. Complete.

The MS is so very corrupt, that it is almost impossible to read it.

Beginning :—

अथचापि जगन्माता सर्वाविद्याद्यगोचरा।
स्मृतिमात्रेण दुःखानि नाशयेद्देविकां प्रिये॥
सर्व्वदा देवदेवेशि सर्व्वसिद्धि(ः)प्रदायिनी।
धनधान्यसमभावा सर्व्वयोगप्रवर्त्तिनी॥
कारणात् सर्व्वजन्तूनां सर्व्वपापप्रणाशिनी।
तस्यतो गुरुतः प्राप्ता विद्याडामरबोधिनी॥
... ...

2B, ये मन्त्राः परेशानि तेन देवेपि संयुताः ।
तेर्जीवन्ति च मन्त्रेभ्यः श्रेष्ठ इति मे मतिः ॥
सप्तचत्विंश[त्र]वार्णा जगत् कर्मादिकर्तृका(:) ।
एतेषां जीवभूतादि हादशाक्षरमयं जगत् ॥

3A, श्रीदेव्युवाच ।
सकला निष्कलाश्चैव मुक्तिमार्गप्रबोधकाः ।
मानवा बहवः सन्ति वद तेषामनुत्तरम् ॥

श्रीशम्भुरुवाच ।
कालचिदक्षराणामेतन्मूलमुदाहृतम् ।
आवयोर्नैव देवेशि मनुरीकारकात्मनोः ॥
सर्वेषामेव मन्त्राणां प्राणाधारा महेश्वरि ।
आवयोरपि तत्राप्य संयुतत्रिस्त्रि स्मृतम् ॥

Colophons of the different chapters :—

6A, इति रुद्रयामले अनुत्तरनिर्णये प्रथमः पटलः; 8B, इति रुद्रयामले प्रतिविचारनिरूपणो द्वितीयः पटलः; 10B, इति रुद्रयामले तृतीयः पटलः; 13A, इति रुद्रयामले चतुर्थः पटलः; 15A, इति रुद्रयामले पञ्चमः पटलः; 22B, इति श्रीरुद्रयामले शास्त्रव्याख्याने उत्तरषट्कं नाम षष्ठः पटलः; 26B, इति श्रीरुद्रयामले पञ्चस्रोतोविभागं नाम सप्तमः पटलः ।

In the leaves 27 to 76 there is no colophon. The last leaf contains the following colophon :—

इति रुद्रयामले पञ्चमीपटलः ।

On the left hand margin of the last leaf, the name of the original owner is recorded thus :—

श्रीब्रह्मानन्दनाथावधूताचार्यस्य पुस्तकमिदम् ।

The present MS seems to contain the Anuttaratantra, or First Part, whereas the printed editions of the work contain the Uttaratantra, or Second Part.

5863.

5213. *Rudrayāmalam.*

Substance, palm-leaf. 17¼ × 2¾ inches. Folia, 1–133 of which Fol. 125 is missing, and 124, 126–33 very badly damaged. Lines, 3 on a page. Extent in ślokas, 1,900. Character, Bengali. Appearance, old and worm-eaten. Incomplete.

Two editions of what is called the *Uttaratantra* or Second Part of the work published by J. Vidyasagara and R. Chatterji contain respectively 66 and 69 Chapters. This MS contains only a part of the work—Paṭalas 31–54 (29–52 of J. Vidyasagara's edition). The 54th Paṭala breaks off abruptly.

Beginning :—

ॐ नमो भगवत्यै । श्रीआनन्दभैरव उवाच ।
एकमनोमव प्रवक्ष्यामीह तत्त्वतः ।
कुण्डलीयोगविविधं कृत्वा योगी भवेन्नरः ॥

Colophons of the different chapters :—

4B, इति श्रीरुद्रयामले महाप्रलयनिर्णयं नाम एकत्रिंशत् पटलः; 9A, ०डाकिनी-प्रकाशोयं नाम द्वात्रिंशत् पटलः; 14A, इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भेदिन्यादिकथनं नाम त्रयस्त्रिंशत् पटलः; 17B, इति श्रीरुद्रयामले कवचादिनीकथनं समाप्तम्; 38B, इति रुद्रयामले सर्व्व-तन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवभैरवीसम्वादे कुलकुण्डल्यष्टो-त्तरशतलक्षणनाम स्तवकवचं नामाष्टत्रिंशत् पटलः; 43A, इति रुद्रयामले उत्तरतन्त्रे स्वाधिष्ठान-श्रीडाकिनीसाधनं नाम नवत्रिंशत् पटलः; 47B, इति ०श्रीस्वाधिष्ठानप्रवेशो नाम चत्वारिंशत् पटलः; 52B, ०श्रीडाकिनीस्तवकवचं नाम एकचत्वारिंशत् पटलः; 55A, ०मणिपूरप्रकाशो नाम द्विचत्वारिंशत् पटलः; 60A, ०स्वाधिष्ठानराकिणीकथनं नाम त्रिचत्वारिंशत् पटलः; 73B, ०स्वाधि-ष्ठाने अष्टोत्तरशतनामस्तोत्रं नाम चतुश्चत्वारिंशत् पटलः; 78A, इति श्रीरुद्रयामले उत्तरतन्त्रोद्दीपने मणिपूर-चक्रभेदप्रकाशे नाम षट्चत्वारिंशत् पटलः;

82A, इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने चित्तत्त्वार्णकौमोत्पत्तिकथनं नाम सप्तचत्वारिंशत् पटलः; 87B, इति श्रीरुद्रयामले वर्णध्यानकथनं नाम अष्टचत्वारिंशत् पटलः; 93B, इति रुद्रयामले षट्चक्रप्रकाशे रुद्रशक्तिलाकिनी-स्तोत्रं ऊनपञ्चाशत् पटलः; 118A, इति श्रीरुद्रयामले उत्तरतन्त्रे शिवमन्त्र-प्रकाशो नाम पञ्चाशत्तमः पटलः; 121A, इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने रुद्रस्तवकुम्भकस्तवनं नामैकपञ्चाशत्तमः पटलः; 129A, इति श्री-रुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धिमन्त्रप्रकरणे भैरवभैरवीसम्वादे सति-पुरभेदप्रकाशो नाम त्रिपञ्चाशत् पटलः।

5864.

5215. *Rudrayāmalam.*

Substance, palm-leaf. 17 × 1¼ inches. Folia, 1-117. Lines, 3 on a page. Extent in ślokas, 1,400. Character, Bengali. Appearance, old and soiled. Incomplete.

The manuscript begins with the 16th Paṭala and ends abruptly at the 26th. This portion does not agree with that of the printed edition.

5865.

3350B. रुद्रयामले कौलावलीतन्त्रम्। *Kaulāvalītantram from the Uttaratantra of the Rudrayāmala.*

Substance, palm-leaf. 10¾ × 1¼ inches. Folia, 58. Lines, 3-4 on a page. Extent in ślokas, 600. Character, Bengali. Appearance, old, dilapidated and worm eaten. Complete.

This MS contains extracts from different Tantras. The extracts from the *Rudrayāmala* cannot be identified but the extract from the *Kulārṇava* is found in the printed editions of the work.

Beginning :—

देव्युवाच ।

भगवन् सर्व्वमाख्यातं पुरश्चरणमुत्तमम् ।
इदानीं श्रोतुमिच्छामि साधनञ्च महेश्वर ॥

ईश्वर उवाच ।

विना भावेन देवेशि सिद्धिर्न हि भवेत् क्वचित् ।
त[था]प्यङ्गीकृते देवि साधको भावमाश्रयेत् ॥
अधिकारी भवेत्तत्र स तु वै साधकोत्तमः ।
भावस्तु त्रिविधः प्रोक्तः सूक्ष्मस्थूलविभागतः ॥

Colophons of the different sections :—

12A, इति रुद्रयामले भैरवभैरवीसंवादे उत्तरतन्त्रे कौलावल्यां गुप्तसाधन पटलः : 23A, इति रुद्रयामले उत्तरतन्त्रे कौलावल्यां हरगौरीसंवादे प्रश्नोत्तर-पटलः : 34B, इत्युत्तरतन्त्रे षष्ठ पटलः ; 46B, इति कुलार्णवे सपादलक्षग्रन्थे ऊर्द्ध्वाम्नाये कुलद्रव्यादिलक्षणं नाम पञ्चमोल्लासः ।

Post Colophon :—

श्रीरामदासदेवशर्म्मणः स्वाक्षरं पुस्तकञ्च । श्रीभवानीचरणे मम भक्तिरस्तु ।

There are several leaves after the Post-colophou dealing with different Tantra topics.

5866.

10799Q. **बृहद्रुद्रयामलम् ।** *Bṛhadrudrayāmalam.*

Substance, country-made paper. 16 x 4 inches. Folia, 8. Lines, 8-13 on a page. Extent in ślokas, 360. Character, Bengali. Appearance, discoloured. Incomplete.

The present MS contains chapters I-V of Book IV of the work which treats of Vaiṣṇava worship.

Beginnings and ends of the different chapters :—

श्रीनारद उवाच ।

यं विप्रशीर्षं सततं दयालुं सर्व्वे समं विष्णुमितीह भाष्यते ।

गुणप्रभावं गुणसिन्धुमव्ययं नमामि श्रीब्रह्मपदं सदा मुदा ॥

1A, इति श्रीबृहद्ब्रह्मयामले श्रीकृष्णनारदसंवादे चतुर्थखण्डे ब्रह्माष्टकं नाम प्रथमाध्यायः ।

श्रीनारद उवाच ।

श्रीकृष्णकरुणासिन्धो भक्तिमुक्तिषु पारग ।

श्रोतुमिच्छामि यद्देव श्रावयित्वा सुखी कुरु ॥

ब्रह्मचारी-गृही-प्रस्थ-यति-भिक्ष्वादिकास्तु ये ।

तेषामाश्रमधर्म्माणि भक्तिं मुक्तिञ्च मे वद ॥

1B, [illegible] यामलीये श्रीकृष्णनारदसंवादे चतुर्थखण्डे द्वितीयोऽध्यायः ।

श्रीनारद उवाच ।

... ...

को मन्त्रः कश्च वा मार्गः शास्त्रं वा किं प्रशस्तकं ।

ज्ञात्वा मुक्तिमवाप्नोति परमं पावनं प्रभो ॥

रामाः कृष्णाश्च शैवाश्च शाक्ता वा जगतीपते ।

किं कुर्व्वन्ति किं भजन्ति किं यजन्ति हि माधव ॥

श्रीभगवानुवाच ।

शृणु नारद तत्त्वेन कथां कल्याणदायिनीं ।

महापापं विनिर्धूय मुक्तिमाप्नोति मानवः ॥

श्रीरामो वैष्णवः सिद्धः शैवागमः शिवाश्रयी ।

शैवे परे सदा रुद्रभक्तेः सिद्धो न संशयः ॥

वैष्णवो रमणीं रन्तु यदीच्छति महामुने ।

दीपे यथा पतङ्गाः स्युस्तथा नश्यन्ति तत्क्षणात् ॥

सत्यवादी चिह्नधारी तिलकी माल्ययुग्भवेत् ।

रमेच्च रमणीं विप्र पुत्रार्थं ऋतुकालतः ॥

पुत्रीभूते वैष्णवे तु सुगमं मुक्तिसाधनं ।
साधनं भक्तिमार्गस्य गङ्गाकुम्भं यथा सुरा ॥
प्रातरुत्थाय कर्त्तव्यं चयनं पत्रपुष्पयोः ।
स्नात्वा यजेदिष्टदेवं यथाशास्त्रप्रचारतः ॥

5B, ०चतुर्थखण्डे तृतीयोऽध्यायः ।

श्रीनारद उवाच ।

हे नाथ कमलाकान्त ... ...
आश्रमाश्चाश्चतुर्वर्णाः को मन्त्रः कस्य शस्यते

7B, ०चतुर्थोऽध्यायः ।

श्रीनारद उवाच ।

कथ्यतां कृपया महाबाहो ज्ञानसागरपारग
मार्गाणां हि क्रियाद्यानां तत्त्वं वद मम प्रभो ॥

भगवान् उवाच ।

. ...

अत्र लोके त्रयो मर्त्या आसन्विप्रकुलोद्भव
मुमुक्षवो विषयी च मुक्तार्थिति त्रयो मताः ॥
क्रियामार्गो भक्तिमार्गो योगमार्गस्तथैव च
मार्गास्त्रयो मया प्रोक्ता मुक्तिदा याः [illegible] द्विज ॥

Last Colophon :— ०पञ्चमोऽध्यायः ।

5867.

3543. *Bṛhadrudrayāmala.*

Substance, country-made yellow paper. 17 × 4 inches. Folia, 48. Lines, 5 on a page. Extent in ślokas, 1,100. Character, Bengali. Date, Śaka 1741. Appearance, fresh. Complete in thirty adhyāyas.

The present MS, which is accompanied (up to the 12th chapter) by the commentary of Rāmānanda, contains chapters I-XXX of Book II of the work dealing with the folk-cult of Pañcānana, well-known in West Bengal.

Colophon :—

इति कृष्णरुद्रयामलीये श्रीकृष्णनारदसंवादे द्वितीयखण्डे त्रिंशो-ऽध्यायः । समाप्तोऽयं जन्मखण्डः ।

Post Colophon :—

स्वात्मार्थमिदं श्रीचिन्मोहन देवशर्मणा । ग्राः भोड़ा शक १७४१ तारिख २१ शं वैशाख ।

5868.

8403. **रुद्रयामले मतोत्सवतन्त्रम् ।** *Matotsavatantram from the Rudrayāmala.*

Substance, country-made paper. 14 × 5½ inches. Folia, 2-25. Lines, 12 on a page. Character, modern Nāgara. Appearance, fresh. Complete.

Topics stated to be taken from the *Rudrayāmala* in this and the subsequent MSS are not found in the printed editions of the work.

Fol. 2 (of which one side is blank) of the present MS contains an extract from a work called the *Vidhānamuktāvali*. This extract deals with what is called सप्तशतीचतुर्दश-दलपूजन । It begins :—

विधानमुक्तावल्यां प्रकरणमाह ।

त्रयोदशदलं पद्मं लिखित्वा सुमनोहरं ।

मारणं मोहनं चैव उच्चाटनं वश्यकं तथा ॥

सुवर्णपत्रे लिखित्वा तु त्रयोदश-पद्मं प्रारभेत् ।

From Fol. 3 up to the end of the MS various magical rites are described. The MS contains mystic diagrams required for these rites. The descriptions are mostly in Hindi. The colophon which runs as follows gives the name of the work.

इति श्रीरुद्रयामले तन्त्रे उमामहेश्वरसंवादे मतोत्सवतन्त्रं समाप्तं

5869.

10469. रुद्रयामले चण्डीनवार्णपटलम् । *Caṇḍīnavārṇa-paṭalam from the Rudrayāmala.*

Substance, country-made paper. 8¼ × 4¼ inches. Folia, 11. Lines, 7 on a page. Extent in ślokas, 132. Character, Nāgara. Appearance, discoloured. Complete.

The mantra of Caṇḍī consisting of nine syllables is here dealt with.

Beginning :—

ईश्वर उवाच ।

शृणु देवि प्रवक्ष्यामि पार्व्वति प्राणवल्लभे ।
चण्डिकायास्तु पटलं सर्व्वस्वं देवि दुर्लभम् ॥

... ...

तत्रादौ तु मनूद्धारं सर्व्वाङ्गमपि निश्चितम् ।
प्रवक्ष्या[मि] महादेवि न प्रकाश्यं कदाचन ॥
वाग्भवं प्रथमं प्रोक्तं मायाबीजं द्वितीयकम् ।
तृतीयं कामराजाख्यं चामुण्डायै ततो वदेत् ॥
विच्चे इति पदं दद्यात् मन्त्रोऽयं नवाक्षरः ।
चण्डिकाया इदं मन्त्रं भुक्तिमुक्तिप्रदायकम् ॥

Colophon :—

इति श्रीरुद्रयामले तन्त्रे षट्तन्त्रे देवीश्वरसंवादे चण्डीनवार्णपटलं समाप्तं संपूर्णम् ।

Post Colophon :-

शुभमस्तु वैशाखमासे सिते पक्षे नवम्यां भौमवासरे ।
पुस्तकं लिखितं चैव गौतमरामशर्म्मणा ॥

5870.

8375. रुद्रयामले रसार्णवकल्पम् । *Rasārṇavakalpam from Rudrayāmalatantram.*

paper. 9¼ × 4¼ inches. Folia, 45. Lines, 10, 11 on a page. ... 1,000. Character, Nāgara. Date, Saṃvat 1760. Appearance, old and discoloured. Complete.

It deals with the worship of Śiva as also with various chemical preparations, chiefly those combined with mercury.

Beginning :—

श्रीगणेशाय नमः ।

वे मार्ये सिद्धिबुद्धिस्तदनमहर्षा। स्वद्धिर्बुद्धि गणाद्यौ
द्वौ पुत्रौ सद्धलाभौ सकलगुणमयौ मंडपे कल्पवृक्षः ।
गेह यस्य प्रसूतं मदनममृतं मोदकाखंडमिश्रा
भूयाद्भूत्यै गणेशो यमदखिलयशानंदकारि कुटुंबः ॥

End :—

संवत्सरप्रयोगेण देवतै[:] सह मोदते ॥
सह मोदते
द्वादशाब्दः प्रयोगे शिवर्वाद्दिषणैर्भुवि ॥

Colophon :—

43B, इति श्रीरुद्रयामले तन्त्रे रसार्णवकल्पकानां सम्पूर्ण ॥

Even after the colophon several verses are found, and after a further two leaves, mostly in Hindi, we have the date :—

संवत् १७६० ॥

The work has no division of chapters and has no agreement with the *Rasārṇava* (Calcutta, 1908-10) published in the *Bibliotheca Indica Series*.

8376. रुद्रयामले रसकल्पम् । *Rasakalpam from the Rudrayāmala.*

Substance, country-made paper. 12¼ × ' 9 on a page. Extent in ślokas, 380. Char. --Pr ance, new, but torn and repaired. Each o ... eaves has lost its first few letters.

The *Sāhitya Pariṣat Patrikā* (Vol. XXXVIII, p. 248) describes another MS of the work. IO. IV. 2550 describes a *Dhātukalpa* (said to be taken from the *Rudrayāmala*). The present work treats of various preparations with mercury.

Beginning :—

... ... अथ श्रीरुद्रयामले रसकल्पं लिख्यते ।
शिवं नत्वा रसाधीशं चण्डिकाचरणौ तथा
करोमि रसकल्पोयं रसज्ञा ... ... ॥

अथ पारदोत्पत्तिः ।
कान्दाकार कांचिभार्थं कलासं विघ्नं सुरे ।
रतं शम्भोश्चुतं रेतो गृहीतमग्निना मुखे(?) ॥ २ ॥
क्षिप्तं तेन च ... ... पृथक् पृथक् ।
सौम्यादिरूपसंस्थाय गौरीशापाच्च कार्यकृत् ॥

End :—

साक्षादनुभवैर्दृष्टो न श्रुतो गुरुदर्शिनः ।
लोकानामुपकाराय एतत् सर्वं + + + + ॥
+ यां चैव लोकानां द्रावकं परिकीर्त्तितं ॥

Colophons of the different sections :—

6B, इति श्रीरुद्रयाम ... ... ईश्वरसंवादे रसशोधनप्रकारो नाम
9A, इति श्रीरुद्रयामले उमामहेश्वरसंवादे रसमारणाधिकारो नाम
11A, इति श्री... ... पार्व्वतीसंवादे सत्त्वपातनाधिकारो नाम

Last Colophon :—

इति श्रीरुद्रयामले उमामहेश्वरसंवादे सर्व्वोपद्रुतियातनाधिकारे समकल्पः ॥

5872.

10527. **रुद्रयामले रुद्रचण्डी ।** *Rudracaṇḍī from the Rudrayāmala.*

Substance country-made paper. 5 × 3 inches. Folia, 10. Lines, 8 on a page. Extent in Śloka, 70. Character, modern Nāgara. Appearance, fresh. Complete.

The present manuscript contains only the third chapter of the work in four chapters as published by the Chhātra-pustakālaya of Calcutta.

Colophon :—

इति श्रीरुद्रयामले तन्त्रे हरगौरीसंवादे रुद्रचण्डी समाप्ता(म्)॥

5873.

10689. *Rudracaṇḍī from the Rudrayāmala.*

Substance country-made yellow paper. 15¼ × 4½ inches. Folia, 3. Lines, 8, 9 on a page. Extent in Śloka, 102. Character, Bengali. Appearance, fresh. Complete.

Same as above though there is slight difference in names, this being called रुद्रचण्डीस्तोत्र.

The present MS, however, begins with what is called the Saṅkalpa for a regular reading of the work. It then proceeds to lay down the process of the worship of the Devī. The beginning runs thus :—

श्रीभगदीश्वराय नमः ॥

अथ रुद्रचण्डीपूजा ।

अद्येत्यादि अमुकगोत्रस्य श्रीअमुकदेवशर्म्मणः............पञ्चिङ्कां हृदये न्यस्य इत्यादि मत्वमाय सुदुर्लभमितत्वं(मत्वुनं) महारुद्रचण्डीपाठकर्म्माहं करिष्यामि ॥

Colophon :—

इति रुद्रयामले रुद्रचण्डीस्तोत्रं समाप्तं ॐ तत्सत् ।

The Post Colophon runs thus in Nāgara script :—

ग्रन्थाध्यक्ष-श्रीमद् वैष्णवमहान्तदासस्य तनय श्रीराखालदास शर्म्मणेन लिखितं । कलिकाता, खिदिरपुर । शकाः १७७२ ज्यैष्ठ ।

5874.

8753. **रुद्रयामले कालीपुराणम् ।** *Kālīpurāṇam from the Mahākālasaṃhitā of Rudrayāmala.*

Substance, country-made paper. 13 × 5 inches. Folia, 8–183. Lines, 10 on a page. Extent in ślokas, 7,400. Character, Nāgara. Date, Saṃvat 1929. Appearance, fresh. Incomplete.

Though stated in the last colophon of the MS to belong to the Rudrayāmala the work generally agrees with the printed edition of the *Kalikāpurāṇa* as published by the Vangavāsī Electro Machine Press (Calcutta, 1909), and begins from the second foot of the 10th verse of chapter 4 of the edition and ends with verse 82 of chapter 60.

There is a single colophon which runs thus (Fol. 183A) :—

इति रुद्रयामले तन्त्रे उमामहेश्वरसंवादे महाकालसंहितायां श्रीकालीपुराणोऽयं समाप्तं ।

Post Colophon :—

शुभमस्तु । संवत् १९२९ शुभं ।

5875.

5562. **रुद्रयामले मेघमाला ।** *Meghamālā from the Rudrayāmala.*

Substance, Serampore paper. 10 × 4½ inches. Folia, 52. Lines, 9 on a page. Extent in ślokas, 1,050. Character, Nāgara. Date, Saṃvat 1920. Appearance, fresh. Complete.

The work deals with characteristics of clouds, effects of different types of them on plant-life and kindred topics and is of considerable meteorological interest. Of Tântric topics in it mention may be made of the मेघाकर्षण-मन्त्र in Paṭala X. A lithograph edition of the work was published by the Kāśī Sanskrit Press in V.S. 1878. For other editions cf. BM Catalogue (1906-28, p. 1075).

Beginning :—

श्रीगणेशाय नमः ।

कैलासशिखरासीनं भैरवं परमेश्वरम् ।

... ...

.. ..

... ... पार्वती परिपृच्छति ।

ॐ नमो वरदेवाधिपार्वतीपतये नमः ॥

पार्वत्युवाच ।

देवाधिदेवताश्चैव जगदादिपरमेश्वरः ।

त्रिलोकेष्वपि लोकेषु सृष्टिसंहारकारकः ॥

मेघास्तु कीदृशा देव कथं विद्युत् प्रजायते ।

कीदृशं वर्षरूपन्तु शरीरं तस्य कीदृशम् ॥

End :—

त्रिसंध्यं प्रभावे विंद्यात् ... दिनत्रयः ।

समरात्रेण वैद्यस्य शुद्धस्य दर्शनेन तु ॥

Colophons :—

14A, इति श्रीरुद्रयामले सारोद्धारे उमामहेश्वरसंवादे मेघमालायामर्घकाण्डे राज्यादिफलाध्यायः; 26B, इति श्रीरुद्रयामले मेघमालायां शनैश्चरक्रियाफलाध्यायः; 29A, °राशिगतग्रहोत्पातफलाध्यायः: 31A, संक्रान्तिफलाध्यायः, 32B, °ग्रहस्योदयास्तफलाध्यायः; 48B, °मासफलाध्यायः; (last colophon) इति श्रीरुद्रयामले सारोद्धारे उमामहेश्वरसंवादे मेघमालायामर्घकाण्डे काकरुतफलाध्याय एकादशः । समाप्तः ।

Post Colophon :—

श्रीसंवत् १९१० भाद्रपद शुक्ल १३ तिथौ भृगुवासरे विद्याधर-
द्विवेदिना लिखितं कामदां स्वार्थं परार्थञ्च ।

5876.

6355. *Meghamālā from the Rudrayāmala.*

Substance, country-made paper. 10 × 4 inches. Folia, 38. Lines, 11 on a page. Extent in ślokas, 850. Character, modern Nāgara. Appearance, fresh. Complete.

This and the following MS generally agree with the above.

Colophons :—

4B, इति श्रीरुद्रयामले सारोद्धारे उमामहेश्वरसंवादे मेघमालायां सर्वकाले गुरुमते मेघस्वरूपं तथा द्वादशराशिगते गुरुफलाध्यायः प्रथमः. 7A. ०सर्वकाले षष्टिसंवत्सरफलाध्यायो द्वितीयः; 9A, ०राजफलाध्यायस्तृतीयः; 16B, ०ग्रहचारस्य विविधफलाध्यायः चतुर्थकः; 18B, ०राशिग्रहोत्पातः फलाध्यायः पञ्चमः; 20A, ०संक्रान्तिफलाध्यायः षष्ठः; 21A, ०ग्रहस्योदयास्तफलाध्यायः सप्तमः; 34B, ०मासस्वरूपवर्षफलाध्यायोऽष्टमः; 35A, ०मेघवातविद्युत्फलाध्यायो नवमः; 36B, ०मेघाख्यानं नाम दशमोऽध्यायः; 37B, ०काकशब्दफलाध्यायो नाम एकादशोऽध्यायः—मेघमालाग्रन्थः समाप्तः ।

After the end of the 11th chapter there is a section on केतूदयफल dealing with the rising of *Ketu* on different days. This is followed by a colophon which runs:—

38A, इति केतूदयफलान्ययग्रन्थोक्तं इति श्रीमेघमालाग्रन्थ समाप्तम् । शुभमस्तु ।

There are a few lines after this on what is called ग्रहफल-निर्णयः ।

5877.

7831. *Meghamālā from the Rudrayāmala.*

Substance, country made paper. 10¾ x 5 inches. Folia, 56. **Lines**, 11 on a page. Extent in ślokas, 1,050. Character, Nāgarī. Appearance, discoloured. Complete.

Same as above. The section entitled [illegible] is found here also.

5878.

2341. मयूरचित्रकम् *and* मेघमालायां मयूरचित्रकम् ।

Mayūracitrakam and Meghamālāyāṃ Mayūracitrakam from Meghamālā.

Substance, country made paper. 10 x [illegible] inches. Folia, [illegible]. **Lines**, 11 on a page. Extent in ślokas, 550. Character, [illegible]. Appearance, good. Complete.

The present manuscript is described in L. N. [illegible]22.

There are two works, separately paged in this manuscript, one Mayūracitraka ending in leaf 10, and the other Mayūracitraka from *Meghamālā* ending in leaf 12. The first leaf of the second work is missing. The total number of the leaves is therefore 21 and not 22, as given in L.

These are astrological treatises, similar in nature, on the forecasting of rains, famines and abundance of crops from the conjunction of particular days, *Tithis* and asterisms in all the twelve months of the year. Though bearing the name Meghamālā (on the basis of which the MS is described here) the second work does not agree with the work of the same name described previously. Neither is it attributed here to the Rudrayāmala.

After the colophon of the second book there occur more astrological verses. Then there comes the post colophon statement :—

संवत् १८६५ मिति पौष शुक्ल ६ भृगु० ।

Colophons of the first book :—

(2A) इति चैत्रः, इति वैशाखः ; (2B) इति जैष्ठः (5A) इत्याषाढः ; (5B) इति श्रावणः, इति भाद्रपदः ; (6A) इति आश्विनः, इति कार्त्तिकमासः ; (6B) इति मार्गशीर्षः ; (8A) इति पौषमासः गमधारः ; (10B) इति मयूर-चित्र समाप्तः ।

Colophons of the second book :—

(3A) इति अर्घकाण्ड अन्योन्यत्रैराशिकफलसमाप्तः ; (3B) इति अर्घकाण्ड प्रथम मंडलगुणा ; (4A) अर्घकाण्ड मण्डलसमाप्त ; (5B) अथार्घफलम, इति अर्घकाण्डे संक्रान्तिफल समाप्तः ; (8A) इति केतुचारः समाप्त ; (9A) इति माघमासः ; (9B) इति फाल्गुनमासः ; (10B) इति महोत्पातलक्षणम् ; (12A) इति शकुनान्तर्गत शुभाशुभलक्षण सम्पूर्णम् इति मयूरचित्रकं मेघमालायां समाप्तः ।

5879.

5498. रुद्रयामले देवीचरित्रम् । *Devīcaritram from the Rudrayāmala.*

Substance, country made paper. 10 x 4½ inches. Folia, 12. Lines, 20 on a page. Extent in ślokas, 650. Character, Nāgara. Date, Saṃvat 1731. Appearance, fresh. Complete in 13 chapters.

It gives directions for the worship of Durgā during the Navarātra festival.

Beginning :—

श्रीगणेशाय नमः ।

ॐ गजाननाय महसे प्रत्यूहतिमिरच्छिदे ।
अपारकरुणापूरतरङ्गितदृशे नमः ॥
रुद्रयामलाभिप्रायेण देवीपूजनमुच्यते ॥
गोगजनाजनभे गनभव्योद्भवपमिषमपजनयाः ।
वाहनवैरिजतानवरक्ता मा मा पातु जगत्त्रयगुप्ता ॥

ईश्वर उवाच ।

यो नित्यं पूजयेद्देवीं चण्डिकां भक्तवत्सलाम् ।
तस्यायुः पुत्रसौख्यञ्च विद्यानामीश्वरो भवेत् ॥
यश्चण्डीभावसंयुक्तस्तस्य लक्ष्मीश्च किङ्करी ।
वशगा तत्क्षणं यान्ति स्त्रियो वै मदविह्वलाः ॥
यो भवानीं महामायां पूजयेन्नित्यमादरात् ।
ऐहिकञ्च सुखं प्राप्य परे ब्रह्मणि लीयते ॥
यो वै दौर्भाग्यसंयोगाच्चण्डिकामवमन्यते ।
दरिद्रो व्याधितो नित्यं लोके वै शोच्यतां व्रजेत् ॥

End :-

श्रीमहादेव उवाच ।

रमाकान्त सुराधीश प्रोक्तं गुह्यतरं मया ।
नास्तिकाय अभक्ताय परशिष्याय नो वदेत् ॥
देवीभक्ताय वक्तव्यं मम भक्ताय माधव ।
अभक्ताय न वक्तव्यं न मूर्खायाततायिने ॥
सत्यं सत्यं पुनः सत्यं उद्धृत्य भुजमुच्यते ।
मायया सदृशी विद्या न गङ्गासदृशी नदी ॥
न वैकुण्ठात् परं धाम न मुक्तिः कालिकां विना ।
न राजा कार्त्तवीर्यादि एतत् सत्यं सुरेश्वर ।

Colophons :—

2A, इति श्रीरुद्रयामले उत्तरखण्डे प्रथमापूजनविधिः; 3A, ०देवीचरित्रे देवीप्रभावो नाम द्वितीयोऽध्यायः, 3B, ०रहस्यं नाम तृतीयोऽध्यायः; 4B, ०चतुर्थोऽध्यायः; 5B, ०दुर्गोपाख्याने देवीचरित्रे पञ्चमोऽध्यायः; 6B, ०देवीचरित्रे षष्ठोऽध्यायः; 7B, ०सप्तमोऽध्यायः; 8A, ०अष्टमोऽध्यायः; 9A, ०नवमोऽध्यायः, 9B, ०दशमोऽध्यायः; 10B, ०एकादशोऽध्यायः; 11A, ०द्वादशोऽध्यायः; 11B, ०त्रयोदशोऽध्यायः ।

Last Colophon :—

इति श्रीरुद्रयामले उत्तरखण्डे देवीचरित्रे त्रयोदशोऽध्यायः ।

Post Colophon Statement :—

Fol. 11B, संवत् १७८१ आश्विन शुक्ल ११ लिखितं विष्णुदेवेनेदं स्वार्थम् ग्रन्थसंख्या ६०० (?) । .

After the post-colophon there occurs an extract, in six lines, entitled नवरात्रनिर्णयः, purporting to have been taken from the *Śaktisaṅgamatantra*. A detailed table of contents, of the *Devīcaritra*, chapter by chapter, is given on Fol. 12A.

5880.

5913. **रुद्रयामले देवीरहस्यम् ।** *Devīrahasyam from the Rudrayāmala.*

Substance, country-made paper. 9 × 5½ inches. Folia, **251**. Lines, 10 per page. Extent in ślokas, 5,980. Character, Nāgara. Appearance, fresh. Complete.

This is a work consisting of sixty chapters, relating to *Kuladharma*. It is divided into two parts, the first in 25 chapters being concerned with the general observances of the Śākta cult, and the second in 35 chapters (26 to 60) with the rules of worship of different deities.

For an analysis of the work see IO. IV. 2546.

The last colophon which is particular to this MS runs :—

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये षष्टितमः पटलः । समाप्तोऽयं देवीरहस्या + + + तन्त्रः परमार्थप्रदीपिकापरनामा तन्त्रराजश्चेति । शिवं लेखकपाठकयोः ।

Post Colophon Statement :—

इति श्रीशम्भुनाथ कर उत्कलदेशस्य ब्राह्मण बेलं पुरीश्वर-
ग्रामान्तपुरीय वैतरणीय ब्राह्मणाकृता लिखितम् ।

संवत् १८५६ पौषकृष्णैकादश्यां शुक्रे लिखितम् कलिकाताख्य
पट्टने ।

शुभमस्तु सर्व्वजगताम् ।

Along with the MS are found two leaves of foolscap paper containing a list of eighteen *pīthas* attributed to Śaṅkarācārya.

5881.

6084. रुद्रयामले त्रिपुरसुन्दरीपटलः । *Tripurasundarī-paṭalaḥ from the Rudrayāmala.*

Substance, country-made paper. 7 × 4½ inches. Folia, 19. Lines, 9 on a page. Extent in ślokas, 250. Character, Nāgara. Appearance, fresh. Complete.

It gives the *mantra* and rules of worship of Śrīvidyā, but not the complete *pañcāṅga* consisting of *stava, kavaca*, etc.

Beginning :—

ॐ श्रीगुरवे शिवाय ॐ नमः ।

श्रीदेव्यै सिद्धिदायिन्यै नमः ।

ॐ श्रीदेव्युवाच ।

ॐ भगवन् सर्व्ववेत्ता त्वं जगतामुपकारकः ।
देवादिदेवदेवेश त्रैलोक्याभयदायक ॥
प्राक् सुरासुरसंग्रामे मह्यं दत्तो वरस्त्वया ।
तदद्य कृपया शम्भो सम्प्रदातुं क्षमो भव ॥

श्रीभैरव उवाच ।

देवि सत्यं वरो दत्तो देवदानवसंगरे ।

यत्ते मनस्यभीष्टं तु तत्त्वं वदस्व सुव्रते ॥

श्रीदेव्युवाच ।

भगवन् सर्वधर्मज्ञ सकलागमपारग ।

देवदेवी महादेवी महात्रिपुरसुन्दरी ॥

त्रिकूटा षोडशी देवी श्रीविद्या ब्रह्मरूपिणी ।

तस्याः महाक्रममखिलं सारात्सारोत्तमोत्तमम् ॥

वद शीघ्रं महादेव यद्यहं प्रेयसी तव ॥

Colophon :—

इति श्रीरुद्रयामले तन्त्रे देवीभैरवसंवादे महात्रिपुरसुन्दरी-रहस्यं समाप्तः । इति शुभम् ।

5882.

·6087. रुद्रयामले त्रिकूटारहस्यम् । *Trikuṭārahasyam from Rudrayāmala.*

Substance, country-made paper. 7 × 4½ inches. Folia, 11 + 9. Lines, 9 on a page. Extent in ślokas, 180. Character, Nāgara. Appearance, fresh. Complete.

The work deals with the ceremonial worship of Śrīvidyā on different occasions like eclipses, earthquakes, etc.

Beginning :—

ॐ श्रीभैरव उवाच ।

ॐ अधुना कथयाम्यद्य पूर्णां कामविधिं शृणु ।

येन श्रवणमात्रेण कोटिपूजाफलं लभेत् ॥

श्रीदेव्याः षोडशाख्यायास्त्रिकूटायाः समर्चनम् ।

समयस्य प्रवक्ष्यामि भक्तिपूर्वं शृणु प्रिये ॥

विना समयदीक्षाद्यैर्मन्त्रैर्दीक्षापि निष्फला ।
तस्मात् समयपूजां ते वक्ष्यामि पारलौकिकीम् ॥
... ...
... ...
सूर्य्यग्रहणकाले वा चन्द्रग्रहणवासरः ।
भूकम्पसमयो देवि नवरात्रिदिनानि च ॥
कन्यासंक्रान्तिसमया देवानामपि दुर्ल्लभाः ।
एतेषु समयेष्वेवं यः शिवां पूजयेच्छिवे ॥
स साक्षाद्भैरवो ज्ञेयो वरदानक्षमः शिवः ॥

Colophons of the different chapters :—

5A, इति श्रीत्रिकूटारहस्ये सूर्य्यग्रहणपटलः समाप्तः; 8B, ०चन्द्रग्रहण-पटलः, 11A, ०भूकम्पपटलः समाप्तः ;

The second batch of nine leaves contains two chapters of which the colophons run :—

5A, इति श्रीरुद्रयामले तन्त्रे त्रिकूटारहस्ये दशमः पटलः ;

9A, इति श्रीत्रिकूटारहस्ये एकादशः पटलः ।

5883.

10601. **रुद्रयामले भुवनेश्वरीरहस्यम् ।** *Bhuvanesvarī-rahasyam from Rudrayāmalatantra.*

Substance, country-made paper. 11 × 6½ inches. Folia, 90. Lines, 14 on a page. Extent in Ślokas, 3,000. Character, Nāgara. Appearance, old and discoloured. Complete.

This work, in 26 chapters, deals in detail with the worship and rituals of Bhuvaneśvarī.

Beginning :—

ॐ श्रीगणेशाय नमः । ॐ नमः श्रीमहात्रिपुरसुन्दर्य्यै ।
अथ श्रीभुवनेश्वरीरहस्यं लिख्यते ।
ॐ चिद्रूपं यद्रूपमूर्त्यं स्वरूपं रूपे रूप्यं योगिभिः सर्व्वसंस्थम् ।
श्रीपादपद्मोत्थपरागं मस्तकासमोनक्षदर्शचित्रम् ॥

ॐ श्रीशैलराजशिखरे नानाद्रुमलताकुले

....समासीनमुमापतिं ॥

एकदा देवमीशानं शशिशेखरमीश्वरं ।

... ...

उत्थाय विनता भूत्वा पर्य्यपृच्छत पार्व्वती ॥

श्रीपार्व्वत्युवाच ।

... ...

महेश श्रोतुमिच्छामि भुवनेशीरहस्यकम् ॥

श्रीभैरव उवाच ।

... ...

एकाक्षरी या देवेशी भुवनेशी महेश्वरी ।
हृदि लेखेव भार्त्ति प्राणशक्तिरियं परा ॥
हृल्लेखा कथ्यते तस्मात् मायानुचित्तवैभवात् ।
अनया रक्षिताः सर्व्वे निर्व्वीजा मन्त्रराशयः ॥
अतस्तु सर्व्वमन्त्राणामियमुद्दीपिनी मता ।
ऊर्द्ध्वावस्थिता भूत्वा नमेकाक्षररूपिणीम् ॥
कथयामि महादेवीं भुवनेशीं महेश्वरि ।
मायाबीजं नाममध्ये नमो मन्त्रान्तके वदेत् ॥
एकाक्षरीयं विश्रि(श्रु)ता भुवने भुवनेश्वरी ।
अनया सदृशी विद्या नास्त्यस्या ज्ञानसाधने ॥

Colophons of the different chapters :—

2A, इति श्रीभुवनेश्वरीरहस्ये एकाक्षरीप्रकाशो नाम प्रथमः पटलः; 3A, °चतुर्दशाकथनं नाम द्वितीयः पटलः; 4B, °एकाक्षर्य्यादिबीजशास्त्रो-प्रकटनविधिर्नाम तृतीयः पटलः; 5A, °तत्त्वविद्याप्रकाशको नाम चतुर्थः पटलः; 7B, °पूजाविधिर्नाम पञ्चमः पटलः; 67B, °नित्यपूजाविधिर्नाम षष्ठः पटलः; 69B, °कवचकथनं नाम सप्तमः पटलः; 74A, °मन्त्रनामशतपटलोऽष्टमः; 74B, °तत्त्वविद्यास्तोत्राख्यः पटलो नवमः; 75A, उत्कीलनादिकथनपटलो

दशमः; 75B, ईश्वरमन्त्रप्रकाशनपटल एकादशः; 76A, ०दीक्षाविधिपटलो द्वादशः; 77B, ०पुरश्चरणविधिपटलस्त्रयोदशः; 78B, ०होमविधिपटलश्चतुर्दशः; 79B, ०चक्रपूजाविधिपटलः पञ्चदशः; 80A, ०आचारविधिपटलः षोडशः; 81A, ०सूर्यग्रहणपूजाविधिपटलः सप्तदशः; 82A, ०चन्द्रग्रहणपूजाविधिपटलो-ऽष्टादशः; 82B, ०भूकम्पपूजाविधिपटल एकोनविंशः; 84A, ०नवरात्रिदिनार्चा-विधिपटलो विंशः; 84B, ०कन्यासंक्रान्तिपूजाविधिपटल एकविंशः; 85B, ०शालिपूजापटलो द्वाविंशः; 86A, ०नवकुमारीपूजाविधिपटलस्त्रयोविंशः; 87B, ०प्रयोगविधिपटलश्चतुर्विंशः; 88B, ०घटार्गलयन्त्रविधिपटलः पञ्चविंशः; 90A, ०दशम्यर्चनविधिपटलः षड्विंशः। इति श्रीरुद्रयामले तन्त्रे श्रीदेवीभैरवसंवादे श्रीभुवनेश्वरीकल्पे संपूर्णं समाप्तम्॥

5884.

10605. **रुद्रयामले कालीपंचवाणम्।** *Kālīpañcavāṇam from the Rudrayāmala.*

Substance, country-made paper. 6 × 4½ inches. Folia, 6. Lines, 7 on a page. Extent in ślokas, 45. Character, modern Nāgarī. Appearance, fresh. Complete.

The work deals with the six black rites of the Tantra, described as so many arrows.

Beginning :—

श्रीगणेशाय नमः॥

पार्वती उवाच।

देवाधिदेव देवेश महाकाल नमोऽस्तु ते।
इदानीं श्रोतुमिच्छामि कालीवाणस्य लक्षणम्॥

... ...

श्रीमहादेव उवाच।

अथ वक्ष्ये वाणविद्यां कालिकायाः सुदुर्लभं॥ ३॥
यस्य विज्ञानमात्रेण कर्ता हर्ता सदाशिवः।
कामस्थं वह्निसंस्थं रतिबिन्दुसमन्वितम्॥ ४॥

कूर्चद्वयं तथा लज्जां युगलं तदनन्तरम् ।
दक्षिणे कालिके चेति मध्ये वाणानि योजयेत् ॥ ५ ॥
मन्त्रः क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके अमुकवाण
क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा etc. etc.

Colophon :—

इति श्रीरुद्रयामले तन्त्रे चिंतामणिप्रयोगे ईश्वरपार्वतीसंवादे कालीपंचवाणपंचकं साधनं समाप्तम् ।

Post Colophon :—

शुभमस्तु संवत् १९१६ मीती माघसु ८ बुधवार लिखितं आत्मभवानीरामजोसि पोथि कालिपंचवाणकी लिखि ॥

5885.

6083. **रुद्रयामले नवदुर्गापूजारहस्यम् ।** *Navadurgāpūjā-rahasyam from the Rudrayāmala.*

Substance, country-made paper. 7 × 4½ inches. Folia, 30. Lines, 9 on a page. Extent in ślokas, 300. Character, modern Kashmiri. Appearance, fresh. Complete in 11 chapters.

The work consists of 11 Paṭalas—the first two are introductory, and the remaining nine are devoted to the details of worship of the nine forms of Durgā.

Beginning :—

ॐ श्रीगुरवे शिवाय ॐ नमः ।
श्रीगणपतये नमः ।
ॐ देवदेवं महादेवमीशानं शूलधारिणम् ।
प्रसन्नवदनं दृष्ट्वा प्रणम्योत्थाय पार्वती ।
कृताञ्जलिपुटा देवी विनयानतमस्तका ।
स्मितपूर्वं वचो दीनं जगाद परमेश्वरम् ।

श्रीदेव्युवाच ।

भगवन् परमेशान शरणागतवत्सल ।
त्वत्प्रसादान्मया सर्व्वं श्रुतं डामरमुत्तमम् ॥
तन्त्राणां सारमाद्यं तं यामलादिषु विस्तरम् ।
इदानीं भगवन् श्रोतुमिच्छामि त्वन्निवेदितम् ॥
नवदुर्गार्च्चनं दिव्यं सर्व्वतन्त्रेषु गोपितम् ।
सर्व्वकामप्रदं काम्यं साधकानां शुभावहम् ॥

श्रीभैरवः ।

एतद् गुह्यतमं देवि न कस्य कथितं मया ।
पूजां समयदीक्षायाः कोटिपूजा-फलप्रदाम् ॥
गुह्याद् गुह्यतमं गोप्यं ज्ञानं तद्रूपकात्मकम् ।
इदानीं तव भक्त्याहं कथयामि सुविस्तरम् ॥

... ...

... ...

सन्ति नानाविधैर्मन्त्रैरागमोक्तैः सबीजकैः ।
तन्त्राणि विविधान्यत्र सहितानि महेश्वरि ॥
ते मन्त्रा निष्फला जाताः कलौ वीर्य्यविवर्ज्जिताः ।
स्त्रीशूद्रैश्छलिताद् दस्याद् भ्रमान्तःशुद्धिकारणात् ॥
चञ्चलात्मत्सराद् दम्भात् पैशुन्याद्धनलोलुपात् ।
न सिध्यन्ति वरारोहे सर्व्वे निष्फलतां गताः ॥
सर्व्वागमानां शास्त्राणां प्रतिज्ञासिद्धिमेव च ।
प्रमादेनैव तद् दृष्टं गुरुभक्तिं विना तथा ॥
तन्मध्ये सारभूतं तु प्रत्यक्षफलदायकम् ।
रुद्रयामलतन्त्रस्य चतुःषष्ट्यात्मकं परम् ॥
नानाविधैः शुभैर्मन्त्रैर्युतं समयपूजनैः ।
विना समयदीक्षाद्यैः मन्त्रैर्दीक्षापि निष्फला ॥
समयो हि शिवे ब्रह्मा समयो विष्णुरेव हि ।
समयः शिव एव स्यात् समयो भैरवेव च ॥

न सिध्यन्ति सदा देवि नित्यपूजाजपादयः ।
यथा होमादयो देवि विना समयपूजया ॥
काले संपूजयेद्विष्णुं काले संपूजयेच्छिवम् ।
समये पूजयेच्छक्तिं समयोऽपीष्टदेवता ॥
कालः सृजति भूतानि कालो रक्षति नित्यशः ।
कालः संहरते चान्ते कालो हि दुरतिक्रमः ॥
षष्टिकल्पसहस्राणि ये कुर्वन्ति महेश्वरीम् ।
समये क्षणमात्रेऽपि पूजया तत् फलं लभेत् ॥

श्रीदेवी ।

समयः कीदृशो देवः पूजा कीदृग्विधा प्रभो ।
एतद्विस्तरतो देव वक्तुमर्हसि शङ्कर ॥

श्रीभैरवः ।

अष्टोत्तरशतप्रख्याः समयाः सन्ति पार्व्वति ।
तेषु यः पूजयेद्देवीं इष्टदेवीं च साधकः ॥
तस्य देवि भवेद्दुर्गा यथाभीष्टफलप्रदा ।
समयार्च्चनमेतत्ते वक्ष्यामि शृणु पार्व्वति ॥
यस्य कस्य न वक्तव्यं श्रुत्वा गोप्यतमं कुरु ।
चैत्रे मासि सिते पक्षे दिनानि नव पार्व्वति ॥
नवदुर्गार्च्चनं कुर्य्यात् साधकोऽभीष्टसिद्धये ।
तथैवमासि देवेशि सितपक्षादिवासरे ॥
नवम्यन्तां चरेत् पूजां विधिं विधिवदीश्वरि ।
सर्व्वेषु समयेष्वेतौ समयौ देवदुर्लभौ ॥
तत्र यः कुरुते पूजां पठेत् स्तोत्राण्यनेकशः ।
चरेद्धोमं यथाशक्त्या स साक्षाद्भैरवोत्तमः ॥

श्रीदेवी ।

भगवन् श्रोतुमिच्छामि नवदुर्गार्च्चनं परम् ।
तत्परं ब्रूहि मे देव यद्यस्ति मयि ते दया ॥

श्रीभैरव उवाच।

अथ देवि प्रवक्ष्यामि नवदुर्गार्चनं परम्।
ब्रह्मयामलतन्त्रेऽस्मिन् भाषितं साधकप्रिये॥
तद्वक्ष्यामि महादेवि पूजासारमनुत्तमम्।
यन्न दृष्टं पराज्ञानैः कुपथभ्रान्तदृष्टिभिः॥
यन्न शाक्तैर्न योगैर्वा न च वै पाशुपातकैः।
स्वभाववादिभिर्वापि न च कर्म्मप्रवादिभिः॥
नापि संशयवादैश्च नमार्गप्रवादिभिः।
न भूतवादिभिश्चैव नापि वा लौकिकैस्तथा॥
न चार्वाकिकैर्वापि नापि तर्कप्रवादिभिः।
न च नैयायिकैर्वापि षट्पदार्थपरायणैः॥
वेदान्तवादिभिर्वापि न चाप्येकत्ववादिभिः।
इदं पूजादिकं सारं दुर्गाया नवरात्रिकम्॥
अज्ञानतिमिरान्धानामुन्मीलनमहोत्तमम्।
संसारपङ्कमग्नानां लोकोत्तारणं परम्॥
... ...
.. ..

The nine forms of Durgā are indicated :-

6A, ॐ आदौ श्रीशैलपुत्रीति ततः स्याद्ब्रह्मचारिणी।
चन्द्रघण्टा च कूष्माण्डी स्कन्दमाता च पञ्चमी॥
कात्यायनी कालरात्रिर्महागौरी तथाष्टमी।
देवदूती च नवमी नवदुर्गा प्रकीर्तिताः॥

End :—

इति श्रीनवदुर्गायाः पूजापद्धतिमीश्वरि।
गोपनीयं महादेवि गोपयेन्निजयोनिवत्॥

Colophons of the different chapters :—

6A, इति श्रीदुर्गाकल्पपूजायां प्रथमः पटलः: 7B, इति श्रीदुर्गाकल्पे द्वितीयः पटलः; 17A, इति श्रीब्रह्मयामले तन्त्रे समस्तपूजाकल्पे नवदुर्गापूजा-

संग्रहे शैलपुत्रीपूजाविधिर्नाम तृतीयः पटलः; 18B, ब्रह्मचारिणीपूजाविधिर्नाम चतुर्थः पटलः; 20A, इति श्रीचन्द्रघण्टापूजाविधिर्नाम पञ्चमः पटलः; 21B, इति कुष्माण्डीविधिः षष्ठः पटलः; 23A, इति श्रीस्कन्दमातृपूजाविधिः सप्तमः पटलः; 24A, इति श्रीकात्यायनीपूजाविधिरष्टमः पटलः; 25B, इति श्रीकालरात्रिपूजाविधिर्नवमः पटलः; 27A, इति श्रीमहागौरीपूजाविधिर्नाम दशमः पटलः; (last colophon) इति श्रीरुद्रयामले तन्त्रे नवदुर्गापूजारहस्ये देवदूतीपूजाविधिर्नाम एकादशः पटलः।

5886.

2364. रुद्रयामले रामनामलिखनविधिः। *Rāmanāma-likhanavidhiḥ from the Rudrayāmala.*

Substance, foolscap paper. 10 × 3¾ inches. **Folia,** [illegible]. **Lines,** 7 on a page. **Extent in** ślokas, 50. Character, Nāgara. Date, **Saṃvat** 1932. **Appearance,** fresh. Complete.

For a description of the present MS see L. X. 4217.

The essence of the book is summed up in the following lines:—

2A, राममन्त्रं लिखेद्विद्वान्सुगन्धेन भक्तितः।
भूर्जपत्रे तालपत्रे शाकपत्रे तथैव च ॥
नामसहस्रं नामशतं लिखेदनुदिनं सुधीः।
मासमेकं शुद्धचेता यावल्लक्षं समाप्यते ॥
... ...
... ...
एवं मन्त्रं लिखेद्यस्तु सत्यसंधो जितेन्द्रियः।
तस्य सिद्धो भवेन्मन्त्रः सर्वकामफलप्रदः ॥
शुद्धोदकेन संलिख्य कज्जलं घृतदीपजम्।
पत्रं धातुमयं प्रोक्तं लेखनी काञ्चना प्रिये ॥

3B, मृत्तिकायां निखेलद्यं साधको विधिपूर्वकम् ।

सकामो वाञ्छितं लब्ध्वा भुक्ता भोगान् मनोरमान् ॥

जातिस्मरत्वं कृत्वा याति विष्णोः परं पदम् ॥

Colophon :—

इति श्रीरुद्रयामले रामचरितमानसविधिप्रकाशपटलं समाप्तम् ।

श्रीरामचन्द्रार्पणमस्तु ॥

Post Colophon :—

संवत् १८६२

5887.

5014. **रुद्रयामले अयोध्यामाहात्म्यम् ।** *Ayodhyā-māhātmyam from the Rudrayāmala.*

Substance, country-made paper. 10 × 5¾ inches. Folia, 69. Lines, 7 on a page. Extent in ślokas, 500. Character, Nāgara. Date, Saṃvat 1910. Appearance, discoloured. Complete.

The work contains 10 chapters. It refers to and describes the greatness of Ayodhyā proper and various other Tīrthas included within it.

Beginning :—

श्रीरामचन्द्राय नमः ।

वन्देऽहं रामचन्द्रस्य पादौ प्रणतरक्षकौ

सीतायाश्च पुनः पादौ सर्वसिद्धिविधायकौ ॥ १ ॥

... ...

... ...

श्रीपार्वत्युवाच ।

श्रु[त]ाः श्रुता महाभाग नानातीर्थकथाः शुभाः ।

साम्प्रतं श्रोतुमिच्छामि तद्रहस्यं सनातनम् ॥ ४ ॥

अयोध्याया महापुर्य्या महिमानं गुणोज्ज्वलम् ।
कीदृशी सा सदामेध्यायोध्या विष्णुप्रिया पुरी ॥ ५ ॥
आद्या सङ्गीयते वेदैः पुरीणां मुक्तिदायिका ।
संस्थानं कीदृशं तस्याः तस्यां के च महीभुजः ॥ ६ ॥
कानि तीर्थानि पुण्यानि माहात्म्यं तेषु कीदृशम् ।
अयोध्यासेवनान्नृणां फलं स्याद्वद कीदृशम् ॥ ७ ॥

End :—

मतिविपुलनिदानैर्वर्णितं धर्म्ममाद्यं
कलयति परमभक्त्या लोकमाहात्म्यमेतत् ।
य इह नर उदारः श्रीसनाथः स सद्यः
व्रजति हरिनिवासं सर्व्वभोगांश्च भुक्त्वा ॥ २९ ॥

Colophon :—

इति श्रीरुद्रयामले उमागौरीसम्वादे श्रीमदयोध्यामाहात्म्ये दशमोऽध्यायः ।

Post Colophon :—

शुभमस्तु सम्वत् १९१० मिति ज्येष्ठ शुक्ल ४ ।

5888.

5570. रुद्रयामले सूर्य्यपटलः । *Sūryapaṭalaḥ from the Rudrayāmala.*

Substance, country-made yellow paper. $10\frac{1}{4} \times 4\frac{1}{4}$ inches. Folia, 22. Lines, 9 on a page. Extent in ślokas, 400. Character, Nāgara. Appearance, fresh. Complete.

This relates to the worship of the Sun-god according to the Kaula form, the first chapter in it dealing with the *mantra* of the deity and the rules for its use, the second chapter, in prose, laying down the rules of worship (*paddhati*).

Beginning :—

श्रीगणेशाय नमः ... ...

श्रीभैरव उवाच ।

श्रीशैलशिखरासीनभैरवीपतिमीश्वरम् ।

भैरवं चन्द्रमुकुटं गणगन्धर्व्वसेवितम् ॥

पन्नगाभरणोपेतं जटामुकुटमण्डितं ।

... ...

.. ..

.. .. दृष्ट्वा प्रोवाच भैरवी ॥

श्रीदेव्युवाच ।

... ...

.. ..

पुरा पृष्टोऽसि भगवन् मया त्वं भक्तिपूर्व्वकम् ।

अद्य तद्वद तत्त्वं मे यद्यहं तव वल्लभा ॥

... ...

... ... कौलिकानां हितेच्छया ॥

यद् गोप्यं सर्व्वशास्त्रेषु पञ्चाङ्गं पूर्व्वसूचितम् ।

(श्री)देवदेवस्य सूर्य्यस्य सर्व्वतत्त्वतमोत्तमम् ॥

End :—

इत्येषा नित्यपूजाया पद्धतिर्धर्म्मरूपिणी ।

तव स्नेहेन निर्णीता मान्येयं कौलिकै[ः] प्रिये ॥

Colophons :—

7A, इति श्रीरुद्रयामले ईश्वरपार्वतीसंवादे देवीरहस्ये तन्त्रे श्रीसूर्य्यपटलाख्यानं नामैकविंशः पटलः समाप्तम् ।

22A, इति श्रीरुद्रयामले देवीरहस्ये श्रीसूर्य्यपूजापद्धतिवर्णनं नाम द्वाविंशः पटलः समाप्तः ।

5889.

2154. **रुद्रयामलोक्तनवग्रहसिद्धयन्त्रपूजाविस्तारः ।** *Navagrahasiddhayantrapūjāvistāraḥ from Rudrayāmala.*

Substance, country-made paper. 8¾ x 3½ inches. Folia, 2. Lines, 12-14 on a page. Extent in ślokas, 40. Character, Nāgara. Appearance, discoloured. Complete.

It gives directions for drawing and worshipping the *Yantra* or symbolic diagram, an illustration of which is given on Fol. 2A.

***Beginning* :—**

कदाचिद्वनवासीनां पाण्डवानां सुप्रेक्षके ।
आगतः कृष्णनाथश्च दृष्ट्वा पूजाकृतं विधिम् ।
संतुष्टः कृष्णनाथं च पप्रच्छ पाण्डुनन्दनः ।
युधिष्ठिर उवाच ।
देवदेव जगन्नाथ उपायं ब्रूहि तत्त्वतः ।
येन संप्राप्यमाणेन साम्राज्यं सौख्यदं सदा ।

Colophon :—

इति श्रीरुद्रयामलोक्त-नवग्रहसिद्धयन्त्रपूजाविस्तारः समाप्तः ।

For a *Navagrahamantroddhāra* from the *Mahābhārata* cf. 5838 above.

5890.

2147. **रुद्रयामले मङ्गलविधिः ।** *Maṅgalavidhiḥ from the Rudrayāmala.*

Substance, country-made paper. 7 x 4½ inches. Folia, 10. Lines, 5 on a page. Extent in ślokas, 100. Character, Nāgara. Appearance, fresh. Complete.

The work deals with Tāntrika worship of the planet Mars.

Beginning :—

अथ मङ्गलव्रतविधानमस्वमभिधीयते । ब्राह्मे मुहूर्त्ते उत्थाय प्रातःकृत्यं कृत्वा शौचादिकं विधाय अमलोदके अपामार्गकाष्ठेन दन्तधावनं कृत्वा नद्यादौ गत्वा ... ... रक्तवस्त्रोत्तरीयं धृत्वा ... ...रक्तचन्दनरक्तपुष्पैः ताम्रपात्रस्थिततोयेन अङ्गारकगायत्रीपठनात् श्रोत्रफलं भौमाय अर्घं दत्त्वा गृहमागत्य वितस्तिमात्रं गृहाङ्गो-गोमयमृत्राभ्यां विलिप्य तदुपरि रक्तचन्दनेन मण्डलं विधाय तत्र गोधूमान् संस्थाप्य उपरि ताम्रकलशं वा मृन्मयं वा संस्थाप्य जलेनापूर्य ... ... तदुपरि भौमस्य त्रिकोणमेकविंशति-त्रिकोणांकितमेकविंशति भौमनामसंयुतं संस्थाप्य तत्पुरतः स्वयं रक्तासने उपविष्टः ... ... मङ्गलव्रतमहं करिष्ये ।

End :—

रक्ताङ्गो रक्तगात्रश्च भगाभीष्टप्रदायिने ।
माहेयोऽपि इदं प्रोक्तं देवदेवेन सिद्धिदं ।

Colophon :—

इति ब्रह्मयामले मङ्गलविधिः समाप्तः ।

5891.

10040. कृष्णयामले त्रिभङ्गचरित्रम् । *Tribhaṅgacaritram from the Kṛṣṇayāmala.*

Substance, country-made paper. 11 × 4½ inches. Folia, 4. Lines, 8 on a page. Extent in ślokas, 112. Character, modern Nāgara. Date, Saṃvat 1952. Appearance, fresh. Complete.

A *Kṛṣṇayāmala* is noticed in Bik. 1284 and HPR 1. 78. MSS of *Śeṣadevaśatanāmastotra* and *Caitanyakalpa*, said to be taken from the Kṛṣṇayāmala, are found in the old collection of the Asiatic Society of Bengal.

The work deals with the Tribhaṅga (three-bended) form of Kṛṣṇa.

Beginning :—

यदि ह्यावर्त्तां भेदे न त्वां वक्ष्यामि मा वद ।
ततो दिव्ये मणिमये स्थाने देवी सरस्वती ॥
आविरासान्तफलाकारा सा शतपर्व्विणी ।
सर्व्वरत्नमयी वृन्दावने सत्परिपालितं ।
व्रजराजस्य महिषी रागयन्ती दिशाश्चिता ॥
2B. वंशीमाहात्म्यमेतन्मे पठिष्यन्ति दिशालयः ।
श्रोष्यन्ति च भविष्यन्ति द्रुतं द्रुतकल्मषाः ॥
इदानीं श्रोतुमिच्छामि त्रिभङ्गत्वं कथं तव ।
तत्त्वं कथय गोविन्द चिदाद्यानन्दसन्ततं ॥

... ...

कृष्ण उवाच ।

शृणु ते कथयिष्यामि वलनाम कथां मम ।
त्रिभङ्गत्वं कामिनीनां मनोनियमनक्षमम् ॥
महानन्दाभिधां वंशीं कराभ्यां परिगृह्य वै ।
प्रहसद्वदनो लीलारसचञ्चलमानसः ॥
अगाम पावकैशीपमूलमानन्दनिर्भरः ।
यस्मिन् दिव्ये तरोर्मूले मणिबद्धे महाप्रभे ॥

... ...

... ...

3A. ततो मे सुगभीरस्य बभूव मानसं मनः ।
ततः शृङ्गारनामायं रसः प्रादुर्बभूव ह ॥
श्यामवर्णः सुखमयः सर्व्वलोकैकमोहनः ।
रसादानन्द आनन्दादनुभावो बभूव ह ॥
आत्मना रन्तुमिच्छामि नारी भूत्वा पृथग्वपुः ।
इति सञ्चिन्त्यमानस्तु मनसा च सतां मतं ॥
स्वयमेव द्विधा भूत्वा परमानन्दरूपिणी ।
रसस्वरूपिणी चाहं स्वयंकृता विनिर्मिता ॥

... ...

... ...

4A, पश्यन्तश्चां वरारोहां लज्जयाधोमुखा द्रुतम् ।

तत्प्रेमपाशसंबद्धचित्तस्य चरणद्वयम् ॥

मणिनूपुरयुग्मेन छद्मनाबद्धवद् बभौ ।

ततो मम पदाम्भोजाद्गतकाद्या महीगतः ॥

तुष्टुवुः प्रेमवचसा प्रश्रयाविष्टचेतसा ।

हे नाथ चरणं तेषां चरणार्थं दर्शय प्रभो ॥

तच्छ्रुत्वा वचनं तेषां तुष्टेन स्वयमेव हि ।

भगवच्छ्रीपदाम्भोजलक्षणं दर्शितं परम् ॥

तिर्यञ्च् विद्युदाराश्च सद्विद्युद्विवार्चितं ।

चकार्यं राम सततं यतोऽहं भक्तवत्सलः ॥

... ...

एतान्येव कारणानि त्रिभङ्गत्वं गतस्य मे ।

नित्यं सत्यं चिद्घनमानन्दरसविग्रहम् ॥

रूपमेतद् सदा ध्यायन् महाविष्णुमपचरेत् ।

मद्दीपेदं हृदि ध्यात्वा वरिष्ठपातकात् विभो ॥

यतोवीदं चिद्घनं ध्यात्वा सिद्धिमितो गतः ।

एतत्त्रिभङ्गरसविग्रहमाविभूतं

भूतेशविष्णुविधिचिन्मविचिन्त + + ।

ध्यात्वा त्रिभङ्गचरितं परितः शृणोति

स्वस्थ्य स्ववरसिन्धे सततं वसामि ॥

Colophon :—

इति ते सर्वोत्ख्यातं त्रिभङ्गचरितं मम ।

Post Colophon Statement (in a later hand):—

संवत् १८५२ कु० श० १ बुधवो श्रीवृन्दावनमध्ये मे से लिखायो श्रीराधामोहन गोस्वामी रामनाथ चार्यो पो ५० श्रीश्रीराधाचरणजी की सभाले ५।५।६० बाल गणेशराम ।

5892.

6392. ब्रह्मयामलम् । *Brahmayāmalam.*

Substance, country-made paper. 9 × 3½ inches. Folia, 1-58 (bound in **wrong order) of which Fol. 52 is** missing. Lines 10 on a page. **Extent in ślokas, 1,000. Character, Nāgara.** Appearance, old and soiled. Incomplete.

The topics dealt with herein relate to divination by means of various diagrams, illustrations of which are given. Some of the colophons give the title as Brahmayāmala while others simply write yāmala.

Beginning :—

मोहान्धकारमग्नानां जनानां ज्ञानरश्मिभिः
कृतमुद्धरणं येन तं नमामि शिवभास्करम् ॥
अथातः संप्रवक्ष्यामि प्रोक्तां वै ब्रह्मयामले
मात्रादिभेदभिन्नानां स्वराणां षोडशोदयः ॥
मातृकायां पुरा प्रोक्ताः स्वराः षोडशसंख्यया ।
तेषां द्वावन्तिमौ त्याज्यौ चत्वारश्च नपुंसकाः ॥
शेषा दशस्वर स्तेषु स्यादेकैको द्विके द्विके ।
शेषा यतोऽक्षराद्यास्ते स्वराः पञ्च स्वरोदये ॥
लाभालाभौ सुखं दुःखं जीवितं मरणं तथा ।
जयं पराजयं चैव सर्वं ज्ञेयं स्वरोदये ॥
स्वरादिमातृकोद्धारो मातृकायां जगत्त्रयम् ।
तस्मात् स्वरोदयं सर्वं त्रैलोक्यं सचराचरम् ॥

Colophons of the different chapters :—

2A, इति यामले मात्रास्वरचक्रम्; 2B, ॰वर्णस्वरचक्रम्; 3A, इति जीवस्वरचक्रम्; **3B,** इति राशिस्वरचक्रम्; इति भेदस्वरचक्रम्; **4A,** इति यामले द्वादशवर्षिकचक्रम्; 4B, ॰ऋतुस्वरचक्रम्; 5A, ॰पक्षस्वर-चक्रम्; इति तिथिस्वरचक्रम्; 7A, इति ब्रह्मयामले तिथिवारनक्षत्र-[चक्रम्]; **8A,** इति यामले दिनास्वरचक्रम्; 8B, इति तात्कालिकस्वरचक्रे

प्रश्नभेदः; 9B, इति तात्कालिकस्वरचक्रे जातस्य शुभाशुभः; 10A, इति यामले स्वरप्रकारनिर्णयः; 11A, इति ब्रह्मयामले दिक्पलस्वरचक्रम्; 19A, ०षट्क-सर्वतोभद्रचक्रम्; 20B, ०अंशकचक्रम्; 22A, ०कूर्मचक्रम्; 23B, ०सिंहासन-चक्रम्; 29A, इति हृदयादियोगषट्कम्; 29B, उदरादियोगषट्कम् (the space for the illustration is left blank); 28B, इति मुखादियोग-षट्कम् (30A has the space for illustration left blank); 30B, इति गुदादियोगषट्कम्; 31A, इति ब्रह्मयामले चक्राद्ययोगषट्कम्; 31B, इति कपालादियोगषट्कम्; 32A, इति दशाङ्गराहुकालानलचक्रम् (space for illustration left blank); 33A, इति ब्रह्मयामले राहुकालानल-चक्रम्; 33B, इति यामले सूर्यकालानलचक्रम्; 34A, इति चन्द्रकालानल-चक्रम्; 34B, इति यामले चन्द्रसमग्रलाकचक्रम्; 35A, इति समग्राकल-चक्रम्; 35B, इति यामले वर्गेन्दुचन्द्रचक्रम्; 36A, ०प्रथम मातृकास्वरचक्रम्; 36B, इति द्वितीयमातृकास्वरचक्रम्; इति तृतीयमा[तृ]कास्वरचक्रम्, 37A, इति यामले विजयचक्रम्; 38A, तोरणचक्रं समाप्तं; 38B, राशिसूर्यकालानल-चक्रम्; 39A, इति संघट्टकालानलचक्रम्; 39B, इति यामले गडकालानल-चक्रम्; 40A, ०कुलाकुलचक्रम्; 40B, ०कुम्भचक्रम्; 42B, ०तुम्बरचक्रम्; 43A, ०तुम्बरावर्तचक्रम्; 44B, ०वहि-लचक्रम्; 45A, ०लाङ्गलचक्रम्; 45A, [सर्पचक्रम्], 45B, इति वृषचक्रम्; 47B, इति यामले नाडीगत-दृष्टिचक्रम्; 48A, ०सूर्यफणिचक्रम्; चन्द्रफणिचक्रम्; 49A, इति कविचक्रम्; 50A, इति यामले खलचक्रम्; 54B, ब्रह्मयामले कोट्टचक्रम्; 56A, इति यामले अश्वचक्रम्; 56B, इति रथचक्रम्; 57A, इति यामले कूर्मचक्रम्; The MS ends abruptly in the middle of the next topic.

5893.

10335. जयद्रथयामलम् । *Jayadrathayāmalam.*

Substance, country-made paper. 9 × 3½ inches. Folia, 102. Lines 5 on a page. Extent in ślokas, 600. Character, Nāgara. Appearance, old and discoloured. Complete.

Jayadrathayāmala is said to be 24,000 ślokas in extent, divided into four ṣaṭkas or four parts of 6,000 ślokas each. The present MS contains the last ṣaṭka which principally deals with the worship of Vagalā, the eighth Mahāvidyā. For the first ṣaṭka cf. Nep., Vol. II. pp. 1–4, and for the last ṣaṭka, Nep., Vol. I. pp. 175–177.

Beginning :—

श्रीदेव्युवाच ।

देवाधिदेव भूतेश नित्यानन्दनिरञ्जन ।

निराकार गुणातीत सर्व्वज्ञ प्रभवेश्वर ॥ १ ॥

... ...

इदानीं श्रोतुमिच्छामि विद्याभेदं सुदुर्लभं ।

उत्पत्ति + + + देव तन्मे वद दयानिधे ॥

Colophons of the different chapters :—

5A, इति श्रीजयद्रथयामले उत्तरषट्के देव्युपनिषदि भैरवकुलागमे आनन्दभैरवस्तोत्रनि(स्तोत्रे) श्रीमहाविद्याभेदकथनं नाम प्रथमः पटलः ।

22B, ०महाविद्या उत्पत्तिकथनं नाम द्वितीयः पटलः ; 27B, ०उपासनादेय विधिर्नाम तृतीयः पटलः ; 36B, ०काम्यप्रयोगकथनं नाम चतुर्थः पटलः ; 58B, ०मन्त्रोद्धारपूर्व्वकं श्रीवगलामुखीसाधनं नाम पटलः ;

97A, ०प्रातःकृत्यादि उद्यानकल्पश्रीवगलामुखीनित्यायाः नवमयी-पूजापद्धतिकथनं नाम पटलः ॥ ६ ॥

103B, ०वगलामुखीकवचकथनं नाम पटलः ॥ ७ ॥

5894.

1926. **यामले कालपुरुषदानविधिः ।** *Kālapuruṣadāna-vidhiḥ from Yāmala.*

Substance, country-made paper. $8\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 5. Lines, 9 on a page. Extent in ślokas, 70. Character, Nāgara. Appearance, old and faded. Complete.

The work contains both the *vidhi* (Foll. 1–3A) and *paddhati* (Foll. 3A–5) of the function.

Beginning :—

अथ कालपुरुषदानं लिख्यते ।
अतः परं प्रवक्ष्यामि दानानामुत्तमोत्तमम् ।
कालमृत्युहरं साक्षादपमृत्योश्च का कथा ॥
आमाध्यास्थमहारोगमहाभयहरं तमम् ।
शत्रुवर्गक्षयकरं ग्रहदोषनिवर्हणम् ॥
तापत्रयहरं सद्यः सर्व्वोत्पातहरं शुभम् ॥
... ...
... ...
कालरूपमिति ख्यातं दानं दोषविनाशनम् ॥

The description of Kālapuruṣa, a human representation of Time clothed in black, is given as follows (Fol. 1B) :—

कालस्य पुरुषाकारं कृष्णवस्त्रेण कल्पयेत् ।
पादादिमस्तकान्तं च पञ्चारत्निप्रमाणतः ॥
त्रितालद्वयमानेन शिरोभागं प्रकल्पयेत् ।
अर्द्धांगुल्या कण्ठदेशमधोभागे भुजद्वयम् ॥
तदूर्द्धं हृदयस्थाने स्तनमण्डलमाचरेत् ।
अरत्निमात्रमुदरं मध्ये नाभिं प्रकल्पयेत् ॥
तदूर्द्धं कटिदेशं च जघनं वृषणादिकम् ।
अधोवितस्तिद्वितये ऊरू जानू च गुल्फकम् ॥
पादद्वयं प्रकुर्व्वीत अङ्गुल्यग्रसमन्वितम् ।
कर्णाक्षिनासिदीर्घांश्च तत्तद्देशे प्रकल्पयेत् ॥
तिलैश्च पूरयेदत्र तत्तदंशो विचक्षणः ।
पद्मासने समानीतं शिल्पकैः परिशोभयेत् ॥
ततः सौवर्णरजतताम्रैर्मुक्ताफलादिकैः ।
भूषणैर्भूषितं चैव स्थाने स्थाने विशेषतः ॥
सुवर्णनूपुरौ कुर्य्याद्वलयौ राजतेन तु ।
कटिसूत्रं राजतेन कांस्यघण्टासमन्वितम् ॥

हस्तद्वयं राजतेन सुवर्णेनाङ्गुलीयकम् ।
कटकं राजतेनैव सुवर्णं बाहुभूषणम् ॥
ग्रैवेयं पदकं चैव स्वर्णेन राजतेन वा ।
मुक्ताहारं कण्ठदेशे मध्ये रत्नसमन्वितम् ॥
कर्णद्वयं च ताम्रेण तथैव भ्रूयुगं च वै ।
चक्षुर्द्वयं राजतेन नासिकाग्रं सुवर्णतः ॥
मुक्तया सुदन्तपङ्क्तिं च ताम्रेणोष्ठद्वयं तथा ।
तिलकं राजतेनैव पट्टं स्वर्णविनिर्म्मितम् ॥
स्वर्णयज्ञोपवीतं च रक्तोष्णीषं च वेष्टयेत् ।
वामहस्ते कांस्यपात्रं खड्गं दक्षिणहस्तके ॥
मुक्ताप्रवालरत्नाद्यैः कर्णाभरणमाचरेत् ।

In leaf 3A the Vidhi ends and the Paddhati begins. The latter goes to the end of the MS.

Last Colophon.—

यामलोक्तकालपुरुषदानविधिः समाप्तः ।

The last colophon is followed by several verses about some Tāntrika rite.

5895.

3179. **महाशैवतन्त्रे आकाशभैरवकल्पम् ।** *Ākāśabhairava-kalpam from the Mahāśaivatantra.*

Substance, Serampore paper. 12¾ × 5¼ inches. Folia, 82. Lines, 9-12 on a page. Extent in ślokas, 2,000. Character, Bengali. Appearance, fresh. Complete.

Two Stotras from this work are mentioned in *Burnell* 198[b], 203[a]. MSS of an *Ākāśabhairavatantra* and a *Mahāśaivatantra* are also noticed there.

Beginning :---

श्रीगणेशाय नमः ॥ श्रीदक्षिणामूर्त्ते नमः ॥

गुरुं गणपतिं देवीं भैरवं शारभेश्वरम् ।

नमस्कृत्य प्रवक्ष्यामि धर्म्मशास्त्रं विभूतये ॥

साङ्गं सलक्षणं वेदसारभूतमभीष्टदम् ।

ज्ञानदं जीवजन्तूनां साधकानां सुखावहम् ॥

श्रीदेव्युवाच ।

श्रीशिवेशाम्बदेवेश श्रीनाथ जगतां पते ।

श्रीगलागलचिह्न श्रीपते भवते नमः ॥

अन्यथा शरणं नास्ति शरणं त्वं महेश्वर ।

यद्गुह्यं परमं लोके यं शास्त्रमखिलप्रदम् ॥

गर्ह्रितं साधकेन्द्राणां तद्वदस्व दयानिधे ।

श्रीश्वरोवाच ।

श्रीमत्परमसौभाग्यमन्त्रयन्त्रं गतात्मनां ।

गयाशामुपदेशानामतिगुह्यतमं परम् ॥

महामन्त्रक्रियाशास्त्रं महासिद्धिप्रदायकम् ।

सर्व्वदोषप्रशमनं पावकं लोकजीवनम् ॥

धर्मार्थकाममोक्षाणां फलदानप्रदं हितम् ।

सर्व्वज्ञानप्रदं ब्रह्मज्ञानदं सर्व्वसिद्धिदम् ॥

तादृशं कल्पमागोप्यं सर्व्ववेदाङ्गमात्मकम् ।

शीघ्रसिद्धिप्रदं श्रेष्ठं श्रृणु सर्व्वमयेम्बिके ॥

वक्ष्यमाणं महाशास्त्रं शृण्वतां पठतामपि ।

तथालोकय तां पुंसां (य)[व]नितानां विशेषतः ॥

क्षिप्रसिद्धिप्रदं दिव्यं कथयामि जगन्मयम् ।

2A, सहसा तस्य सौभाग्यं वस्तु ज्ञा+शुभूतिकम् ॥

ब्रह्ममन्त्रः समुत्थाय प्रभाते दैशिकं स्मरेत् ।

वक्ष्यमाणेन मन्त्रेण सान्ध्यं कर्म्म समाप्य तः ।

यथा तथा पुरापुत्रानेकान्ते भवने शुभे ॥

यथाविधि समाभूतोथाविंश्लेटचरे स्थितः ।
अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिता ॥

... ...

... ...

आराधनोपयोगानि संपाद्य तदनन्तरम् ।
ब्रह्मरन्ध्रे जगन्नाथं ब्रह्मानन्दमयं विभुम् ॥
परम्पराक्रमेणैव गन्धपुष्पाक्षतादिभिः ।
चिरं ध्यात्वा ततो देवि भूतशुद्धिं यथाविधि ॥
ऋषिन्यासादिकं कुर्यात् प्रसन्नात्मा यथाविधि ।
सर्वकार्यार्थसिद्धौ च सर्वविघ्ननिवृत्तये ॥
पश्चाद्दैरेकविंशेन यजेद्वैनायकं पुरा ॥

Colophons of the different chapters :—

2B, इति श्रीमहाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते उत्पादप्रक्रमो नाम प्रथमोऽध्यायः; 3B. इति महाशैवतन्त्रे अतिरहस्ये पक्षिराजकल्पे उत्पादनागपरिग्रहणविधिर्नाम द्वितीयोऽध्यायः; 4B, इति श्रीमहाशैवतन्त्रे अतिरहस्ये उत्पादभैरवयजनविधिर्नाम तृतीयोऽध्यायः; 6A, इति श्रीमहाशैवतन्त्रे अतिरहस्ये उत्पाताभिषेकविधानं नाम चतुर्थोऽध्यायः; 7B. ०आकाशभैरवकल्पे मन्त्रयन्त्रं नाम पञ्चमोऽध्यायः, 8B, इति श्रीशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे चित्रमालाविधिर्नाम षष्ठोऽध्यायः; 9A. इति श्रीमहाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे वश्याकर्षणप्रयोगो नाम सप्तमोऽध्यायः; 9B, ०रहस्ये मोहनद्रवकप्रयोगो नाम अष्टमोऽध्यायः; 10A, इति श्रीशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे स्तम्भन-विद्वेषणप्रयोगो नाम नवमोऽध्यायः; 10B, इति श्रीमहाशैवतन्त्रे अतिरहस्ये उच्चाटननिग्रहप्रयोगो नाम दशमोऽध्यायः; 11A, इति श्रीमहाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते भोगमोक्षप्रकरणं नाम एकादशोऽध्यायः । इति प्रथमकल्पः समाप्तः ॥

12B, इति ०मङ्गर्षेण निरूपिते आशुगरुडविद्या नाम द्वादशोऽध्यायः; 14A, इति श्रीमहाशैवतन्त्रे अतिरहस्ये आशुगरुडप्रयोगो नाम त्रयोदशोऽध्यायः; 15B, इति श्रीमहाशैवतन्त्रे अतिरहस्ये आशुगरुडकर्णविधिर्नाम चतुर्दशोऽध्यायः; 16B, ०आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे विषाभावविधिभेदो नाम पञ्चदशोऽध्यायः; द्वितीयः कल्पः समाप्तः ॥

19A, इति श्रीमहाशैवतन्त्रे अ... आकाशभैरवकल्पे शरभसालुवपक्षिराजकल्पे मन्त्रोद्धारविधिर्नाम षोडशोऽध्यायः; 22A, इति श्रीमहाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे शरभसालुवपक्षिराजस्तोत्रं नाम सप्तदशोऽध्यायः; 25A, इति श्रीशैवतन्त्रे अतिरहस्ये प्रयोगभेदो नाम अष्टादशोऽध्यायः; 26A, इति श्रीपक्षिराजकल्पे निग्रहानुग्रहविवेको नाम एकोनविंशोऽध्यायः; 27B, इति श्रीमहाशैवतन्त्रे होमविधिर्नाम विंशोऽध्यायः; 30A, इति श्रीमहाशैवतन्त्रे प्रत्यक्षसिद्धिप्रदे पक्षिराजकल्पे निग्रहविधिर्नाम एकविंशोऽध्यायः; 33A, इति श्रीमहाशैवतन्त्रे अतिरहस्ये आकाशभैरवे कल्पे रक्षाभिषेको नाम द्वाविंशोऽध्यायः; 36B, इति श्रीमहाशैवतन्त्रे पक्षिराजकल्पे क्षुद्रविधिर्नाम त्रयोविंशोऽध्यायः; 40B, इति श्रीमहाशैवतन्त्रे अतिरहस्ये आकाशपुरसर्वसिद्धिर्नाम चतुर्विंशोऽध्यायः; 42B, इति श्रीमहाशैवतन्त्रे शरभावाहनविधिर्नाम पञ्चविंशोऽध्यायः; 47A, इति श्रीशैवतन्त्रे अतिरहस्ये शरभकल्पे मातृकाद्यवर्णविवेको नाम षड्विंशोऽध्यायः; 48B, इति श्रीभैरवशैवतन्त्रे कल्पे भद्रकालीविधिर्नाम सप्तविंशोऽध्यायः; 51B, इति श्रीमहाशैवतन्त्रे आकाशभैरवकल्पे तैलाञ्जनविधिर्नाम अष्टाविंशोऽध्यायः; 52B, इति श्रीमहाशैवतन्त्रे कल्पे मालामन्त्रे शूलिनीदुर्गाध्यायत्रयं विना एकोनत्रिंशोऽध्यायः; 54A, इति श्रीमहाशैवतन्त्रे आकाशभैरवकल्पे त्रिंशोऽध्यायः; 56B, इति श्रीशैवतन्त्रे आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे बलिकर्मविधानं नाम एकत्रिंशोऽध्यायः; 57B, इत्याकाशभैरवकल्पे द्वात्रिंशोऽध्यायः; 59A, इत्याकाशभैरवकल्पे महाशैवतन्त्रे प्रत्यक्षसिद्धिप्रदे वडवानलमन्त्रं नाम त्रयस्त्रिंशोऽध्यायः; 60B, इति श्रीमहाशैवतन्त्रे आकाशभैरवकल्पे दिक्पालमन्त्रं नाम चतुस्त्रिंशोऽध्यायः; 61B, इत्याकाशभैरवकल्पे व्याधिमन्त्रं नाम पञ्चत्रिंशोऽध्यायः; 62A, इत्याकाशभैरवकल्पे मन्त्रप्रयोगं नाम षट्त्रिंशोऽध्यायः; 68B, इत्याकाशभैरवकल्पे शरभकवचं नाम

सप्तत्रिंशोऽध्यायः ; 70A, इत्याकाशभैरवकल्पे कामराजमन्त्रं नामाष्टत्रिंशोऽध्यायः ; 71B, इति श्रीआकाशभैरवकल्पे रक्षाचामुण्डीमन्त्र नाम एकोनचत्वारिंशोऽध्यायः ; 72B, इत्याकाशभैरवकल्पे मोहिनीमन्त्रं नाम चत्वारिंशोऽध्यायः ; 73A, इत्याकाशभैरवकल्पे शब्दाकर्षण-भाषामन्त्रनामैकचत्वारिंशोऽध्यायः : 74A, इत्याकाशभैरवकल्पे लक्ष्मीमन्त्रं नाम द्विचत्वारिंशोऽध्यायः ; 74B, इत्याकाशभैरवकल्पे मायामन्त्रं नाम त्रिचत्वारिंशोऽध्यायः ; 75A, इत्याकाशभैरवकल्पे पुलिन्दिनीमन्त्रं नाम चतुश्चत्वारिंशोऽध्यायः ; 77B, इति श्रीमहाशैवतन्त्रे आकाशभैरवकल्पे महाशास्तामन्त्रं नाम पञ्चचत्वारिंशोऽध्यायः ; 78A, इत्याकाशभैरवकल्पे महाशैवतन्त्रे प्रत्यक्षसिद्धिप्रदे संक्षोभणीमन्त्रं नाम षट्चत्वारिंशोऽध्यायः ; 79A, इत्याकाशभैरवकल्पे धूमावतीमन्त्रं नाम सप्तचत्वारिंशोऽध्यायः ; 80A, ०प्रत्यक्षसिद्धिप्रदे धूमावतीमन्त्रं नामाष्टाचत्वारिंशोऽध्यायः ; 80B, इत्याकाशभैरवकल्पे मधुक्षारकाप्रयोगो नाम एकोनपञ्चाशत्तमोऽध्यायः ; 82B, इत्याकाशभैरवकल्पे महाशैवतन्त्रे प्रत्यक्षसिद्धिप्रदे चित्रविद्यामन्त्रं नाम पञ्चाशत्तमोऽध्यायः ॥

5896.

4634. उत्तरतन्त्रे स्वप्नाध्यायः । *Svapnādhyāyaḥ from Uttaratantra.*

Substance, country-made paper. 9½ × 4¼ inches. Folia, 3. Lines, 8 on a page. Extent in ślokas, 30. Character, Bengali. Appearance, discoloured and worn-out. Complete.

The work relates to the interpretation of dreams.

IO. V. 3135 describes a *Svapnādhyāya* which, in its colophon, is stated to belong to the *Itihāsapurāṇa* by Bṛhaspati. For almost identical topics from the *Mārkaṇḍeya Purāṇa* and *Bhaviṣya Purāṇa* cf. ASB. V. 3733, 3754-5. A MS of an *Uttaratantra* in 46 chapters is described in HPR. I. 35.

Beginning :—

नमो गणेशाय ।

अथोत्तरतन्त्रोक्तः स्वप्नाध्यायः ।

श्रीदेव्युवाच ।

देवदेव महादेव भक्तानामभयप्रद ।
प्रायः कलियुगे देव मनुजाः कल्मषान्विताः ।
कथं ज्ञानं भवेत्तेषां शुभाशुभफलान्वितम् ॥
भविष्यं वर्त्तमानं वा अतीतं वा महेश्वर ।
विस्तरेण ममाचक्ष्व यदि तेऽस्ति कृपा मयि ॥

ईश्वर उवाच ।

गुह्यं चैतत् प्रवक्ष्यामि तव प्रीत्या वरानने ।
साधकस्यापि देवेशि सर्व्वं प्रत्यक्षतां व्रजेत् ॥
देशिकस्याथ वक्ष्यामि लक्षणं शृणु साम्प्रतम् ।
एकाग्र्यापवर्गार्थं भक्तिश्रद्धान्वितस्य च ॥
जपपूजारतस्यापि कापट्यरहितस्य च ।
दातुर्भोक्तुः पालकस्य सर्व्वं प्रत्यक्षतां व्रजेत् ॥
स्वच्छन्दचरितस्याथ स्वच्छन्दहृदयस्य च ।
स्वप्ने दृष्टे तु देवेशि स्वप्नं प्रत्यक्षतामियात् ॥
संदेहे संशये गर्त्ते भये च समुपस्थिते ।
अरोगी शुद्धदेहः सन् जप्त्वा स्तुत्वा च भक्तितः ॥
नत्वा च देवतां देवि सुतल्पे शयनं चरेत् ।
यथा यथा प्रसुप्तस्य आर्त्तस्य च महेश्वरि ॥
प्रसादं कुरुते स्वप्ने किञ्चिद्दर्शनसंयुतः ।
सप्ताहेऽथवा पक्षे त्रिसप्ताहेऽथवा पुनः ॥
एकविंशतिरात्रेण स्यात् स एव शिवो यतिः ।
प्रसादं कुरुते स्वप्ने ततः सिद्धेर्निदर्शनम् ॥
स्वप्ने पश्यति यो देवं महेशं सर्व्वतोमुखम् ।
देवीं वा स्वप्नगुह्यां च स्पष्टं वाऽथ यथाविधं ॥

देवतादर्शनं चाथ निर्म्मलं चन्द्रमण्डलम् ।
गङ्गां भागीरथीं भानुं लिङ्गं विश्वानमीश्वरम् ॥
प्रसन्नं तत्र जानीयात् सिद्धिं स्वप्नप्रदर्शने ॥
द्विजतिलाशी भोजनञ्च रोदनं रुधिरस्रुतम् ।
संग्रामविजयो होमो हर्म्याद्यारोहणं तथा ॥
नदीसमुद्रतरणं आकाशगमनं तथा ।
भास्करोद्गमनं चैव ज्वलनं तु हुताशनम् ।
हर्म्याद्यारोहणं चैव प्रासादशिखरेऽपि च ।

.. ..

215, लभेत् सिद्धियुतश्चैव देवीनाथश्च दर्शनम् ॥

End :—

दुःस्वप्नं यदि देवेशि सदा दिव्येष्टमन्त्रतः ।
भक्तानामन्यथा भावो दुःस्वप्नमपि निश्चितं ॥

Colophon :—

इत्यस्य तन्त्रोक्तः स्वप्नाध्यायः समाप्तः ॥

5897.

10528. **मार्ज्जारीतन्त्रम् ।** *Mārjārītantram.*

Substance, country-made paper. 10 × 5 inches. Folium, 1. Lines, 9. Character, Nāgarī. Appearance, discoloured. Incomplete. Fragmentary.

The name Mārjārītantra is indicated on the left hand upper margin. It contains only ten verses dealing with the worship of Ucchiṣṭagaṇeśa.

Beginning :

गणेशाय नमः ॥

देव्युवाच ॥

देवदेव जगन्नाथ सर्व्वज्ञ परमेश्वर ।
भैरवानन्द चिन्मात्र नमः स्वच्छन्दरूपिणे ॥ १ ॥

योगिना सर्व्वसिद्धिः स्यात् केनोपायेन शङ्कर ।
वेदाचारविहीनानां सद्योच्छिष्टगणेश्वरी ॥ २ ॥
योगिना सिद्धिदं मन्त्रं ब्रूहि मे परमेश्वर ।

ईश्वर उवाच ॥

उच्छिष्टगणनाथाख्यं सर्व्वसिद्धिप्रदायकम् ॥ ३ ॥
सर्व्ववश्यकरं लोके स्त्रीणां पंसामिदं शुभम् ।
वश्यं करोति राजानं स्त्रियं वा पुरुषं तथा ॥ ४ ॥

5898.

4745. **कालोत्तरे मुद्रापटलम् ।** *Mudrāpaṭalam from the Kālottaratantram.*

Substance, palm-leaf. 12 × 2¼ inches. Folia, 8, of which five are marked 27, 43, 81, 98 and 110; the rest are without leaf-marks. Lines, 5 on a page. Extent in ślokas, 18. Character, Kuṭila. Appearance, old and dilapidated. Fragmentary.

All the folia except 27 are more or less damaged and they do not belong to the same work. The damaged and fragmentary condition of the MS does not make it possible to ascertain the works to which the folia belong. On fol. 110A, the *Gālavacarita* is mentioned twice. Leaf 27B contains the following colophon :—

इति कालोत्तरे मुद्रापटलम् ।

5899.

2889. **योनितन्त्रम् ।** *Yonitantram.*

Substance, country-made yellow paper. 15 × 4 inches. Folia, 17. Lines, 5 on a page. Extent in ślokas, 250. Character, Bengali. Appearance, fresh. Complete in 8 chapters.

The work is described in L. IX. 3185.

5900.

4672. *Yonitantram.*

Substance, country-made paper. 14 × 5 inches. Folia, 8. Lines, 9 on a page. Extent in slokas, 200. Character, Bengali. Appearance, old and discoloured. Complete in 8 chapters.

5901.

5093. *Yonitantram.*

Substance, country-made paper. 14½ × 4 inches. Folia, 9. Lines, 8 on a page. Extent in slokas, 225. Character, Bengali. Appearance, old and discoloured. Complete in 8 chapters.

5902.

6088. *Yonitantram.*

Substance, country-made paper. 7½ × 4¾ inches. Folia, 25. Lines, 7 on a page. Extent in slokas, 225. Character modern Kashmiri. Appearance, fresh. Complete in 8 chapters.

The last verse of the previous MSS of the work is not found here.

5903.

10000. योनिगह्वरतन्त्रम् । *Yonigahvaratantram.*

Substance, palm-leaf. 12 × 2 inches. Folia, 40. The corners of the leaves which may have borne leaf-marks are worn away. Lines, 5 on a page. Extent in slokas, 550. Character, old Newari. Appearance, old. Complete

The work seems to belong to the Nātha school.

Beginning :—

या मात्मकामिकुहरोत्थितभास्वरायां
सोमार्कवह्नित्रिपयोदरमध्यसंस्था ।
चित्रेतचिन्तविघ्नं + + + भावां ।
स्वाभावभ[ा]सकिपरां प्रणमामि काली ॥
श्रीमदुत्तरपीठे तु श्मशाने करवीरके ।
सर्व्वयोगिनी मेला पां + + + मत्रे ॥
योगिन्याश्च मुद्रत्व मन्त्रमद्भावमुत्तमम् ।
श्रीज्ञाननेत्रनाथेन भूतले संप्रकाशितम् ॥
प्रणम्य + + + + + भैरवं त्रिगनामथं ।
शक्तिस्थं शक्तिरहितं परमानन्दरूपिणम् ॥
निर्वाणं निर्व्विकारञ्च अप्रतर्क्यं मनो प +
+ + गुणागणैर्हीनं उदयास्तमवर्ज्जितम् ॥
भूचरी खेचरी चैव दिक्चरी गोचरी तथा ।
योगिनी शाकिनी नामा सिद्धस्त्रैः + + + + ॥

A list of the *gurus* of the school is given thus:—

17B, गुरुक्रमं प्रवक्ष्यामि शृणु वीरेन्द्रनायकम् ।
श्रीदेव्युवाच ॥

शृणु भैरव-राजे[श] कथयामि मह[ा]द्भुतम् ।
य[न्न] कस्यचिदाख्यातं सिद्धानां खेचरीषु च ॥
नव भेदात् प्रवक्ष्यामि सिद्धिचक्रचतुष्टयम् ।
अनाख्येया परा सिद्धा ख्याता मोक्षप्रदायिनी ॥
प्रथमं क्रमपूर्व्वन्तु द्वितीयं सिद्धपूर्व्वकं ।
संहारं तु तृतीयं स्यात् अनाख्येयं चतुर्थकम् ॥
एतेषां क्रमराजानां सिद्धसंज्ञा वदामि ते ।
पश्चात्मना महाभीमं विद्या सङ्कर्षणी तथा ॥
आद्ये युगे यथा जातं त्रेतायां द्वापरे तथा ।
चतुर्थं महाघोरे समाप्ता शृणु भैरव ॥

खगेन्द्रनाथविख्याता अत्रा आयातानि कृतो युगे ।
द्वितीये कूर्म्मनाथं तु मंगलादूतिमेव च ॥
तृतीये मेषनाथश्च कामकलया सह ।
चतुर्थे मीननाथं च कुङ्कणादूतिसंयुतम् ॥
तस्यैव कौलमार्गस्य उत्पन्ना द्वाद[श] सुताः ।
तेषां नामानि वक्ष्यामि आम्नायं च यथास्थिताः ॥
भट्टामरमहेन्द्रं च वल्कलं चित्रमेव च ।
विन्ध्यालिं वरदेवं च अहिन्द्रं च गजेन्द्रकम् ॥
महीधरं च गुडिकं सिद्धेशाः गुरुसन्ततौ ।
एभ्योर्द्ध्वरेताः षट् चैव मादिकारादिस्तथा ॥
तेषां च प्रविभागं तु कथयामि समध्वज(ः) ।
भट्टमहेन्द्रनाथं च वल्कलं च तथा परम् ॥
अहिन्द्रं च गजेन्द्रं च महीधरस्तथैव च ।
एते सिद्धा महात्मान ऊर्द्धरेता गता[ः] सदा ॥
अमरनाथपादं तु वरदेवस्तथापरः ।
चित्रालिं विन्ध्यनाथश्च गुडिकानाथमेव च ॥
एते षट् स्थान् निकायान्ते कथिता[ः] सुरपूजित(ः) ।
निष्कृयानाथपादं च ज्ञानदीप्तिः शङ्कितः ॥
विद्यानन्द च रक्तां तु द्वितीयं कथिता तव ।
सत्यानन्दं महानन्दं तृतीयं सिद्धपूजितम् ॥
शिवानन्दं च रत्ना च आयातं च चतुर्थके ।
खगेन्द्राद्यादिसिद्धानां कथिता गुरुसन्ततौ ॥
एते वै कुलमार्गस्य रहस्यं शिवनिर्म्मितम् ।

The origin of the scriptures of the school and the order of creation of the world are indicated as follows:—

34B, सम्यक् महाशास्त्रसम्प्रदायं पूजाकथासंक्रमपूर्व्वमेवं ।
सम्प्राप्य कौलोत्तरमारभूतं अभूतपूर्व्वं अथ कारणादिं ॥

देवी श्रीश्रीमित्रीशनाथस्वामिनो प्रसूता भुवि ।
तस्मादपराग्गुरुलात् प्राप्तं चैव महानयम् ॥
श्रीकुपानन्दविद्या देवी दत्तं तस्य प्रसादतः ।
तथा दत्तं स्वशिष्याय श्रीचानन्दाभिधानतः ॥
दत्तं परामृतक्रमं महाशासनमुत्तमम् ।
तेनेदं चरितं सर्व्वं यथा प्राप्तं गुरोर्मुखात् ॥
सम्प्रदायं सुसंबद्धं सकलं सुखागमम्
रचितं गुरुवाक्येन स्वसन्तानहिताय च
आदौ सर्व्वमिदं शून्यं निराभासं निरामयम्
ततो आभासमुत्पन्नं आभासान्निरञ्जनम् ॥
ध्वनिरूपा प्रकाशरूपा शक्तौ सकलत्वमागता
नादबिन्दुसमोत्पन्नं चिद्रूपं प्रकाश्यते ॥
ततः एषा त्रिकोणान्ता कूटरूपं सुनिर्मलम् ।
ततस्तत्पुष्टकं चक्रं त्रिकोणं नायकरूपिणम् ॥
कूटत्रय-क्रमेणैव कवलीकं महान्वयं ।
ततो मध्या परा योनि एकाराकृतमुत्तमा ॥
तत्र मध्या विस्फुलिङ्गं उत्पन्नं भूरितेजसम् ।
विस्फुलिङ्गात् समुत्पन्ना नादं सम्पूर्णलक्षणम् ॥
ततो नादात् समुत्पन्ना देवी कौलीशपूर्णिमा ।

End :—

जयति त्रिभवनात्तं गौडपादप्रमूर्त्तिमम् ।
सकल-कमल-कान्तं मत्स्यदेवपादसिद्धं
कुरुतमिह देवी साधकः सिद्धिदा नु ॥

The last colophon which is the only colophon in the whole work runs :—

इत्युत्तराम्नाये श्रीॐकारपीठविनिर्गते श्रीचक्रभैरवे षोडशसहस्रे उद्धृते योनिगह्वरं समाप्तं । इति शुभं ।

5904.

3160. कुलार्णवतन्त्रम् । *Kulārṇavatantram.*

Substance, country-made paper. 14 x 5½ inches. **Folia**, 66. **Lines**, 11 on a page. **Extent** in ślokas, 2,150. **Character**, Bengali. **Appearance**, fresh. **Incomplete**.

The work, in 17 chapters, has been published in the *Tantrasaṅgraha*, *Sulabha Tantra-Prakāśa* and *Tantric Texts* of Arthur Avalon (Calcutta, 1917). The present MS goes to the end of the 14th ullāsa. Of the 15th ullāsa there is only one leaf.

5905.

3452. *Kulārṇavatantram.*

Substance, country-made paper. 17½ x 4 inches. Folia, 1-69 (as indicated on the right hand side) and 76-1? (as indicated on the left hand side). Lines, 7 on a page. Extent in ślokas, [illegible]. Character, Bengali. Date, Śaka 1640. Appearance, discoloured. Complete in 17 chapters.

Post Colophon :—

ऋतुरन्ध्रा — - ब्दाढ्य शाकेषु शुभ्रभाद्रेऽमला ।
रत्नस्तोयं मुद्रालिपि शिवोक्तः शिवया सह ॥

रुद्रयामले :

उड्डीयाने महापीठे न सिद्धिः स्यात् स्त्रियं विना ।
स्त्रीविहीनो साधने च विघ्नं कुर्व्वन्ति देवताः ॥
तत्रैव देविदेवीकोटे पीठे देवि सुनिश्चितम् ।
महाचारविचारा च सर्व्वलोक-मनोहरा ॥
यस्या दर्शनमात्रेण मनःक्षोभः प्रजायते ।
मक्षोभो मनसश्चैव तत्र सिद्धिः प्रजायते ॥
सुजातीया सर्व्वदा ग्राह्या ब्राह्मणी यवनी विना ।
रजकी नापिती ग्राह्या विदग्धा सर्व्वदैव च ॥

शाक्षणीं यवनीं वापि यः स्पृशेद्दैवयोगतः ।
न तस्य विद्यते सिद्धिः कल्पकोटिशतैरपि ॥
दरिद्रः स्यात् महारोगी सर्व्वलोकविनिन्दितः ।
विमुखी त्रिपुरा तस्य छमन्ती याति नित्यदा ॥
श्रीकुलाख्ये महापीठे मत्स्यं खादति यो जनः ।
न तस्य जायते सिद्धिः कल्पकोटिशतैरपि ॥
देविदेकोटिमुक्ताख्यपीठयोरन्तरे वसन् ।
मद्यं दत्त्वा जपेद्यस्तु तस्य सिद्धिर्न जायते ॥
जालन्धरे महापीठे तथा मद्यं परित्यजेत् ।
वाराणस्यां महाभागे शिवभक्तिपरायणः ॥
एकया मुद्रया सिद्धिर्जायते नात्र संशयः ।
अन्तर्वेदिप्रयागे [च] मिथिलायां तथैव च ॥
मागधे मेखलायाश्च मद्यात् सिद्धिः प्रजायते ।
तत्र देवाः प्रकुर्व्वन्ति छिद्रं मद्यरसं विना ॥
अङ्गवङ्गकलिङ्गेषु स्त्रिया सिद्धिर्भवेद्ध्रुवम् ।
तथैव सिंहलादौ च स्त्रीराज्ये द्रौपदीकृते ॥
गङ्गायां मत्स्यमांसेश्च मुद्रयाङ्गनयापि च ।
गौडे च पञ्चभिर्द्रव्यैः सर्व्वसिद्धिः प्रजायते ॥
एवमन्येषु देशेषु पञ्चभिः सिद्धिरुत्तमनुः ॥

तन्त्रान्तरे ।

दधिना समभागञ्च गुडं दत्त्वा दिनत्रयम् ।
वदरीमूलसंयुक्तं मद्यं भवति पार्व्वति ॥

तन्त्रान्तरे ।

कुलं शक्तिः समाख्याता तस्यां पूजादिकञ्च यत् ।
कुलाचारः स विज्ञेयः साधकस्येष्टदायकः ॥

समाप्तश्चायं ग्रन्थः ॥

शुभमस्तु शकाब्दाः १६४० । श्रीगङ्गाधर देवशर्म्मणः स्वाक्षरमिदं पुस्तकञ्च । कृष्णाय गोविन्दाय नमः ॥

The date given here seems to be the date of copying of the present MS whereas the date found in the beginning of the post-colophon appears to be the date of the MS from which the present MS was copied.

The above extract from the ***Rudrayāmala*** agrees generally with what appears to be the 18th chapter of the *Kulārṇava* in a Vaṅgīya Sāhitya Pariṣat MS (No. 602).

5906.

4730. *Kulārṇavatantram.*

Substance, country-made yellow paper. 9¼ × 4¼ inches. Folia, 44-53. Lines, 7 on a page. Extent in ślokas, 105. Character, Nāgara. Date, N.S. 924. Appearance, fresh. Incomplete.

The present MS contains only the ninth chapter of the work.

Post Colophon :—

संवत् ९२४ माघशुक्ले चतुर्दश्यां लिखितमिदम् ।

5907.

3714. *Kulārṇavatantram.*

Substance, country-made paper. 10¼ × 4¼ inches. Folia, 14. Lines, 8 on a page. Extent in ślokas, 490. Character, Bengali. Appearance, old and discoloured. Incomplete.

This MS runs from the beginning up to verse 39 of the fourth chapter of the work.

5908.

3917E. *Kulārṇavatantram.*

Substance, country-made paper. 14½ × 4¼ inches. Folia, 39A–41A. Lines, 11 on a page. In tripāṭha form. Character, Bengali. Appearance, old and discoloured. Incomplete.

This MS contains what is called the "30th" chapter of the work.

Beginning :—

ॐ गुरवे नमः। श्रीशिव उवाच—

शृणु दुर्गे प्रवक्ष्यामि साधकानां सुखोत्तमम्।

End .—

तवैव सेवानिपुणो जनो वा तस्मान्नि चित्तं फलभाग् न चेश्वरः ;

Colophon :—

इति कुलार्णवे देवीभर्गसंवादे परमार्थ-तत्त्वज्ञानतरङ्गिण्यां नाम-

महात्म्यं षट्त्रिंशत् पटलः।

5909.

3917G. *Kulārṇavatantram.*

Substance, country-made paper. 14¼ × 4¼ inches. Folia, 54B-83B. Lines, 11 on a page. Character, Bengali. Date, Śaka 1614. Appearance, old and dilapidated. Incomplete.

This MS runs up to verse 74 of the 11th chapter. The date of the MS is given at the end of the Muṇḍamālā-tantra which is completed at fol. 54B of the same MS.

5910.

4668. *Kulārṇavatantram.*

Substance, country-made paper. 17 × 6¼ inches. Folia, 152-216 (as indicated on the right side of the leaves) or 1-65 (as indicated on the left side). Lines, 10 on a page. Character, Bengali. Appearance, fresh. Complete in 17 chapters.

The seven verses at the end of Avalon's edition of the work are not found in the present MS.

5911.

5912. *Kulārṇavatantram.*

Substance, country-made paper. 9 × 5¼ inches. Folia, 123. Lines, 10 on a page. Extent in ślokas, 2,150. Character, modern Nāgara. Appearance, fresh. Complete in 17 chapters.

5912.

5862A. *Kulārṇavatantram.*

Substance, country-made paper. 9¼ × 4¼ inches. Folia, 1-5. Lines, 13 on a page. Character, Nāgara. Appearance, good. Incomplete.

This MS runs up to verse 117 of chapter I of the work. In the beginning there are three additional introductory verses not found in Avalon's edition of the work. They run as follows :—

श्रीगुरून् गणपतिं दुर्गां वटुकं शिवमच्युतम्
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ॥
अनाद्यायाखिलाद्याय मायिने गतमायिने ।
अरूपाय सरूपाय शिवाय गुरवे नमः ॥
पराप्रमादमग्नाय सच्चिदानन्दमूर्तये
अग्नीषोमस्वरूपाय त्र्यम्बकाय नमो नमः ॥

5913.

166. **कुलार्णवे ईशानसंहिता ।** *Īśānasaṃhitā from Kulārṇavatantram.*

Substance, country-made yellow paper. 18 × 3 inches. Folia, 9. Lines, 5 on a page. Extent in ślokas, 215. Appearance, good. Complete.

The manuscript has been noticed in L. I. 424. No such topic as dealt with in this MS is found in the printed editions of the *Kulārṇava.*

It is in the form of an interlocution between Nārada and Gautama and also between Śaṅkara and Pārvatī. It is a Vaiṣṇava work.

The present work obtains its name from the name of the sixth mouth of Śiva which is hidden and called Īśāna.

The six Āmnāyas of the Tantras describing the rites of various deities are stated to have issued from the six mouths of Śiva as follows (cf. also pp. 119-20 below):—

Fol. 3B. भुवनेशी चान्नपूर्णा महालक्ष्मीः सरस्वती ।
चतुर्वर्गप्रदा देव्यो मन्त्रास्तासाञ्च कामदाः ॥
साधनानि च सर्व्वाणि पूर्व्ववक्त्रेण कीर्त्तिताः ।
प्रसाददक्षिणामूर्त्तिगोपाल-गरुडध्वजाः ॥
चतुर्वर्गप्रदा एते मन्त्रास्तेषां ससाधनाः ।
दक्षवक्त्रेण कथिता मया भवविमुक्तये ॥
लक्ष्मीनारायणौ विष्णुराघवौ नरसिंहकः ।
हयग्रीव-वराहाद्यास्तथान्ये शङ्करादयः ॥
चतुर्वर्गप्रदा लोके मन्त्रास्तेषां ससाधनाः ।
प्रत्यक्-वक्त्रेण कथिता मया कारुण्यतः प्रिये ॥
काली तारा मर्द्दिनी च त्वरिता बगला तथा ।
जयदुर्गा तथा चान्या मातङ्ग्यादयः प्रिये ॥
युगे युगे पूर्णकला विशेषेण कलौ युगे ।
मन्त्राः ससाधनास्तासां उदक्वक्त्रेण कीर्त्तिताः ॥
त्रिपुरेशी तथा चक्रा तथा त्रिपुरभैरवी ।
त्रिपुटा त्रिपुरा नित्या तथा चान्याश्च देवताः ॥
चतुर्वर्गप्रदा नित्यं मन्त्रास्तासां ससाधनाः ।
ऊर्द्धवक्त्रेण कथिता भुक्तिमुक्तिफले ध्रुवं ॥
सूर्य्यश्चन्द्रो हनूमांश्च गोरक्षो ह्यपराजिता ।
प्रत्यङ्गिरा विषहरा तथा चान्याश्च देवताः ॥

चतुर्वर्गप्रदाश्चेमे कलिकाले विशेषतः ।
मन्त्राः सनातनाश्चैषां गुप्तवत्त्वेन कीर्त्तिताः ॥
इत्येष कथितः कान्ते मम वर्णविनिर्णयः ।
गोपनीयः प्रयत्नेन न देयः पशुघातिने ॥

The name of Gaurāṅga in the sixth Āmnāya provokes a question from Pārvatī in reply to which Maheśvara emphasizes the divinity of Gaurāṅga and gives the details of his Tāntrika worship.

5914.

3764. **कुलार्णवे षट्कर्म्मविधिः ।** *Ṣaṭkarmavidhiḥ from Kulārṇavatantram.*

Substance, country-made paper. 9½ x 4 inches. Folia, 2. Lines, 9 on a page. Extent in ślokas, 30. Character, Nāgara. Appearance, fresh. Complete.

This work deals with the six black rites of the Tantras. This topic is dealt with, though not in identical language, in the 16th chapter of the *Kulārṇava*. The first three verses of the extract quoted below are found in *Śāradātilaka* (XXIII, 128–30).

Beginning :—

अथ षट्कर्म्मप्रयोगः ।
सूर्य्योदयं समारभ्य घटिकादशकं क्रमात् ।
ऋतव[श्च] वसन्ताद्याः दिवारात्रौ दिने दिने ॥
वसन्तग्रीष्मवर्षाख्यशरद्धेमन्तसंसराव(?) ।
हेमन्ते शान्तिकं प्रोक्तं वसन्ते वश्यकर्म्मणि ॥
शिशिरः स्तम्भने ज्ञेयो विद्वेषो ग्रीष्मके मतः ।
प्रावट् उ[च्]चाटने ज्ञेया शरत् मारण[कर्म्मणि] ॥
सर्व्वाभिमुखतः कुर्य्यात् शान्तिकस्य कुलेश्वरि ॥

Colophon :— इति श्रीकुलार्णवे षट्कर्म्मविधिः ।

For an account of the contents of the Kulārṇava-tantra cf. C. Chakravarti—*Extent and contents of the Kulārṇavatantra* (Annals of the Bhandarkar Oriental Research Institute, Vol. XIII, p. 206ff.).

5915.

163. गुप्तसाधनतन्त्रम् । *Guptasādhanatantram.*

Substance, country-made paper. 19 x 3 inches. Folia, 16. Lines, 5-7 on a page. Extent in ślokas, 400. Character, Bengali. Date, Śaka 1591(?) Appearance, old and soiled. Complete in 12 chapters.

The work, in 12 chapters, has been published in the *Tantrasaṅgraha* of Rasikmohan Chatterji and described in L. II. 738. For other editions cf. BM Catalogue (1877-1892, p. 414; 1906-28, p. 1073).

Post Colophon Statement :—

शशिग्रहबलास्यग्रामितेऽब्दे माघमासे लिखितो श्रीराजकिशोर शर्म्मणा गुप्तसाधनतन्त्रकः ।

5916.

4666. *Guptasādhanatantram.*

Substance, country-made yellow paper. 16½ × 4½ inches. Folia, 17. Lines, 7 on a page. Extent in ślokas, 400. Character, Bengali. Appearance, fresh. Complete in 12 chapters.

5917.

2760. *Guptasādhanatantram.*

Substance, country-made paper. 16½ × 4 inches. Folia, 4. Lines, 5 on a page. Extent in ślokas, 84. Character, Bengali. Appearance, new. Incomplete.

The present MS contains the 6th and the 7th Paṭala of the work.

5918.

159. गुरुतन्त्रम् । *Gurutantram.*

Substance, country-made paper. 15 x 5½ inches. Folia, 7. Lines, 7 on a page. Extent in ślokas, 190. Character, Bengali. Appearance, fresh. Complete.

The present MS has no division in chapters. The work is described in L. I. 247 in which the concluding colophon is given as belonging to the fifth chapter of the work. The beginning and end of the present MS agree with those of L.

5919.

1621. निर्व्वाणतन्त्रम् । *Nirvāṇatantram.*

Substance, country-made yellow paper. 14 x 3½ inches. Folia, 17. Lines, 8 on a page. Extent in ślokas, 550. Character, Bengali. Appearance, old. Complete in 14 chapters.

Printed in 14 chapters in *Tantrasaṃgraha* and *Sulabhatantraprakāśa.* For a description of the work cf. L. I. 274.

5920.

31. समयाचारतन्त्रम् । *Samayācāratantram.*

Substance, country-made paper. 9½ x 4 inches. Folia, 16. Lines, 9 on a page. Extent in ślokas, 300. Character, Nāgara. Appearance, old. Complete.

The present MS is described in L. II. 755, where it is stated to be in prose but as a matter of fact the work is mostly in verse. The portions of mantras and directions only are in prose. The work has been described also in HPR. II. 241.

The object of the work is given in the following verses (Fol. 1):—

शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यतरं महत् ।
समयाचारसङ्केतं तन्त्रं परमदुर्लभम् ॥ ६ ॥
पूजनादिषु यः कालो देवतानां पृथक् पृथक् ।
स कालः समयो नाम यं ज्ञात्वाम्रुतमश्नुते ॥ ७ ॥
कालेष्वाचरणं देवि यस्य देवस्य यं विधिं ।
तं नाम समयाचारं देवानामपि दुर्लभम् ॥ ८ ॥
सङ्कीर्त्तनात् पुनर्देवि रहस्यानां रहस्यकम् ।
समयाचारसङ्केतं नाम्ना तन्त्रं प्रकीर्त्तितम् ॥ ९ ॥
अथवा समयाचारात् समयाचारमुच्यते ।
समया गोपनीयानां सदा गोप्या प्रकीर्त्तिता ॥ १० ॥

The origin of the six Āmnāyas is indicated:—

5B, पूर्व्वाम्नायस्तदा जातो यदा प्राच्यां दिशि स्थितः ।
एवं पश्चिम आम्नायः पश्चिमस्यां दिशि स्थितः ॥ ६८ ॥
एवमुत्तर आम्नाय उत्तरस्यां दिशि स्थितः ।
मुखमूर्द्धकृतं देवि यत्प्रोक्तं तव सन्निधौ ॥ ६९ ॥
स ऊर्द्ध आम्नायः कथितो देवानामपि दुर्लभः ।
अधोमुखं कृतं देवि यत्प्रोक्तं गिरिशप्रिये ॥ ७० ॥
अध आम्नायः इत्युक्तं सत्यं सत्यं वरानने ।
षडाम्नायकथिताश्चोत्पत्तिक्रमनामतः ॥ ७१ ॥

In this enumeration the southern Āmnāya is omitted by inadvertence of the scribe or of the author. But it appears in the next extract which gives the names of different goddesses described in the various Āmnāyas:—

6A, यस्मिन् यस्मिंश्च ये देवाः कीर्त्तिताश्च वरानने ।
तांस्तान् देवान् प्रवक्ष्यामि साधका[नां] सुखाय च ॥ ७२ ॥

श्रीविद्याभेदसहिता बाला च त्रिपुरा च या ।
भुवनेश्वर्य्यन्नपूर्णा च पूर्व्वाम्नायप्रकीर्त्तिताः ॥ ७३ ॥
बगलामुखी च दक्षिणी त्वरिता चफलप्रदा ।
महिषमर्द्दिनी महालक्ष्मी दक्षिणाम्नायकीर्त्तिता ॥ ७४ ॥
कालिकाभेदसहिता ताराभेदैश्च संयुता ।
मातङ्गी भैरवीच्छिन्ना तथा धूमावती मता ॥ ७५ ॥
उत्तराम्नायकथिता शीघ्रकामफलप्रदा ।
समस्तभेदसहिता कालिका या प्रकीर्त्तिता ॥ ७६ ॥
शाविं[श्र]ष्वरी नाम दक्षिणाम्नायसंज्ञिका ।
पराप्रसादो मन्त्रश्च ऊर्द्धाम्नायप्रकीर्त्तितः ॥ ७७ ॥
वागीश्वर्य्यादयो विद्या अधआम्नायकीर्त्तिताः ।
ऊर्द्धाम्नायो ह्यधश्चैव केवलं मोक्षदो भवेत् ॥ ७८ ॥

An enumeration of the various original Tantra works is given as follows:—

8B, नाना तन्त्राणि देवेशि पटलानि पृथक् पृथक् ॥ १२८ ॥
डामराणि च सर्व्वाणि तन्त्राणां हृदयानि च ।
समासतः प्रवक्ष्यामि शृणु देवि वरानने ॥ १२९ ॥
चतुःषष्टीनि तन्त्राणि यामलान्यष्ट सुन्दरि ।
डामराणि च त्रीणि स्युः कथयामि शुभानने ॥ १३० ॥
तन्त्राणां बहुधानाञ्च मया पूर्व्वं प्रकाशितं ।
यामलान्यत्र वक्ष्यामि डामराणि तथा पुनः ॥ १३१ ॥
विष्णुब्रह्मशिवानाञ्च यामलानि पृथक् पृथक् ।
शक्तेर्गणपतेश्चैव स्कन्दस्य च पृथक् पृथक् ॥ १३२ ॥
सूर्य्यचन्द्रमसोश्चैव कथितानि वरानने ।
जुष्टीशडा[म]रं नाम भूतडामरकं तथा ॥ १३३ ॥
शक्ति-डामरकं नाम कथितानि च डामरम् ॥

It mentions Vijayākalpa as another work previously mentioned (*v.* 239).

5921.

3112. *Samayācāratantram.*

Substance, country-made paper. $10\frac{1}{4} \times 4\frac{1}{2}$ inches. Folia, 23. Lines, 9 on a page. Extent in ślokas, 300. Character, Nāgara. Date, Samvat, 1944. Appearance, fresh. Complete.

Post Colophon :—

संवत् १९४४ ॥ सौः कु आर मासे शुक्लपक्षे ॥ १० ॥ वार सोमारः ॥

श्रीशिवशङ्कराय नमो नमः ॥ श्रीरामानुजाय नमो नमः ॥

5922.

3172. *Samayācāratantram.*

Substance, foolscap paper. 15×5 inches. Folia, 9. Lines, 11 on a page. Extent in ślokas, 325. Character, Bengali. Appearance, discoloured. Complete.

5923.

11251. *Samayācāratantram.*

Substance, country-made paper. 11×5 inches. Folia, 1-7. Lines, 14 on a page. Extent in ślokas, 270. Character, Nāgara. Appearance, discoloured. Incomplete.

The present MS begins with the last foot of a verse marked 30

5924.

3712. समयातन्त्रम् । *Samayātantram.*

Substance, country-made paper. $18 \times 3\frac{1}{2}$ inches. Folia, 39. Lines, 8 on a page. Extent in ślokas, 1,200. Character, Bengali. Appearance, dilapidated and pasted. Incomplete.

It contains the first nine Paṭalas and a portion of the tenth.

The topics dealt with in the work as well as the significance of the name of the deity Samayā have been indicated on Fol. 38A :—

कथितं परमज्ञानं समया सा समार्थकम् ।
कर्म्मयोगात्मकं वेदज्ञानयोगात्मकं परम् ॥
न्यासविन्यासकं भद्रं नित्यज्ञानपरापरम् ।
पूजासङ्केतममलं बलिसङ्केतमुत्तमम् ॥
जपसङ्केतमौशान-वह्निहोमविधानकम् ।
त्रिवीजसाधनं गुप्तं तथा भावप्रकाशनम् ॥
महाप्रयोगसङ्केतं संशयच्छेदकारणम् ।
... ...
काले सम्पद्यते सर्व्वं काल एव हि लीयते ।
सृष्टिसंहारयोर्देवि काल एव हि कारणम् ॥
कालभैरवरूपोऽहं त्वञ्च कालस्वरूपिणी ।
कालः समय एव स्यात् समया त्वं परप्रिये ॥
अहं सामयिकस्तेन यस्मात्तव वश्यः सदा ॥

5925.

3161. वीरतन्त्रम् । *Viratantram.*

Substance, country-made paper. Some of the leaves, 23 to 26, are of blue foolscap paper. 14 × 5½ inches. The leaves of foolscap—14 × 4 inches. Folia, 1-35 of which fol. 12-14 are missing. Lines, 8, 10 on a page. Extent in ślokas, 700. Character, Bengali. Appearance, discoloured. Complete in 14 chapters.

The MS contains fourteen chapters. L. I. 229 and MS No. 5927 *infra* have 15 chapters each. According to the last colophon given below it pertains to the *Vijayākalpa*.

Colophon :—

इति श्रीवीरतन्त्रे विजयाकल्पे चतुर्द्दशः पटलः ।

Post Colophon :—

श्रीकृष्णानन्दनाथस्य पुस्तकमिदम् ।

5926.

3386. *Viratantram.*

Substance, country-made paper. 15 × 3¾ inches. Folia, 14. Lines, 8 on a page. Extent in ślokas, 400. Character, Bengali. Appearance, fresh. Complete in 8 chapters.

The present MS contains eight chapters. It omits the introductory verses as found in the two other MSS of the work described here and begins :—

श्रीभगवानुवाच ।

विना दुःखैर्विना मन्त्रैर्विना पुरश्चर्यादिभिः ।
सिद्धमन्त्रं प्रवक्ष्यामि शृणु पार्व्वति सादरम् ॥
येनानुष्ठितमात्रेण भोगेन मोक्षमाप्नुयात् ।
वीरतन्त्रं मया गुप्तं गोपनं सर्व्वकामदम् ॥
श्रीनाथमुखपद्मोत्थं गुरुवक्त्रात् प्रकाशितम् ।
गुरवः सर्व्वशास्त्राणां केवलं कारणं शिवे ॥
सिद्धयो न हि मन्त्राणां पारम्पर्य्यक्रमं विना ।
तस्मादौ गुरुपंक्तीनां विन्यासं कथ्यतेऽधुना ॥
पुरा मन्त्रप्रसङ्गेन प्रश्नार्थे प्राह शङ्करः ।

श्रीशङ्कर उवाच ।

मातर्देवि महाभागे वक्तुं मोक्षप्रदर्शिनि ।
इदानीं श्रोतुमिच्छामि गुरुक्रममनुत्तमम् ॥

श्रीप्रकृतिरुवाच ।

गुरुक्रमस्तु बहुधा मन्त्रविस्तारगौरवात् ।
कालानामप्यनादित्वात् तत्सर्व्वं कथयामि ते ॥
गुरुक्रमस्य चाज्ञानात्कष्टमार्गो भविष्यति ।
मन्त्रमार्गे मन्त्रविधे न तादृक् सिद्धिगोचरे ॥

End :—

अग्न्युत्पातादयो दोषा भूतप्रेतादिसम्मताः ।
नेच्छन्ते तां दिशं भीता उच्छ्रिता देवताश्रया ॥

The Last Colophon :—

इति वीरतन्त्रे षट्कर्म्मविवरणमष्टमः पटलः समाप्तः ।

Post Colophon :—

साक्षरेण लिखितं तन्त्रं माधवाख्येन सूक्ता ।

The contents of the work are given as follows on the obverse of the first leaf :—

प्रथमे गुरुक्रमाभिधानम् । द्वितीये ताराप्रकरणम् । तृतीये दक्षिणा-कालिकाप्रकरणम् । चतुर्थे नित्यपूजाप्रकरणम् । पञ्चमे शवसाधनप्रकरणम् । षष्ठे उच्छिष्टचाण्डालिनीसिद्धिसाधनप्रकरणम् । सप्तमे प्रपञ्चादिसिद्धिविधि-प्रकरणम् । (In a later hand) अष्टमे षट्कर्म्मविवरण ।

5927.

3457. *Vīratantram.*

Substance, country-made yellow paper. 19½ × 4½ inches. Folia, 17. Lines, 9 on a page. Extent in ślokas, 700. Character, Bengali. Appearance, fresh. Complete.

This MS contains 15 chapters like L. I. 229.

5928.

3178. **कालीविलासतन्त्रम् ।** *Kālīvilāsatantram.*

Substance, Serampore paper. 13 x 5 inches. Folia, 115. Lines, 6 on a page. Extent in ślokas, 1,100. Character, Bengali. Appearance, fresh. Complete in 35 Paṭalas.

For a full description of the work see L. IX. 2963.

After the end of the work there are four lines of a work called Rudradīpikā which begins as follows:—

सहस्रशिवपूजायामेकोऽहत्य तथा दश ।
पञ्च लिङ्गानि एकत्र कृत्वा पूजाफलं लभेत् ॥

5929.

8111A. **तारातन्त्रम् ।** *Tārātantram.*

Substance, country-made paper. 13 x 4½ inches. Folia, 7. Lines, 8 on a page. Extent in ślokas, 150. Character, Bengali. Appearance, fresh. Complete.

The work, in six chapters, has been published by the Varendra Research Society of Rajshahi (1913).

5930.

3348. **कालीतन्त्रम् ।** *Kālītantram.*

Substance, country-made paper. 16 x 3¾ inches. Folia, 18. Lines, 7 on a page. Extent in ślokas, 600. Character, Bengali. Appearance, discoloured. Complete in 11 Paṭalas.

Beginning :—

कैलासशिखरारूढं देवदेवं जगद्गुरुम् ।
उवाच पार्व्वती देवी भैरवं परमेश्वरम् ॥

पार्व्वत्युवाच ।

देवदेव महादेव सृष्टिस्थितिलयात्मक ।

किन्तु ब्रह्ममयं धाम श्रोतुमिच्छामि तत्त्वतः ॥

The Post Colophon Statement :—

After three lines containing Bījamantras and a verse, we have the following śloka :—

यत्रस्यालस्याली-ललितकरताली-डमरुना

क्रमाज्ज्वाली काली हरति मतिशालीध्वजलता ।

दृढ-श्यामश्यामी-घनवनतमालीव सकलम्

कथं काली कौतूहल् यदि मनसि काली विजयते ॥

अयं श्लोकः काशीस्थकेनचित् महापुरुषेण कृतो नवद्वीपे प्रकाशितः ।

[This MS was found missing at the time of printing the catalogue.]

5931.

3454. *Kālītantram.*

Substance, country-made paper. 16¼ × 4 inches. Folia, 8. Lines, 9 on a page. Extent in ślokas, 288. Character, Bengali. Appearance, faded. Complete in 11 Paṭalas.

The work, in 12 chapters, has been published in the Sanskrit Sāhitya Pariṣat Series (Calcutta, 1922). The *Kālītantra* in 21 ullāsas as edited and published by Kālīprasanna Vidyāratna (Calcutta, 1892) is an entirely different work dealing with Yoga practices. The 12th chapter of the Sāhitya Pariṣat edition is absent in the present MS.

5932.

4588. *Kālītantram.*

Substance, country-made paper. 17¼ × 4 inches. Folia, 1-14. Lines, 6 on a page. Extent in ślokas, 300. Character, Bengali. Appearance, old and discoloured. Incomplete in the beginning.

This MS also contains 11 chapters like the above. The present MS omits the first 9 verses of the Sanskrit Sāhitya Pariṣat edition of the work and begins from the 10th verse.

5933.

5621D. *Kālītantram.*

Substance, palm-leaf. 14 × 1½ inches. Folia, 68A-87. Lines, 4 on a page. Extent in ślokas, 320. Character, Uḍiyā. Appearance, good. Complete in 12 chapters (which do not all agree with those of the S.S.P. edition).

After the last colophon there are 7 lines, relating to offerings to she-jackals (शिवाबलिप्रकार).

5934.

4589. कौलतन्त्रम् । *Kaulatantram.*

Substance, country-made paper. 16½ × 4 inches. Folia, 4. Lines, 7 on a page. Extent in ślokas, 100. Character, Bengali. Appearance, fresh. Complete in four chapters.

The work deals with the worship of Kālī and Tārā according to the Kaula form.

Beginning :—

श्रीगुरवे नमः ।

कैलासशिखरासीनं भैरवं भूतभावनम् ।
पप्रच्छ परमप्रीता भैरवी सर्वमङ्गला ॥

भैरव्युवाच ।

देवेश परमेशान किं त्वया जप्यतेऽनिशम् ।
किन्तद्रूपमयं नाम किम्वा तस्य जपात्फलम् ॥
विधिना केन देवेश जापनीयं वदस्व तत् ।

भैरव उवाच ।

किं जानासि वरारोहे स्वरूपं तस्य भाषितम् ॥
यदाज्ञातं शङ्करेण गुरुणा मम सुन्दरि ।
तस्य त्वंमवरत्नं शङ्करः स महेश्वरः ॥
तथापि नरलोकानां परित्राणाय पृच्छसि ।
अतएव प्रवक्ष्यामि यद + + सुलोचने ॥

End :—

इति ते कथितं कौलतन्त्रमुत्तमलक्षणम् ।
यदिदं तारिणीदेव्या गौडदेवेन भाषितम् ॥

Colophons of the different chapters :—

2A, इति कौलतन्त्रे ताराकल्पे तारारहस्यं नाम प्रथमः पटलः; 3B, इति कौलतन्त्रे ताराकल्पे ताराचारो नाम द्वितीयः पटलः; 4B, इति कौलतन्त्रे कालीकल्पे तृतीयः पटलः; इति कौलतन्त्रे कालीकल्पे चतुर्थः पटलः ।

After the colophon there are two verses quoted from the *Tārākalpa* referring to the excellence and functions of Kaulas.

5935.

3167. निरुत्तरतन्त्रम् । *Niruttaratantram.*

Substance, country-made paper. 15 × 3½ inches. Folia, 30. Lines, 7 on a page. Extent in ślokas, 725. Character, Bengali. Appearance, discoloured. Incomplete.

The present MS contains chapters 1 to 14 and one line and a half of the 15th. The work has been printed, in 15 chapters, in the *Tantrasaṅgraha* as also in the *Sulabhatantraprakāśa*. It has been described in L. I. 285 and HPR. I. 206.

5936.

4669. *Niruttaratantra.*

Substance, country-made paper. 16½ × 6 inches. Folia, 30. Lines, 10 on a page. Extent in ślokas, 1,196. Character, Bengali. Appearance, discoloured. Complete.

The present MS contains 15 chapters.

5937.

5973. निरुत्तरभट्टारकम् । *Niruttarabhaṭṭāraka.*

Substance, country-made paper. 11 × 5½ inches. Folia, 8B-17. Lines, 11-14 on a page. Extent in ślokas, 300. Character, Nagara. Appearance old. Complete in five chapters.

The work deals with Yoga.

Beginning :—

श्रीगणेशाय नमः । श्रेयसे ।

ॐ नमः शिवाय ॥

नमो माया दिक्काल ग्राम कुलाम्बरात् (?) ।
व्योमातीतं निराभासं स्पन्दनास्पन्दवर्ज्जितम् ॥
अलक्ष्य सर्व्वमालम्बं निरालम्बं निराकृतिं ।
गुणागुणपरिभ्रान्तिनिर्भ्रान्तिशक्तिनागरम् ॥
... ...
... ...

श्रीदेव्युवाच ।

महा-संशय मे नाथ मायाभ्यप[रि]वर्त्तिनम् ।
अनेन भेदगूढार्थं श्रुतं मे इन्द्रजालवत् ॥
सिद्धान्तं तन्त्र वै शैवं वामभेदं कुलागमम् ।
महार्थागमनं चैव तत्त्वार्थागाढ्यं तथा ॥

शब्दार्थं नैव जानामि पदवाक्यप्रमाणतः ।
भ्रान्तबुद्धिरहं देव भ्रामिता + + शासने ॥
केनोपायेन देवेश ज्ञातव्यं सर्व्वरूपतः ।
येनेदं ज्ञायते सत्यं दम्भशास्त्रविवर्ज्जितम् ॥
नन्दि(क)सनन्दकुमाराद्यैर्भैरिका योगिनीकुलैः ।
मुनिभिर्ब्रह्म + + + सूर्यचन्द्रमरुतादिभिः ॥
कथितं परमं ज्ञानं न ज्ञानं त्रिविधं मम ।
तत्तादिकं यदस्तीति वद मे सुरनायक ॥
नित्यभक्ता त्वहं देव कर्म्मणा मनसा गिरा ।
प्रसादं कुरु संक्षेपादल्पोपायेन मुच्यते ॥
आयासरहितं ज्ञानं प्राणायामविवर्ज्जितम् ।
धारणाध्याननिर्मुक्तं योगतत्त्वविवर्ज्जितम् ॥
अध्ययनक्रियाहीनं निष्क्रियं तीर्थवर्ज्जितम् ।
प्रसन्नात्मं जगन्नाथ वदैतत्कुलवत्सलम् ॥

9B, श्रीभैरव उवाच ।

कथयामि यथातथ्यं कपटज्ञानवर्ज्जितम् ।
भ्रमभ्रान्तिं परित्यज्य प्राप्नुयात् परमं पदम् ॥
मायाजालकर्मैर्मुक्तं ज्ञानयोगादिकैरपि(?) ।
चिन्तया रहितं चित्तं निश्चितं परमं पदम् ॥
कुम्भपूरकरेचाद्यैः प्रत्याहारपवनैः सह ।
दशवायोः सुरन्ध्राणि दशनाडिका[कि] च ॥
प्रत्येकं च मनश्चात्मा प्राणायाम यन्त्रया ।
दशनाड्यनाद्यं संक्षिप्तं कुलमध्यमम् ॥
वायुबन्धं परित्यज्य तत्त्वबन्धं तथैव च ।
मन्त्रजालं महादुर्गं क्रियाजालं परित्यज्य ॥
शास्त्रजालमनेकार्थं त्यज सर्वं यथाक्रमत् ।

Colophons of the different chapters :—

9A, इति भैरवस्रोतसि निवत्तरभट्टारके प्रथमः पटलः; 11B, इति भैरवस्रोतसि संग्रहे निवत्तरे द्वितीयपटलः; 12A, इति भैरवस्रोतसि निर्गते निवत्तरे तृतीयः पटलः; 14A, ०चतुर्थः पटलः; 17B, इति भैरवस्रोतसि निर्गते निवत्तरभट्टारके पञ्चमः पटलः। समाप्तं निवत्तरभट्टारकं नाम योगशास्त्रम् ।

5938.

5220. तोडलतन्त्रम् । *Toḍalatantra.*

Substance, country-made paper. 11⅛ × 2¾ inches. Folia, 26. Lines, 6 on a page. Extent in ślokas, 490. Character, Bengali. Appearance, fresh. Complete in 10 chapters.

The work, in ten chapters, has been printed in the *Vividhatantrasaṃgraha* and the *Sulabhatantraprakāśa.* L. I. 385 is stated to contain the beginning of an 11th chapter.

5939.

4652. वामकेश्वरतन्त्रम् । *Vāmakeśvaratantra.*

Substance, country-made yellow paper. 19¼ × 4½ inches. Folia, 11. Lines, 6 on a page. Extent in ślokas, 232. Character, modern Bengali. Appearance, fresh. Incomplete.

The present manuscript contains Paṭalas LI to LV dealing with topics like *Abhiṣeka, Pūrṇābhiṣeka* and festivities (*yātrās*) in honour of Śakti like those in honour of Viṣṇu.

The 51st Paṭala begins :—

भैरव उवाच ।

देवार्चनं महादेव कथमुत्पद्यते प्रभो ।
वराह्वतिं सुखं मन्ये देवनाथ त्रिलोकजीम् ।

मन्त्रयन्त्राक्षररूपञ्च कथमैक्यं भवेच्छिव ।
भावाः कतिविधा देव आचारा विविधाः कथम् ॥
आश्रमाणाञ्च देवेश को मम प्रियवानघो ।
एवं सर्व्वं महादेव विशेषेण ब्रवीषि मे ॥

The 55th Paṭala ends :—

एवं साम्वत्सरीं यात्रां कृत्वा साधकसत्तमः ।
गुरोः प्रसादाद्देवेशि शिवतुल्यो न संशयः ॥

Colophon :—

इति श्रीवामकेश्वरतन्त्रे भैरवभैरवीसंवादे यात्राप्रकरणं नाम पञ्चपञ्चाशत् पटलः ॥

5940.

3446. *Vāmakeśvaratantra.*

Substance, country-made paper 15¼ x 3¼ inches. Folia, 13. Lines, 9 on a page. Extent in ślokas, 460. Character, Bengali. Appearance, discoloured. Complete in five Paṭalas.

This MS contains the first five chapters of the Nityā-ṣoḍaśikārṇava section of the work. This section with the commentary of Bhāskararāya has been published in the Ānandāśram Sanskrit Series of Poona (1908). The fifth chapter, though stated to be complete in the present MS, runs only up to verse 34 of the printed edition which contains 44 verses.

The colophons here are fuller than those found in the printed edition of the work.

The last colophon runs :—

इति श्रीवामकेश्वरतन्त्रे सर्व्वतन्त्रोत्तमे षळ्क्याद्यकप्रस्तावे त्रिपुराजपहोमविधिः पटलः पञ्चमः ।

Post Colophon :—

श्रीपरमदेवतायै नमः ॥ श्रीहलधानन्दशर्म्मणामिदं पुस्तकम् ॥

5941.

3162. *Vāmakeśvaratantra.*

Substance, country-made yellow paper. 14 × 3 inches. Folia, 15. Lines, 6 on a page. Extent in ślokas, 380. Character, Bengali. Appearance, fresh. Incomplete.

Same as above. This MS. however, contains the first three chapters and a portion of the fourth.

5942.

2792. वामकेश्वरतन्त्रे [योगिनीहृदयम्] ।

Yoginīhṛdayam from the Vāmakeśvaratantra.

Substance, country-made paper. 12¼ × 3 inches. Folia, 17. Lines, 9 on a page. Extent in ślokas, 350. Character, Bengali. Appearance, dilapidated. Complete.

Yoginīhṛdaya is the title of the last three chapters of the Vāmakeśvaratantra, the *Nityāṣoḍaśikārṇava* section of which, containing the *Yoginīhṛdaya* as its concluding part, has been published in the Ānandāśram Sanskrit Series of Poona. The *Yoginīhṛdaya* section alone has been published with the commentary of Amṛtānandanātha in the *Prince of Wales Saraswati Bhavana Texts* Series of Benares (1923-4).

5943.

2793. *Yoginīhṛdayam from the Vāmakeśvaratantra.*

Substance, foolscap paper. 13¼ × 5 inches. Folia, 10. Lines, 8 to 10 on a page. Extent in ślokas, 324. Character, Bengali. Appearance, fresh. Incomplete.

This MS contains the first chapter (Fol. 1-4A), 67 verses and a half of the second chapter (Fol. 4A-6A),

105 verses and a portion of verse 106 of the third chapter (Fol. 7B–10B). In Fol. 6A-7B a portion of Amṛtānanda's commentary (e.g. on verses 6–13 of the first chapter) is found.

5944.

4585. *Yoginīhṛdayam from the Vāmakeśvaratantra.*

Substance, country-made yellow paper. 16¼ × 4 inches. Folia, 32. Lines, 6 on a page. Extent in ślokas, 768. Character, modern Bengali. Appearance, fresh. Complete.

Besides the three well-known chapters (चक्रसङ्केत, मन्त्रसङ्केत and पूजासङ्केत) of which the work consists, there are three more chapters in this MS as in L. I. 282.

5945.

1708. *Yoginīhṛdayam from the Vāmakeśvaratantra.*

Substance, country-made paper. 9½ × 4 inches. Folia, 13. In tripāṭha form. Character, Nāgara. Date, Saṃvat 1779. Appearance, old. Incomplete.

The present MS contains only the first chapter. It is accompanied by the commentary योगिनीहृदयदीपिका by Amṛtānandanātha, a disciple of Puṇyānandanātha.

Post Colophon Statement :—

संवत् १७७९ वैशाख कृष्णैकादश्यां रवौ लिखितमिदं वैद्यनाथसुतेन विष्णुदेवेनेति शिवम् ॥

ऊर्द्ध्वाम्नायगुरूपदेशभुवनं ॐकारसिंहासनं
सिद्धाचार-समस्त-वेदमयनं षट्चक्रसंभेदनम् ।
पञ्चाशैः शिवतत्वज्योतिरमलं पूर्णं प्रभाशोभितम्
ध्यातं सद्गुरुपादुकां भज मनश्चैतन्यचन्द्रोदयम् ॥ १ ॥

मिथैरीकरणं मदापहरणं वह्नेर्विना ज्वालनं
नाडीचालन-नादविन्दुकलनं देहस्य संशोधनम् ।
आत्मज्योतिनिदर्शनं कलयितं स्वच्छन्दमृत्युंजयम्
एवं ह्यात्मविदो वदन्ति सहजं चिन्मात्रमूर्त्तिं भजे ॥ २ ॥
जगद्वन्द्यावेतौ गणपवटुकौ विश्वविदुतौ
जगद्व्याप्तौ जपनिरतसान्निध्यवरदौ ।
दयार्द्रौ मग्नाङ्गौ रविशशिशिखाग्न्यनुज्वलदृशौ
मयि स्यातां स्वापरवशप्रियौ सद्गुणमयौ ॥ ३ ॥

The introductory verse of the commentary, as found in L. I. 283 and in the printed edition of the work, is not given as such in this MS. but is given as the last verse of the post-colophon statement as quoted above.

5946.

3661. **योगिनीहृदयदीपिका** । *Yoginīhṛdayadīpikā.*

By Amṛtānandanātha.

Substance, country paper. 11 × 4 inches. Folia, 109 (1–30 + 1–29 + 1–50). Lines, 10 on a page. Extent in ślokas, 3,200. Character, Nāgara. Date, Saṃvat 1853. Appearance, fresh. Complete.

Post Colophon Statement :—

सम्वत् १८५३ मिति भाद्रपद वद्य प्रतिपद्यां भृगौ वैष्णवं
लिखितं लेखकपाठकयोः शुभं भवतु । नमस्त्रिपुरसुन्दर्य्यै नमः ॥

5947.

3917D. **सिद्धिवीरेश्वरीतन्त्रम्** । *Siddhivīreśvarītantra.*

Substance, country-made paper. 14½ × 4½ inches. Folia, 38B–39A. Lines, 11 on a page. In Tripāṭha form. Character, Bengali. Appearance, old and discoloured. Incomplete.

This MS contains only the fifth chapter of the work.

Beginning :—

अथातः संप्रवक्ष्यामि सिद्ध्युपायं प्रिवेश्वर ।
अज्ञात्वा + + का देवि अजप्ता गुरुपादुकाम् ॥
यात्रौ पर्य्यटनं नास्ति साधकः (कौकिलः) [कौलिकः] कथम् ।
कथं मन्त्राश्च सिध्यन्ति मन्त्रार्थज्ञानतः प्रिये ॥
कुब्जिका मूर्द्धि संजप्ता हृदि सेतुन्निचिन्तयेत् ।
महासेतुं विशुद्धौ तु मध्वारे विचिन्तयेत् ॥

End :—

तथा जपादिकं सर्व्वं निष्फलं नात्र संशयः ।
तस्मात् सर्व्वप्रयत्नेन प्रजपेन्मूर्द्धि कुब्जिकाम् ॥

Colophon :—

इति श्रीसिद्धिविरेश्वरीतन्त्रे कर्णिकापटलः पञ्चमः ।

5948.

5465. **सिद्धयोगेश्वरीतन्त्रम् ।** *Siddhayogeśvarītantra.*

Substance, Nepalese paper. 12 × 3¼ inches. Folia, 2–73. **Lines**, 6 on a page. **Extent** in ślokas, 1,300. Character, Newari. **Date**, N.S. 793. **Appearance**, fresh. Incomplete.

The MS from which the present MS was copied was apparently defective, for occasional lacunæ are met with in the latter, as in the 18th leaf which contains only two lines. It contains 32 chapters. The work is differently called *Siddhayogeśvarītantra*, °*mata* in different colophons and *Bhairavavīrasaṃhitā* in one colophon (Fol. 45A).

Colophons of the different chapters :—

2B, इति सिद्धयोगेश्वरीतन्त्रे प्रथमः पटलः; 4B, इति सिद्धयोगेश्वरीतन्त्रे व्याप्तिपटलो द्वितीयः; 8A, इति सिद्धियोगेश्वरीमते ग्रस्तिचयोद्धारस्तृतीयः पटलः; 8B, ॰विद्याङ्गोद्धारश्चतुर्थः पटलः; 9A, इति लोकपालोद्धारः पञ्चमः

पटलः; 12B, इति समयमखलपटलः षष्ठः; 15A, इति सिद्धयोगीश्वरीतन्त्रे सप्तमः पटलः; 19B, इति सिद्धियोगेश्वरी नवमः पटलः; 20B, इति विद्यासन-पटलो दशमः; 21B, इति सिद्धेश्वरीमते एकादशमः पटलः; 23A, इति सिद्ध-योगीश्वरीमते द्वादशमः पटलः; 24B, सिद्धियोगीश्वरमते त्रयोदशमः पटलः; 24B, इति सिद्धियोगीश्वरमते पञ्चदशमः पटलः; 28A, इति सिद्ध-योगीश्वरीमते षोडशमः पटलः; 32A, इति सिद्धयोगेश्वरीमते सप्तदशमः पटलः; 34A, इति सिद्धयोगेश्वरीमते अष्टादशमः पटलः; 35B, इति सिद्धि-योगीश्वरीमते एकोनविंशतितमः पटलः; 42A, इति सिद्धयोगेश्वरीमते खचक्रचूडविंशतिमः पटलः; 45A, भैरवगौरसिंहता[या]मेकविंशतिमः पटलः; 47B, इति योगिनीचक्रनिर्णयं द्वाविंशतितमः पटलः; 50A, इति सिद्ध-योगेश्वरीमते त्रयोविंशतिमः पटलः; 52B, इति चक्रोद्धारणमिदं चतुर्विंशतिमः पटलः; 58B, इति सिद्धयोगेश्वरीमते सिद्धिमण्डलविन्यासपञ्चविंशतिमः पटलः; 62B, इति सिद्धयोगेश्वरीमते मेलकाख्यषड्विंशतिमः पटलः 65B, •सप्तविंशतिमः पटलः; 68B, •अष्टाविंशतिमः पटलः; 71B, •एकोनत्रिंशतिः पटलः; 72A, •त्रिंशतिमः पटलः; 73A, •एकत्रिंशतिमः पटलः; last colophon, इति सिद्धयोगेश्वरीमते द्वात्रिंशतिमः पटलः समाप्त।

Post Colophon Statement :—

नेपालवत्सरे जाते वह्निरन्ध्रसमुद्रके।
अनन्तसिंहलिखितं सिद्धयोगेश्वरीमतम्॥
पुस्तकलिखनपरिश्रमज्ञो विद्वज्जनो नान्यः।
सागरलङ्घनखेदं हनूमानेकः परं वेत्ति॥

5949.

183. नीलतन्त्रम्। *Nīlatantra.*

Substance, country-made paper. 15 × 5½ inches. Folia, 25. Lines, 7 on a page. Extent in ślokas, 700. Character, Bengali. Appearance, fresh. Complete in 17 chapters.

This MS is described in L. I. 463. L. I. 215 seems to be the MS of a different work though it bears

the same name. The present MS contains **17** chapters, whereas the printed editions of it as published in the *Vividhatantrasaṃgraha* and in the *Sulabhatantraprakāśa* contain 12 chapters.

The succession of Gurus for Nīlasarasvatīvidyā is given in Fol. 7A as follows :—

ऊर्द्ध्वकेशो व्योमकेशो नीलकण्ठो वृषध्वजः ।
दिव्यौघा[:] सिद्धिदा वत्स सिद्धौघान् शृणुतापरान् ॥
वशिष्ठः कूर्मनाथश्च नीलनाथो महेश्वरः ।
हरिनाथ (वा)मानवौघान् शृणु वक्ष्यामि सद्गुरून् ॥
भवावती भानुमती जया विद्या महोदरी ।
सुखानन्द परानन्द पारिजातः कुलेश्वरः ॥
विरूपाक्षो देवहूती कथितं तारिणीकुलम् ।

Buddhist deities like Akṣobhya and Amitābha are here referred to as follows :—

Fol. 7B :—

अनेन मनुना देवि परिवारान् समर्चयेत् ।
अक्षोभ्यं वज्रपुष्पाद्यैः तारिणीमूर्द्ध्नि पूजयेत् ॥
यथा वैरोचनं शङ्खं पाण्डरं पद्मनाभकम् ।
अमिताभं यजेन्मन्त्री चतुर्दिक्षु चतुर्दले ॥

A good many Tantras are here referred to as follows (Fol. 17B) :—

शिव उवाच ।

श्रुतं भैरवतन्त्रञ्च योगितन्त्रं कुलार्णवम् ।
कुलाचारं तथा गुप्तसाधनं गुप्ततन्त्रकम् ॥
निर्वाणं समयाचारम् वीरतन्त्रं श्रुतं पुरा ।
डामरं डामरोड्डीशं श्रुतं कालीविलासकम् ॥
महाकोटिमहायज्ञं मम वक्त्रविनिर्गतम् ।
यामलं देवि ब्रह्माद्यं यामलं विष्णुयामलम् ॥

शिवयामलकं देवि यामलं मिश्रयामलम् ।
शक्तियामलकं देवि कथितञ्च श्रुतं त्वयि ॥
तथापि हृदयग्रन्थिरस्ति ते परमेश्वरि ।
पुरा सुकथितं तन्त्रं पुरा देवि त्वया श्रुतम् ॥
सङ्केतं समयाचारं तन्त्रसङ्केतकं तथा ।
कुलसङ्केतकं नाम मन्त्रेतं बहुविस्तरम् ।
श्मशानसाधनं भद्रे शवसाधनमेव च ॥
22A, एवं विद्यागमभूतं श्रुतं तन्त्रञ्च मोहनम्
कु(लौ)लोड्डीशं कुलीनस्य योगिनीहृदयं श्रुतम् ।
सम्मोहनं वीरतन्त्रं श्रुतं श्रीतन्त्रमुत्तमम् ।
कुलार्णवं तथा कालीतन्त्रं कालीविलासकम् ॥
श्रीकालीकल्पलतिका श्रुता परमसादरात् ।
मतभेदे च गुप्ता सा पूजाप्रकटनाशिनी ॥

5950.

3165. *Nīlatantra.*

Substance, country-made paper. 17 × 4 inches. Folia, 28. Lines, 6–8 on a page. Extent in ślokas, 750. Character, Bengali. Appearance, old and discoloured. Complete.

The present MS contains 15 chapters. This work does not agree with the one described under the previous No. or with the printed edition of the work of the same name. The beginning agrees with that of ***Bṛhannīlatantra*** in 9 chapters, published in the ***Sulabhatantraprakāśa*** and the ***Tantrasaṃgraha***, and with that of a MS of it in 23 chapters as described in L. IV. 1655.

Colophons of the different chapters :—

2A, इति नीलतन्त्रे सर्व्वतन्त्रोत्तमोत्तमे भैरवपार्व्वतीसंवादे सिद्धमन्त्रकथनं नाम प्रथमः पटलः; 4B, इति नीलतन्त्रे भैरवपार्व्वतीसंवादे सपर्य्याविधिर्नाम द्वितीयः पटलः; 5B, इति श्रीनीलतन्त्रे पञ्चाङ्गुद्धासविधिर्नाम तृतीयः पटलः;

6A, इति श्रीनीलतन्त्रे पुरश्चरणविधिर्नाम चतुर्थः पटलः ; 7A, इति श्रीनीलतन्त्रे सर्व्वतन्त्रोत्तमोत्तमे होमविधिर्नाम पञ्चमः पटलः ; 7B, ०तर्पणविधिर्नाम षष्ठः पटलः; 12B, ०भैरवपार्व्वतीसंवादे सप्तमः पटलः; 14B, ०अष्टमः पटलः; 18A, ०नवमः पटलः; 20B, ०दशमः पटलः; 21A, इति श्रीनीलतन्त्रे तारिणीस्तोत्रं समाप्तम्; 22A, ०एकादशः पटलः; 24A, ०द्वादशः पटलः; 26A, ०त्रयोदशः पटलः; 26B, इति श्रीनीलतन्त्रे सर्व्वतन्त्रोत्तमोत्तमे चतुर्दशः पटलः; 28A, ०पञ्चदशः पटलः।

5951.

323. शक्तिसङ्गमतन्त्रम् । *Śaktisaṅgamatantra.*

Substance, country-made paper. 18 x 4 inches. Folia, 1-319. (The number of folia should really be 309 as after Fol. 56 the numbers 67 etc., are given in place of 57, etc.) Lines, 7, 8 on a page. Extent in ślokas, 8,950. Character, Bengali. Date, Śaka 1674. Appearance, old. Incomplete.

The first part of this work in 21 chapters has been published in the Gaekwad's Oriental Series (Baroda, 1932) as also by P. Sarma (Bharat Subhacintak Press, Deoghar). This MS has been described in L. I. 405. The work is also described in I.O. IV. 2589 and Bik., No. 1320.

The numbers of chapters are occasionally wrongly indicated. Chapters 18ff in the first part of the work and 17ff in the third are respectively indicated through inadvertence as chapters 17ff and 16ff. Thus these parts really consist of 21 chapters each and not of 20 as would appear from the last colophons. Also according to I.O. (*loc. cit.*) the first part contains 20 chapters, the last of which agrees with the 21st chapter of the printed edition.

In Book II (Fol. 78A-198) colophons of chapters 10-18 and of chapters 21-22 and 27, are not found. Two chapters are indicated as 25 (Fol. 134A and 135B).

After the colophon of chapter 34 (Fol. 144B) is found the colophon of a chapter 30 (Fol. 146B). Presumably chapter 46 is wrongly indicated as 36 (Fol. 168A). This Book runs up to a portion of chapter 63 and not 65 as would appear from the description in L.

In Book III (Fol. 198, 201A–254A) the first two chapters are missing and the colophons of chapters 4–9 are not found.

In Book IV (Fol. 254–319A) the last chapter appears to be 11th and not 10th as given in the colophon, for 10 chapter-colophons are already found in the previous portions of the MS.

The names of the different parts of the work are not clearly mentioned in the colophons. The name *Tārāsūkta* occurs in the colophons of chapters 12 and 14 of Part I, chapters 25, 40, 51, 52, and 53 of Part II, chapters 4–10 of Part IV. The names *Tapasyākhaṇḍa* and *Kālīkhaṇḍa* are found respectively in the colophons of chapters 10 and 11 of Part III.

5952.

4337. *Śaktisaṅgamatantra.*

Substance, country-made paper. 16¼ × 4¼ inches. Folia, 1–72. Lines, 7 on a page. Extent in ślokas, 1,800. Character, Bengali. Appearance, fresh. Incomplete.

The present MS contains chapters XXIV–LVII of the second part of the work. The introductory portion of chapter XXIV is not found here. Of the 57th chapter we have here only the beginning.

5953.

4775. परातन्त्रम् । *Parâtantra.*

Substance, Nepalese paper. 9¼ × 2¾ inches. Folia, 1-41 of which Fol. 3 is missing. Lines, 6 on a page. Extent in ślokas, 680. Character, Newari. Appearance, old and discoloured. Complete.

The chapters are not indicated in the present MS but it is divided into sections the names of which are indicated by sectional colophons. On comparing it with the next MS it is found that the first six sections of this MS comprise the first chapter, and the other three sections comprise respectively the 2nd, 3rd, and 4th chapters of the work. The work has been described in IO. IV. 2590.

Beginning :—

ॐ नमः श्रीपरायै ।

खड्गसिद्धिसमाकीर्णे श्मशाने करवीरके ।
तत्र वीरगणाः सर्व्वे महाकल्लोलकूले ॥
निर्घोषितमहाचक्रे योगे भिदप्रकामरे ।
महानन्दे महाकारे गणडाकिनीयाचिते ॥
ब्रह्माद्या मातरश्चाष्टौ देवेशो भैरवादयः ।
गणेशवटुकाः सिद्धिः मातृचक्रे तु मेलके ॥
श्रीनाथादिगणाः सर्व्वे वीरनाथावतारिते ।
सिद्धिनाथां प्रकाशेन सन्तोषितकुलेश्वरः ॥
सर्व्वभूतां परित्यज्य सानन्दोल्लासिमानसः ।
सामरस्यस्थितं देवं पृच्छते कुलसुन्दरी ॥

श्रीदेव्युवाच ।

सर्व्वज्ञश्चो भवज्ञानं त्वत्प्रसादाच्छ्रुतं मया ।
यामलाष्टकपूर्व्वंसु तन्त्रानेकाविधानि च ॥

After the colophon of chapter 34 (Fol. 144B) is found the colophon of a chapter 30 (Fol. 146B). Presumably chapter 46 is wrongly indicated as 36 (Fol. 168A). This Book runs up to a portion of chapter 63 and not 65 as would appear from the description in L.

In Book III (Fol. 198, 201A–254A) the first two chapters are missing and the colophons of chapters 4–9 are not found.

In Book IV (Fol. 254–319A) the last chapter appears to be 11th and not 10th as given in the colophon, for 10 chapter-colophons are already found in the previous portions of the MS.

The names of the different parts of the work are not clearly mentioned in the colophons. The name *Tārāsūkta* occurs in the colophons of chapters 12 and 14 of Part I, chapters 25, 40, 51, 52, and 53 of Part II, chapters 4–10 of Part IV. The names *Tapasyākhaṇḍa* and *Kālīkhaṇḍa* are found respectively in the colophons of chapters 10 and 11 of Part III.

5952.

4337. *Śaktisaṅgamatantra.*

Substance, country-made paper. 16¾ × 4¼ inches. Folia, 1–72. Lines, 7 on a page. Extent in ślokas, 1,800. Character, Bengali. Appearance, fresh. Incomplete.

The present MS contains chapters XXIV–LVII of the second part of the work. The introductory portion of chapter XXIV is not found here. Of the 57th chapter we have here only the beginning.

एतन्मे भगवतीं शक्तिं निर्णेतुं परमेश्वरीम् ।
हृदयग्रन्थिसुदृढं सर्वथा परमेश्वर ॥
यद्येका परमा शक्तिराद्या प्रकृतिरीश्वरी ।
किमर्थं कस्य रक्षार्थं षडाम्नाय प्रकीर्त्तिता ॥

End :—

इत्येतत्तु समाख्यातं कालिकायाः कुलक्रमम् ।
विधानं परमं दिव्यं शास्त्रे कालिकमागते ॥
गोपनीयं प्रयत्नेन न दद्याद् यस्य कस्यचित् ।
गुरुभक्तिरतो यो हि महाशास्त्रमयो न सा ॥
रम्यपुष्पफलं दृष्ट्वा वस्त्रालङ्कारमेव च ।
आत्मप्रियाणि भक्ष्याणि यत्किञ्चित् भुवि दुर्लभम् ॥
गुरवे प्रथमं दत्त्वा ततः स्वात्मनि धारयेत् ।
गुर्व्वागमक्रमाद्भिन्ना पूजाकार्ये प्रजापयेत् ॥
गुरुसन्तुष्टमात्रेण सन्तुष्टा कालिकाक्रमम् ।
येनेदं लिखितं शास्त्रं यस्य हस्तेषु तिष्ठति ॥
तत्र स्थितं प्रपूज्यन्ते विधिवत् परमेश्वरी ।
सन्निधिं प्राप्य षण्मासं यावज्जीवति चैव हि ॥
पुस्तकं पूजितं येन इदं कालिकुलक्रमम् ।
समग्रं पूजितं तेन कालि कालविनाशिनी ॥
आब्रह्मस्तम्बसकलं कालेन कलयेत् सदा ।
तं कालं कालिका देवी कारयेत् सा युगे युगे ॥
न कालिसदृशी यज्ञो न कालिसदृशी तपः ।
न कालिसदृशी धर्म्मो न कालिसदृशी भुवि ॥
कौलभक्तः स विज्ञेयो महापापाम्नुयतः स वै ।
महायोगी विजानीहि कालिकापदसंस्थिता ॥
अहं स्वयंभुवो देवो मत्कृपार्थिनतोभवत् ।
कलौ विशेषतः काली पूजितव्या प्रयत्नतः ॥

देवतासंयुतं चित्रं वर्णितञ्चागमं प्रिये ।
यो ज्ञाता भैरवो देवी श्रोता तत्समो भवेत् ॥
स एकधा च बहुधा साधकानां हिताय च ।
नानातन्त्रप्रवाहास्तु नानाम्नायत्वमागता ॥
तन्त्रभेदे नामभेदा एका शक्तिः सहस्रधा ।
मङ्गला च महामाया चण्डा कापालिनी शिवा ॥
चामुण्डा चर्चिका चण्डा सृष्टिस्थित्यन्तकालिनी ।
घनाख्या च महाभासा गुह्यकाली जया परा ॥
सिद्धिलक्ष्मीर्विश्वलक्ष्मीर्महाप्रत्यङ्गिरा स्मृता ।
सुन्दरी त्रिपुरा चाद्य उग्रचण्डा प्रकाशिनी ॥
विभिन्ना बहुधा जाता नानाभेदसमाश्रिता ।
एका सानेकरूपा च याति या हितचक्षुषा ॥
स एव साधकः श्रेष्ठः सिद्धिज्ञानस्य भाजनम् ।
अनुष्ठानरता सर्व्वे सिद्धिभागी भवेद्ध्रुवम् ॥

Colophons of the different sections of the work :—

Fol. 6B—इति श्रीपूर्व्वेश्वरी पूर्व्वाम्नायः ।

Fol. 8B—इति श्रीपरातन्त्रे निःशेश्वरी दक्षिणाम्नाय ।

Fol. 11A—इति श्रीपरातन्त्रे पश्चिमसिंहासने कुब्जिका ॥ ३ ॥

Fol. 13A—इति श्रीपरातन्त्रे उत्तराम्नाय कालिक्रमः ॥ ४ ॥

Fol. 17B—इति श्रीपरातन्त्रे श्रीविद्या ऊर्द्ध्वाम्नायः ॥ ५ ॥

Fol. 18B—इति श्रीपरातन्त्रे महाकोलसि शिरश्छेदे करवीरमहायागे परातन्त्रे क्रमे द्वादशसाहस्रिकायां षडाम्नायभेदसूचनम् ॥ ६ ॥

[Here ends the first Paṭala.]

Fol. 32B—इति श्रीमहाकोलसि शिरश्छेदे करवीरयागे परातन्त्रे क्रमे द्वादशसाहस्रिकायां कालिक्रमनिर्णयसूचनम् ॥ २ ॥

[Here ends the second Paṭala.]

Fol. 38A—इति श्रीमहाकोलवि शिरश्छेदे करवीरयागे परातन्त्रे परमार्थनिर्णयः ।

[Here ends the third Paṭala.]

Fol. 45B—इति श्रीमहाकोलवि शिरश्छेदे महाकरवीरयागे परातन्त्रे कालिकुलक्रमः समाप्तः ।

[Here ends the fourth Paṭala.]

5954.

4779. *Parātantra.*

Substance, Nepalese paper of yellow colour. 9½ × 4¼ inches. Folia, 43. Lines, 9 on a page. Extent in ślokas, 500. Character, Nāgara. Appearance, fresh. Complete.

Same as above.

Colophons of the different chapters which are numbered in this MS :—

Fol. 18A—इति श्रीपरातन्त्रे पार्व्वतीश्वरसंवादे महाम्नायक्रमकथनं नाम प्रथमपटलः ।

Fol. 30B— ०कालीकुलक्रमनिर्णयं नाम द्वितीयपटलः ।

Fol. 36B— ०परमार्थनिर्णयकथनं नाम तृतीयपटलः ।

Fol. 43B— ०दुरक्षरक्रमकथनं नाम चतुर्थपटलः समाप्तः ।

5955.

10725. *Parātantra.*

Substance, country-made paper. 12 × 3¾ inches. Folia, 9. Lines, 9 on a page. Extent in ślokas, 243. Character, modern Newari. Date, Samvat, 287 (?). Appearance, fresh. Complete.

The present MS contains only the first chapter of the work.

Post Colophon :—

संवत् १७०७ मिति श्रावेन लिखिता ।

The date, given here, is not borne out by the hand-writing, which is very modern.

5956.

3400. तन्त्रचूडामणौ महापीठनिरूपणम् ।

Mahāpīṭhanirūpaṇa from the Tantracūḍāmaṇi.

Substance, country-made paper. 10 x 3¼ inches. Folia, 3. Lines, 9 on a page. Extent in ślokas, 66. Character, Bengali. Appearance, very old and faded. Complete.

This work describes 51 *pīṭhas* while the work noticed under No. 5880 above describes 18.

Beginning :—

श्रीश्वर उवाच ।

मातः परात्परे देवि सर्व्वागमयोश्वरि ।
कथ्यतां मे सर्व्वपीठशक्तिभैरवदेवता ॥

देव्युवाच ।

शृणु वत्स प्रवक्ष्यामि दयालो भक्तिवत्सल ।
याभिर्विना न सिध्यन्ति जपसाधनतत्क्रिया[ः] ॥
एकपञ्चाशतं पीठं शक्तिभैरवदेवता ।
अङ्गप्रत्यङ्गपातेन विष्णुचक्रक्षतेन च ॥
+ + + वपुषा देवहिताय त्वयि कथ्यते ।
ब्रह्मरन्ध्रं हिङ्गुलायां भैरवो भीमलोचनः ॥

End :—

अज्ञात्वा भैरवं पीठं पीठशक्तीश्च शङ्कर ।
प्रारब्धाय न सिध्येत कल्पकोटिशतैरपि ॥

न देयं परशिष्याय निन्दकाय दुरात्मने ।
शठाय क्रूरकर्म्माय दत्त्वा मृत्युमवाप्नुयात् ॥
दद्यात् शान्ताय शिष्याय मन्त्री मन्त्रार्थसिद्धये ॥

Colophon :—

इति तन्त्रचूडामणौ शिवपार्व्वतीसंवादे महापीठनिरूपणं समाप्तम् । ॐ तत्सत् ।

5957.

5303. *Mahāpīṭhanirūpaṇa from the Tantracūḍāmaṇi.*

Substance, Serampore paper. 17½ × 3½ inches. Folia, 2. Lines, 9 on a page. Extent in ślokas, 70. Character, Bengali. Appearance, fresh. Complete.

Same as above. The colophon of the present MS, apparently through the copyist's error, writes Candracūḍāmaṇi in place of Tantracūḍāmaṇi.

5958.

3711. **तन्त्रचूडामणिसारः ।** *Tantracūḍāmaṇisāra.*

Substance, country-made paper. 18 × 4 inches. Folia, 12. Lines, 8 on a page. Extent in ślokas, 200. Character, Bengali. Appearance, worn and pasted. Incomplete.

This MS contains only one chapter dealing with details of Tântric worship.

Beginning :—

शिवः शैवाश्च विप्रास्ते अपि सर्व्वेच दैशिकाः ॥
गणेशो गणपत्याश्च गणदीक्षाप्रभुर्मतः ॥
वरः सौराश्चया वत्स विष्णोर्विष्णुपरायणाः ।
दिव्यौघगुरवो देवि सिद्धौघगुरवस्तथा ॥

मानवौघाः समासेन कथयामि तवाग्रतः ।
सर्व्वतन्त्रेषु मन्त्रेषु प्रोक्ता मन्त्रचतुष्टयी ॥

Colophon :—

इति तन्त्रचूडामणिसारे भावचूडामणौ पटलः ।

5959.

676. **ऊर्द्ध्वाम्नायसंहिता ।** *Ūrddhvāmnāyasaṃhitā.*

Substance, country-made paper. 13 × 5 inches. Folia, 15. Lines, 10 on a page. Extent in ślokas, 300. Character, Nāgara. Appearance, tolerable. Complete in twelve chapters.

This is a treatise on Vaiṣṇavite faith in the form of an interlocution between Nārada and Vyāsa.

For a description of the work see L. I. 243 and Oxf. 301b. The work has been printed in Bengali characters with Bengali translation by Abhayā Charaṇa Tarkanidhi (Calcutta, 1285 B.S.).

It is a very late work as Gaurāṅga or Caitanya, the great Vaiṣṇava reformer of Bengal, is here referred to as an Avatāra in place of the Buddha and it gives the *mantra* for his worship.

5960.

2821. *Ūrddhvāmnāyasaṃhitā.*

Substance, country-made paper. $16\frac{1}{4} \times 5\frac{1}{4}$ inches. Folia, 4. Lines, 10 on a page. Extent in ślokas, 90. Character, Bengali. Appearance, fresh. Incomplete.

This MS contains the first three chapters and the beginning of the fourth.

5961.

4648. *Ūrddhvāmnāyasaṃhitā.*

Substance, country-made yellow paper. **Folia,** 8. **Lines,** 6 on a page. **Extent** in ślokas, 100. **Character,** Bengali. **Appearance,** fresh. Incomplete.

This MS contains the first four chapters of the work and a few lines of the fifth.

5962.

4608. ऊर्द्धाम्नायतन्त्रम् । *Ūrddhvāmnāyatantra.*

Substance, country-made yellow paper. 16 x 3¾ inches. **Folia,** 16. **Lines,** 6 on a page. Extent in ślokas, 325. Character, modern Bengali. **Appearance,** fresh. Incomplete.

The present MS begins from the third chapter and reaches up to a portion of the sixth. It deals with the nature of the human body, of Brahman and of the greatness of the guru.

Beginning :—

देव्युवाच ।

शरीरं कीदृशं नाथ मुक्तिर्वा केन कर्म्मणा ।
इदानीं श्रोतुमिच्छामि यदि मे प्रियमीश्वर ॥

ईश्वर उवाच ।

शृणु देवि प्रवक्ष्यामि शरीरं कर्म्मरूपिणम् ।
रजस्वला च या नारी विशुद्धा पञ्चमे दिने ॥
पीड़िता कामबाणेन ततः पुरुषमीक्षते ।
भगलिङ्गसमायोगाच्छ्लेषणं स्यात्तथा तयोः ॥
अन्योन्यस्पर्शनादेव जायते च महत् सुखम् ।
चलते च तथा रेतः प्राणापानविसंस्थिते ॥

क्षितिरापस्तथा तेजो वायुराकाशमेव च ।
सर्व्वेषां तत्र तनुः स्यात् देहस्थं रक्तजीवयोः ॥
नाभिरन्ध्रे तथा देवि भ्राम्यते च समीरणैः ।
कुम्भकारो यथा चक्रे घटते च घटादिकम् ॥
तथा समीरणो गर्भे घटते प्राणिनां तनु ।
कललं चैकरात्रेण बुद्बुदं पञ्चमे दिने ॥
शोणितं दशरात्रेण मांसपिण्डं चतुर्द्दशे ।
मासैके चैव सम्पूर्णे मांसपिण्डोऽङ्कुरायते ॥
आदौ संजायते जीवो ब्रह्माण्डे सहस्राङ्कुरः ।
तस्य मध्ये सुमेरुश्च कल्पान्तदहनरूपकः ॥
चराचराणां सर्व्वेषां देवादीनां विशेषतः ।
आलयः सर्व्वभूतानां मेरोरभ्यन्तरेऽपि च ॥
प्रदीपकलिकाकारो जीवो हृदि सदा स्थितः ।
रज्जुबद्धो यथा श्येनो गतोऽप्याकृष्यते पुनः ॥
गुणबद्धस्तथा जीवः प्राणापानेन कृष्यते ।
जीवस्य परमेशानि परिवारगणान् शृणु ॥

End:—

यावतः कुरुते जन्तुः सम्बन्धान् विषयप्रियान् ।
तावन्तस्य निखन्यते शरीरे शोकसङ्कराः ॥
स्वदेहमपि जीवोऽयं त्यक्त्वा याति महेश्वरि ।
स्त्रीमातृपितृपुत्रादिसम्बन्धः केन हेतुना ॥
दुःखमूलं हि संसारः स यस्यास्ति स दुःखितः ।
तस्य नाशः + + + + +

5963.

3175. काल्यूर्द्ध्वाम्नायतन्त्रम् । *Kālyūrddhvāmnāyatantra.*

Substance, Serampore paper. 13 × 4½ inches. Folia, 25. Lines, 10 on a page. Extent in ślokas, 540. Character, Bengali. Appearance, discoloured. Complete.

The present MS, as does also the one described in L. V. 1743, contains chapters I–V. The work is also described in CS. V. 22, where no reference is made to the number of chapters, and in VSP where the work is called *Ūrddhvāmnāyatantra.*

5964.

2896. **श्यामामोदतरङ्गिणी ।** *Śyāmāmodataraṅgiṇī.*

Substance, country-made yellow paper. 17 × 4 inches. Folia, 12. Lines, 5 on a page. Extent in ślokas, 210. Character, Bengali. Appearance, fresh. Complete.

The present MS contains 12 chapters. The work deals with the efficacy of the different mantras of Kālī (e.g. ककारमनु—2B, आकारमनु—3A, लकारमनु—3B, ईकारमनु—5A). It also lays down in brief the rules for her worship.

Beginning :—

श्रीपार्व्वत्युवाच ।

भगवन् सर्व्वतत्त्वज्ञ महाभूत परात्पर ।
नमामि नाथ देवेश भवन्तं जगदीश्वरम् ॥
त्वन्मायया जगतीधाम्ना यया संमोहिताः सुराः ।
त्वमेव जगतां कर्त्ता त्वमेव परमेश्वरः ॥
... ...

महाभूत उवाच ।

... ...
... ...
एकैव सूक्ष्मरूपास्ति तस्याः कल्पितमीच्छया ।
काली भवति सा साक्षात् सा नित्याप्यभिधीयते ॥

तस्या रतीच्छया कालो जायते परमेश्वरि ।
तदिच्छया महाताग ततोऽपि त्रिपुरा परा ॥
ततः सर्व्वा महाविद्या भक्तचिन्तार्थकल्पिताः ।
कालीकालकमाख्यातब्रह्मविष्णुशिवादयः ॥
ब्रह्मेच्छया जगत् सर्व्वं विष्णोर्विश्वरूपात्मने ।
शिवेच्छया जगद्धंसो देवि निश्चितमीरितम् ॥

... ...

ककारः कालिका साक्षात् ककारः सर्व्वसिद्धिदः ।
कदाचित् केन रूपेण भ्रमविज्ञानतोऽपि वा ॥
यः स्मरेत् मोक्षमाप्नोति सत्यं मे निश्चिता मतिः ।

End :–

दिव्यभावमतं देवि कथितं चादियामले ।
तत्कृत्वा सिद्धिमायाति शिवरूपो भवेद्यदि ॥

Last Colophon :—

इति श्यामामोदतरङ्गिण्यां महाभूतप्रोक्तायां द्वादशः पटलः ॥

5965.

6077. शिवनृत्यतन्त्रम् । *Śivanṛtyatantra.*

Substance, Kashmere paper. 8¼ × 6¼ inches. Folia, 9. Lines, 12, 13 on a page. Extent in ślokas, 80. Character, Śāradā. Foi. 1–2A are written in modern Kashmeri. Appearance, new. Complete.

The work deals with different mystic diagrams of Tântrik worship and the present MS contains nine chapters.

Beginning :—

श्रीगणेशाय नमः ।
ॐ श्रीदेव्यै सिद्धिदायिन्यै नमः ।

श्रीभैरव उवाच।

ॐ महाकल्पावसाने तु परिपप्रच्छ पार्व्वती।

गिरिशं [f]शरसा नत्वा चन्द्रार्द्धकृतशेखरम्॥

श्रीदेव्युवाच।

देवदेव महादेव सृष्टिस्थित्यन्तकारक।

पूर्व्वमुक्तानि यन्त्राणि कथयस्व कृपानिधे॥

श्रीदक्षिणामूर्त्तिरुवाच।

प्रष्टुव्यावहिता+ +गिरिजे प्राणवल्लभे।

अकथ्यं परमार्थेन तथापि कथयाम्यहम्॥

End :—

इदं गोप्यतरं तन्त्रं तवैवाग्रे प्रकाशितम्।

किं बहुक्तेन देवेशि कलौ कल्पतरूपमम्॥

Colophons of the different chapters :—

1B, इति दक्षिणामूर्त्तिपार्व्वतीसंवादे शिवतन्त्रे नवकोष्ठ(?)विधि प्रथमः पटलः; 2A, पञ्चविंशतिको द्वितीयः पटलः; 3A, एकोनपञ्चाशं कोष्ठविधि-स्तृतीयः पटलः; 3B, एकाशीतियन्त्रं चतुर्थः पटलः; 5A, पञ्चमः पटलः; 5B, षष्ठः पटलः, 6B, सप्तमः पटलः; 7A, चतुःष + + विधिरष्टमः पटलः; 9A, शतकोष्ठयन्त्रं नवकोष्ठयन्त्रं नवमः पटलः। समाप्तम्।

Post Colophon Statement :—

सं २७ माघवति प्रतिपदि विद्यालक्ष्मपालुना स्वार्थे लिखितम्।

The reverse of the last leaf and one entire leaf, not numbered, give various diagrams.

5966.

9557. शिवताण्डवम्। *Śivatāṇḍava.*

Substance, country-made paper. 12×5 inches. Folia, 17. Lines, 14 on a page. Extent in ślokas, 714. Character, Nāgara. Appearance, old. Complete.

The work appears to be divided in two parts, and the present MS comprises the latter part in 15 chapters.

Beginning :—

श्रीगणेशाय नमः ।

अजस्रमदनिष्यन्दलग्नभृङ्गैर्ललितालकैः ।
कवलीकृतविघ्नौघपुराणकरिणे नमः ॥

देव्युवाच ।

देवदेव महादेव जगन्नाथ जगत्पते ।
त्वत्प्रसादाच्छ्रुता नाथ विद्याभेदाह्यनेकशः ॥
इदं मे कृपया नाथ सद्यः प्रत्ययकारकं ।
प्राणान्तं मे करिष्यामि यदि नो कथ्यतेऽधुना ॥

ईश्वरोवाच ।

अ + कार सहस्राणि चारितानि पुनः पुनः ।
स्त्रीस्वभावाच्च तरले किं पृच्छसि वदस्व तत् ॥

देव्युवाच ।

सूचितव्यं पुरा नाथ ताण्डवं न प्रकाशितं ।
स्त्र्यौत्सुकेन महेश यथावत्तं पुरा कृतम् ॥
ताण्डवान्तर्गतं तत्त्वं षट्सु कर्मसु मे वद ।

ईश्वरोवाच ।

अप्रकाश्यमिदं देवि प्राणैः कण्ठगतैरपि ।
तव स्नेहात् प्रवक्ष्यामि नराणां वाञ्छितप्रदं ॥
किंवा कर्तुं शक्यते च ताण्डवेन विना नरः ।

End :—

न दारिद्र्यवशं याति पुत्रपौत्रादिभिः सह ।
स(च) देशः सिद्धक्षेत्रं स्यात् शतयोजनमायतं ।
यत्र तिष्ठति देवेशि लिखितं शिवताण्डवम् ।

Colophons of the different chapters :—

Fol. 2A, इति शिवताण्डवे देवीश्वरसंवादे प्रथमः पटलः; 3A, ॰द्वितीयः पटलः; 4A, ॰तृतीयः पटलः; 5B, ॰चतुर्थः पटलः; 6B, ॰पञ्चमः पटलः; 8B, ॰षष्ठः पटलः; 9A, ॰सप्तमः पटलः; 11A, ॰अष्टमः पटलः; 12A, ॰मन्त्राद्विद्योपाख्यानं नाम पटलः; 12B, ॰दशमः पटलः; 13A, ॰एकादशः पटलः; 14A, ॰द्वादशः पटलः; 14B, ॰त्रयोदशः पटलः; 15B, ॰चतुर्दशः पटलः; 17B, ॰इति शिवताण्डवे पार्वतीश्वरसंवादे उत्तरखण्डे पञ्चदशः पटलः। समाप्तोऽयं ग्रन्थः।

Post Colophon Statement :—

हरिकृष्णचक्रवर्त्तिनः पुस्तकमिदं। शुभमस्तु।

5967.

9556. *Śivatāṇḍava.*

Substance, country-made paper. 13 × 5¼ inches. Folia, 21. Lines, 8-10 in a page. Extent in ślokas, 900. Character, Nāgara. Appearance, old. Incomplete.

This MS contains chapters 12, 13, and 14 of the first part. The second part is referred to by Nīlakaṇṭha in his commentary (No. 5968 ff) on XII. 5 of the work.

Beginning :—

परमभैरव उवाच।

अथ देवेशि वक्ष्यामि परमाद्भुतकारणम्।
यन्न कस्यचिदाख्यातं तत्ते वक्ष्यामि साम्प्रतम्॥
शृणुष्वैकमनाः कान्ते मन्त्रमातृकयामिनि।
मन्त्रवस्तुपरिज्ञानं पृथक् पृथक् यथा तथा॥
वश्यार्थे भूर्जपत्रे तु मोहने रौप्यपत्रके।
मारणे लोहपत्रे तु स्तम्भने पैत्तलं मतम्॥

विद्धेषे तु स्मशानस्य चीवरं समुदाहृतम् ।
आकर्षे सीसजं प्रोक्तं राज्यार्थे ब्रह्मचर्मजम् ॥

End :—

+ + यन्त्रं यन्त्रराजाभिधं तुभ्यं मयोदितम् ।
गोपनीयं प्रयत्नेन स्वयोनिरिव पार्व्वति ॥

Colophons of the chapters :—

Fol. 4A, इति श्रीसर्व्वतन्त्रोत्तमोत्तमे पार्व्वतीश्वरसंवादे लेख्यकथनं नाम द्वादशः पटलः; 11A, इति श्रीसर्व्वतन्त्रोत्तमोत्तमे दक्षिणामूर्त्ति-पार्व्वती-संवादे नगेन्द्रप्रयाणे शिवताण्डवमहातन्त्रे नवकोष्ठकात्मकयन्त्रकथनं नाम त्रयोदशः पटलः; 21A, इति श्रीदक्षिणामूर्त्तिपरमभैरवसंवादे सर्व्वतन्त्रोत्तमोत्तमे नगेन्द्र-प्रयाणे शिवताण्डवषोडशकोष्ठलिखनप्रकारकथनं नाम चतुर्दशः पटलः समाप्तः ।

5968.

3323. *Śivatāṇḍavatantra.*

Substance, country-made paper. 14 × 5½ inches. Folia, 57. In tripāṭha form. Character, Nāgara. Date, Saṃvat 1897. Appearance, fresh. Incomplete.

The present MS is accompanied by Nīlakaṇṭha's commentary and contains chapters XII–XIV of the first part. The commentary is described in HPR. I. 360. In the beginning of the commentary the author refers to several other works by himself, e.g. the commentaries on *Mantra-bhāgavata*, *Mantrarāmāyaṇa*, and *Mantramahābhārata*. The authoritativeness of the Tantras as also of the mantras, both in Sanskrit and the vernaculars, is discussed and it is argued that the Tantras form part of the Purāṇas.

The genealogy and the achievements of the family of the royal patron of the commentator are given thus (Fol. 1B):—

यमर्थं प्राप्य नाकं हसति नवमही भूरुषं बन्धनत्वम्
प्राप स्वः नामकश्रीपदमचलमभूत् पूर्व्विकानेरनाम्नो ।

सूरः श्रीमान् वदान्यः प्रमदमवहितो नीतिविद्यागुरूणाम्
आद्यः सोऽद्यापि कीर्त्या भ्रमति विजयते रायकल्याणमल्लः ॥

तमजनि विक्रमनगरे राजा श्रीरायसिंहाख्यः ।
यस्मिन् ददति गजौघान् गजपतिभावं गतोऽविपालोऽपि ॥

दोषादिव प्रदीपस्तस्माच्छ्रीसूरसिंहोऽभूत् ।
मारवधूवोढारं यं कन्यात्मानम् उदूढं मेने ॥

वदान्यानां मूर्द्धि स्फुरतु लभतां सूरसुततां
कुलस्यामीषामानवतु ककुभो वा विजयतां ।
परप्रीतश्रीको विजयविजितो भूविधुरितः
कथं वा राधेयः कलयतु महाकर्णसमताम् ॥

श्रीमाननूपपूर्वेन्द्रः कर्णस्त्रीगर्भसम्भवः ।
यत्कीर्तिकौमुदी भाति विश्वसन्तापमुक्तये ॥

लोह-दारु-दृषदामिवोदराद्यस्य सारशिवताण्डवादिव ।
केन वोपकरणेन कः पुमान् यन्त्रवित्तमुपनीय दर्शयेत् ॥

जयत्यनूपभूपोऽसौ सदाज्ञावलयोगतः ।
भिन्दन्नभेद्यमप्यर्थं शौर्यपाण्डित्यशालिनः ॥

श्रीमत् स्फूर्जदनूपभूपतिमहाशोभे निसर्गोज्ज्वले
श्रीमत्मकुन्दवाक्यवीअनिनयानुज्ञा समुत्पादितः ।
श्रीमच्छ्रीधरनीलकण्ठवरिष्ठा यत्नं विना भूयसे
भूयात् दिव्यफलाय यन्त्रतिलकारामोपमोऽयं कृतः ॥

The name of the commentary is thus indicated (Fol. 2A):—

शिवताण्डवटीकेयमनूपारामसंज्ञिता ।
यन्त्रकल्पद्रुममयी द[त्ता]वोऽभीष्टसन्ततिम् ॥

The beginning of the text is found in Fol. 8A, the first seven leaves being taken up with the commentator's introduction (*upodghāta*).

The Last Colophon :—

इति श्रीमत्समस्तसामन्तचूडामणि-मरीचिमञ्जरीसमर्चित-पादपीठोपान्तभूमिना श्रीमन्महाराजाधिराज-कर्ममहाराज-सूनुना श्रीमदनूपसिंहेन प्रेरितपदवाक्यप्रमाणमर्यादाधुरन्धर-चतुर्धरवंशावतंस-गोविन्दसूरिसूनोर्नीलकण्ठस्य कृतौ श्रीशिवताण्डवीय तन्त्र-यन्त्रव्याख्याने अनूपारामसंज्ञे षोडशकोष्ठलेखनप्रकारकथनं नाम चतुर्दशः पटलः समाप्तः। समाप्तेयं टीका।

Post Colophon Statement :—

संवत् १८९७॥ माघशुक्ल ११॥ श्रीगुरवे नमः॥ श्रीकृष्णाय नमो नमः॥

5969.

5566. *Śivatāṇḍavatantra.*

Substance, country-made paper. 11 × 5 inches. Folia, 58. In tripāṭha form. Character, Nāgara. Date, Saṃvat 1917. Appearance, fresh. Incomplete.

This MS also contains chapters XII–XIV inclusive of the first part of the work. The text is accompanied by the commentary of Nīlakaṇṭha.

Post Colophon Statement :—

संवत् १९१७ भाद्र शुक्लतिथौ विद्याधरद्विवेदिना लिखितम्।

5970.

9477. *Śivatāṇḍavatantra.*

Substance, country-made paper. 10 × 4 inches. Folia, 9. Lines, 12 on a page. Extent in ślokas, 214. Character, Nāgara. Appearance, fresh. Fragmentary.

It contains 27 verses and a portion of the 28th of Chapter XII of the work and is accompanied by the commentary of Nīlakaṇṭha.

5971.

5720A. *Śivatāṇḍavatantra.*

Substance, country-made paper. 9¾ × 4½ inches. Folia, 1-127. Lines, 11 on a page. Character, Nāgara. Appearance, discoloured. Incomplete at the end.

The MS contains Chapter XII and 45 verses of Chapter XIII. It is accompanied by the commentary Mallādarśa by Ghanaśyāma. The commentary is full of polemic discussions and deals with the work proper from Fol. 29A, the previous portion being devoted to preliminary discussions.

Beginning :—

श्रीरामराजेन्द्राय नमः ।

समस्तत्राभावेऽप्यपरसुरभक्तत्वविरहात्

अपात्यत्वं मत्वा हृषिकतरकामा[illegible] ।

प्रपञ्चन्नं + + + + वसतौ न [illegible]

मा चिन्ताः कमपि भज चेतः प्रतिदिनम् ।

कौबेर्यां दिशि नाकमेर्वभिधया ख्यातोऽस्ति कश्चिद् गिरिः

गङ्गायाः सविधे हि तत्र नृपतिः श्रीराघवाख्योऽभवत् ।

यं प्राप्याप्ततभानुभानुवगभित्कन्दर्पकल्पद्रुता

संदेहं यजुर्वेदिनोऽपि मनुजा व्याकरणमापेदिरे ।

तस्माज्जातः श्रीघनश्यामममभः सर्वं तातं रा[illegible]र्विहाय ।

वर्णं श्रीमं कृषितं तद्वि कोम्बो जयीताय [illegible]प्रामदेयात् ।

तदीयः सुतः श्रीमदैवज्ञनामा

कपालः सर्वज्ञावतंसोभवं तः (?) ।

वरेण्यं समार्जिर्ं [illegible]ोऽयमीशो

भवन्महितापार्हितायुक्तसूक्तिः ।

मन्त्राक्षरमिश्रो भवन्ति तदनुध्यानेन तत्स्था गुणाः
ज्ञातव्यैवमसौ स्तवो भगवतः श्रीरामचन्द्रस्य वत् ।
ध्यानादेकफलप्रदानसुरवरावासोऽन्नवत्सन्मेतुला-
ग्रम्भुव्यापकतादिकानिव गुणानासादयत्युत्तमान् ॥
अमुष्येवागल्या भवति करुणा लोकनिवहे
सतां दत्त्वा मध्यप्रभृति बहुदुःखं ग्रमयतः ।
समुद्धाव्यर्थौघोद्भवदमितदुःखक्षयकृते
दुरूहां यन्त्रालीं प्रकटयितुमाशां रचयतः ॥
यन्त्रावलीं रचयतः शिवतोऽपि चासौ
भूपान् कृपालुरिव तां प्रकटीकरिष्यन् ।
दुर्बोधसारकलिता न हि सेव्यसिद्धै
चित्रं न तत्र हरिरेव नृपालवेषः ॥
नृपालेनादिष्टो दिनकरगुरुश्चिन्त्यभजनः
प्रभोर्मार्त्तिव्याख्यारचनमखशीतांशुकिरणैः ।
महाप्राताज्ञानप्रततिभिरग्रन्दार्थरचनः
कथं वा नो कुर्य्यादयमपि जनो ग्रन्थममलम् ॥
शिवताण्डवयन्त्राणां ग्रन्थार्थादर्शतां गतः ।
मन्त्रादर्शो मम ग्रन्थः स रञ्जयतु पण्डितान् ॥
शिवताण्डवटीकेयं स्वल्पाल्पापि सुधीगणां ।
व्याख्येयार्थगुणौघैः सर्व्वार्थाकर्षिणी भवति ॥

अथ जगदेव स्वस्वपूर्व्वपूर्व्वजन्मसञ्चितदुरदृष्टसामर्थ्यनियमितदारिद्र्यादिनाना-विधदुःखपङ्कनिमग्नमुद्दिधीर्षुः परमकारुणिको भगवान् सदाशिवः संहितोड्डामर-यामलादिनानातन्त्रेषु चन्द्रदीपमहादीपजपहोमप + + + दिरूपं अमितमुपायमुदा-जहार । तस्य स्वसमर्थानधिकारादिना न सर्व्वविषयत्वं भवतीत्यपरितुष्टो भूय-स्त्रीयतो ध्यानमात्रादेव अमोघितपरम्परामव्यभिचारादुत्पादयन्तीमद्भुतयन्त्रावलि-माविर्भावयितुं नैसर्गिकदासवे नापि स्वप्रियभावमदधते नापि स्वाभक्तायोपदेश्यमिति सूचयितुं शिवताण्डवाख्ये तन्त्रे विशेषेण देवीश्वरयोः प्रश्नत्वेन श्रीकृत्य तदुत्तरकथनव्याजेन पूर्व्वं यन्त्रमात्रस्वरूपोपयोगिपदार्थसार्थमाह दक्षिणामूर्त्तिरुवाचेत्यादिना ।

5A, नन्वेवं तन्त्रोक्तवेदविरुद्धमार्गस्यापि प्रामाण्यं प्रसज्येतेति चेत् प्रसज्यतां, का नो हानिः। "अथ मदिरां पिबेत्" "प्रयत्नेन्मदनावासं परस्त्रीणां विशेषतः" "कोटिभगदर्शनान्मुक्ति"रित्यादितान्त्रिकार्थानुष्ठानार्थं शिष्टानामपि प्रवृत्त्यापत्तिरिति चेत् सत्यं। "श्येनेनाभिचरन् यजेत" इत्यादि वेदविहित-श्येनादियागे न कुतस्तेषां प्रवृत्तिः। अथ वेदविहितत्वमात्रं न शिष्टकर्तृकानुष्ठान-विषयत्वे तन्त्रं किन्तु वेदाप्रतिषिद्धत्वविशिष्टं तत्। भवति चेदं विहितमपि न हिंस्यात् सर्वा भूतानि इत्यादिविधिना प्रतिषिद्धमिति चेत्। एवं तर्हि "ब्राह्मणो मदिरां पीत्वा ब्राह्मण्यादेव हीयते" इत्यादितान्त्रिकस्मार्त्तादिवचनैस्तस्य प्रतिषिद्धतया कथं तत्र ते प्रवर्त्तेरन्। अथ पानादिप्रशंसावचनानां का गतिरिति चेत् या गतिः श्येनादियागवचनानाम्। अथ प्ररोचनाभिः तत्तदधिकारिणां तत्र तत्र प्रवर्त्तनेन तत्तत्काम्यार्थाधिगमन एव तेषां तात्पर्य्यं न तु परमपुरुषार्थ-प्रत्यूहपापापूर्व्वपरिहारेऽपीति चेत् इहापि निर्णीयतां सैव दृष्टिः। किं च निषेधवचनानां त्वन्मते त्रिगतिरेव न हि तेषां निन्दाकरणेन ततो निवृत्तिः फलं ततो निवृत्तेस्तत्रानभिप्रेतत्वात्। अथ तत्तदैहिककाम्यफलसाधनार्थमेव तत्र प्रवृत्तिरिष्यते। तत्र कामनानुरागात् प्रवृत्तस्य पारलौकिकमनिष्टं नरकादिरूपं भविष्यतीति चेत् एवं तर्हि सिद्धं नः समीहितम्। न ह्येतावतापि ब्राह्मणादि-निषिद्धार्थबोधकभागस्याप्रामाण्यं श्येनादेरनुष्ठानेऽपि न हि तद्भागस्याप्रामाण्यं कश्चिदप्याचष्टे। ... ...

The conclusion drawn is:—

6B, मन्मते तु वेदाविरुद्धभागस्य प्रामाणिकतया तद्व्याख्यार्थं विशेषणा-मावश्यकमिति संक्षेपः। अत्र नीलकण्ठाः। ... ... इत्यादि आगममूलकत्वमेव षट्त्रिंशदाद्यंकपन्नानाम्। अयं ह्येतस्याः श्रुतेरर्थः।

Colophon:—

79A, इति सर्व्वतन्त्रोत्तमे दक्षिणामूर्त्तिपार्व्वतीसम्वादे पूर्व्वखण्डे द्वादशपटलः सम्पूर्णः।

5972.

5621A. मुण्डमालातन्त्रम् । *Muṇḍamālātantra.*

Substance, palm-leaf. 14 × 1½ inches. Folia, 27. Lines, 4-5 on a page. Extent in ślokas, 550. Character, Udiya. Appearance, good. Complete.

The present MS runs up to the end of the 15th chapter. L. I. 469, II. 740 have only six chapters each. VSP (p. 44) notices a MS of the work in 11 chapters.

The beginning of the work does not agree with that of L. I. 469 and L. II. 740, the first few lines of the last of which agree with those of the *Kālyūrddhvāmnāyatantra* (No. 5963 above). The work deals with Śakti worship in general and the worship of the ten *Mahāvidyās* in particular.

Beginnings of the different chapters :—

श्रीइष्टदेवतायै नमः ।

मेरुपृष्ठे समासीनं देवदेवं जगद्गुरुम् ।

प्रश्नं परिपप्रच्छ पार्व्वती परमेश्वरम् ॥

श्रीपार्व्वत्युवाच ।

सर्व्वानन्दमयीं नत्वा सर्व्वाम्नायनमस्कृताम् ।

सर्व्वसिद्धिप्रदां देवीं नमामि परमेश्वरीम् ॥

प्रसीद गुह्यवक्त्रान्ते कथयस्व प्रियम्वद ।

सर्व्वतन्त्रेषु मन्त्रेषु गुह्यं मत् पञ्चवक्त्रकम् ॥

तत्प्रकाशय गुह्याख्यं यद्यहं तव वल्लभा ।

श्रीशिव उवाच ।

कथान्ते कथयिष्यामि गुह्यं मत्पञ्चमात्मकम् ।

स्त्रीस्वभावान्महाभागे न जानामि सुखप्रदम् ॥

देव्युवाच ।

स्वस्थियहं भविष्यामि न वक्तव्यं कदाचन ।

तव वक्त्रा भविष्यन्ति भावनामन्त्रसिद्धयः ॥

श्रीशिव उवाच।

देवतागुरुमन्त्राणां भावनामेवमुच्यते।
मन्त्रो यो गुरुदेवासौ यो गुरुः सा च देवता॥
काली तारा महाविद्या षोडशी भुवनेश्वरी।
भैरवी छिन्नमस्ता च रमा धूमावती परा॥
बगला सिद्धविद्या च मातङ्गी कमलात्मिका।
एता दश महाविद्याः सर्व्वतन्त्रेषु कीर्त्तिताः॥
अयन्तु दुर्लभो लोके यत्नाज्ञायतमन्त्रतः।
एताभ्यः परमा भक्त्या त्रिषु लोकेषु दुर्लभा॥
सुखमोक्षप्रदा नित्या लोकसाधन कुत्रचित्।
येन येन प्रकारेण सिद्धिं यास्यसि भूतले।
सर्व्वान्ते कथयिष्यामि प्रेमभावेन केवलम्॥
नात्र सिद्धाद्यपेक्षास्ति न च नक्षत्रविचारणा।
कालादिशोधनं नास्ति न च मित्रादिदूषणम्॥
सिद्धिं विद्या महाविद्या युगमेवापरिश्रमः।
नात्र कश्चिन्महादेवि दुःखसाध्यं न किञ्चन॥
या काली परमा विद्या सा तारा परिकीर्त्तिता।
या तारा परमा विद्या सैव काली प्रकीर्त्तिता॥
एतयोर्भिन्नभावेन मन्त्राः सिद्धा भवन्ति न।
उक्तन्तु कालिकातन्त्रे ताराकल्पे च तन्मया॥
षोडशी या महाविद्या चतुर्थी कथिता पुरा।
लक्ष्मीबीजादिभावेन पञ्चमी सा भवेदिह॥
प्रकाशगौरीबीजहीना महाविद्या भवेत् पुरा।
भुवने यन्त्रगौ पातु महाविद्या प्रकीर्त्तिता॥

देव्युवाच।

त्वया विद्या च देवेश कथिता न प्रकाशिता।
इदानीं कथयिष्यामि चाद्ययानन्दसुन्दर॥

ईश्वर उवाच ।

भुवनेशा महाविद्या देवराजेन वै पुरा ।
आराधिता च विद्येयं ब्रह्मज्ञानेन मोहिता ॥
एकाक्षरी बीजहीना वाग्भवेनोज्ज्वला परा ।
कामराजाख्यविद्या सा सुसिद्धा पुष्पगन्धिका ॥
शक्तेश पूजिता पूर्व्वं भुवनेशी प्रतिष्ठिता ।
कुमारी या च मार्य्येयं त्वया गुप्ता रतिच्युता ॥
केवलं शिवभावेन शक्तिरूपेण केवलम् ।
माया प्रतिष्ठिता देवी ताराचन्द्रस्वरूपिणी ॥
भैरवी तु महाविद्या महासम्पत्करी शुभा ।
छिन्नमस्ता सुरामांसप्रिया रक्तस्वरूपिणी ॥
धूमावती महाविद्या मारणोच्चाटने मता ।
बगला वशस्तम्भादि नानागुणसमन्विता ॥
मातङ्गी तु महाविद्या त्रैलोक्यवशकारिणी ।
कमला त्रिविधा प्रोक्ता एकाक्षरतया स्थिता ॥
एकाक्षरी महाविद्या सर्व्वसम्पत्प्रदायिनी ।

Chapter II (Fol. 2A) :—

श्रीदेव्युवाच ।

अक्षमालेति कथिता यत्नेनैव प्रकाशिता ।
अक्षमालेति किं नाम फलं किं वा वदस्व मे ॥
अक्षमाला तु देवेशि काम्ये नैमित्तिके तथा ;
भवत्यत्रापि गुह्योऽपि विस्तरात् कथ्यते मया ॥

Chapter III (Fol. 4A) :—

देव्युवाच ।

ज्ञानासनं देवदेव कथयानन्दहेतवे ।
मदाश्रया विनिर्दिष्टाः सर्व्वे मन्त्राः सुसिद्धिदाः ॥

ईश्वर उवाच ।

नदीतीरे बिल्वमूले श्मशाने शून्यवेश्मनि ।
महालिङ्गे पर्व्वते वा देवागारे चतुष्पथे ॥
शवस्योपरि मुण्डे वा जलकराटकपूरके ।
संग्रामभूमौ वा योनौ वा श्मशाने विजने वने ॥

Chapter IV (Fol. 5A) :- -

देव्युवाच ।

केवलं बलिदानेन तुष्टा भवति चण्डिका ।
कथितं पूर्व्वमखिलं प्रकाशं कुरु शङ्कर ॥

ईश्वर उवाच ।

अत्यन्तगुह्यं देवेशि विधानं बलिपूजनम् ।
कथयामि वरारोहे स्वस्वभावेन सुन्दरि ॥
दधिक्षीरं गुडं चान्नं पायसं शर्करान्वितम् ।
पायसं क्षीरमक्तं नारिकेलफलोदकम् ॥
मद्यञ्च दिव्यं दद्यात् मांसं माहिषमेव च ।
पायसं छागमांसञ्च नारिकेलसमोदकम् ॥
शशकं मेषखण्डञ्च मार्द्रकञ्च सशर्करम् ।
रम्भाफलञ्च लड्डुकं भर्जितान्नञ्च पिष्टकम् ॥

... ...

... ...

... ...

छागे दत्ते भवेद्वाग्मी मेषे दत्ते भवेद्ध्रुवम् ।
माहिषे धनवृद्धिः स्यात् मृगे भोगफलं लभेत् ॥
पक्षिदत्ते महर्द्धिः स्यात् गोधिकायां महाफलम् ।
नरे दत्ते महर्द्धिः स्यादष्टसिद्धिरनुत्तमम् ॥

Chapter V (Fol. 6B):—

देव्युवाच ।

रहस्यातिरहस्यं मे पुरश्चर्य्याविधिं प्रभो ।

वदस्व यदनुष्ठानं सर्व्वकामा भवन्ति हि ॥

ईश्वर उवाच ।

गृहीत्वा सद्गुरोर्दीक्षां शुभे काले दिवानिशि ।

आश्रमे वैष्णवः प्रोक्तो मध्यमः शैव दीक्षितः ॥

सुरया दीक्षितो यो वै स एव परमो गुरुः ॥

Chapter VI (Fol. 7B):—

देव्युवाच ।

देवदेव महादेव सृष्टिस्थितिलयात्मक ।

कालिकाया महाविद्या कथयस्व समाहितः ॥

ईश्वर उवाच ।

अथ वक्ष्ये महाविद्यां कालिकाया सुदुर्ल्लभाम् ।

यस्य विज्ञानमन्त्रेण जीवन्मुक्तो भवेन्नरः ॥

Chapter VII (Fol. 10B):—

देव्युवाच ।

कैलासशिखरारूढं देवदेवं जगद्गुरुम् ।

पृच्छामि श्रृणु देवेश तारिण्या मन्त्रसाधनम् ।

शङ्कर उवाच ।

श्रृणु देवि प्रवक्ष्यामि मन्त्रोद्धारश्च कथ्यते ।

ॐकारं पूर्व्वमुच्चार्य्य हकारं तदनन्तरम् ॥

Chapter VIII (Fol. 13A):—

देव्युवाच ।

देवदेव महानन्द परिचर्य्याविशारद ।

सुन्दरीमन्त्रसाधन्तु (?) वदस्व करुणानिधे ॥

ईश्वर उवाच ।

शृणु देवि प्रवक्ष्यामि मोक्षश्रीमन्त्रसाधनम् ।
येन विज्ञानमात्रेण कुलकोटीः समुद्धरेत् ॥

Chapter IX (Fol. 15A):—

देव्युवाच । (?)

अथ देवि प्रवक्ष्यामि गुप्तां त्रिभुवनेश्वरीम् ।
यामासाद्य सुराः सर्व्वे प्रतिष्ठिता ह्यभवन् पुरा ॥

Chapter X (Fol. 16B):—

देव्युवाच ।

महेश श्रोतुमिच्छामि भैरवीमन्त्रनिर्णयम् ।
येन विज्ञानमात्रेण कुलकोटीः समुद्धरेत् ॥
वायुबीजञ्च प्रथमं बीजं प्राणसमन्वितम् ।
सकलं भुवनेशानि द्वितीयं बीजमुद्धृतम् ॥

Chapter XI (Fol. 18A):—

देव्युवाच ।

महेश श्रोतुमिच्छामि छिन्नमस्ताविधिर्भवेत् ।
येनानुष्ठितमात्रेण सर्व्वपापैः प्रमुच्यते ॥

Chapter XII (Fol. 21A):—

श्रीमहादेव उवाच ।

अथान्यातु (?) च वक्ष्यामि देवीं गुह्यतमां प्रिये ।
उच्छिष्टपूर्व्विकां देवि मातङ्गीं सर्व्वसिद्धिदाम् ॥
सर्व्वापत्तारिणीं देवि सर्व्वदोषविवर्जिताम् ।
यया विज्ञानमात्रेण स्वयं गच्छन्ति चापदः ॥

Chapter XIII (Fol. 23A):—

श्रीदेव्युवाच ।

महेश श्रोतुमिच्छामि बगलाविधिमुत्तमम् ।
येन विज्ञानमात्रेण साध्यं भुवनत्रयं ॥

ईश्वर उवाच ।

शृणु देवि प्रवक्ष्यामि बगलामन्त्रनिर्णयम् ।
यन्निहीनेन्द्रस्तम्भो बगलामुखी सर्व्वयुक् ॥

Chapter XIV (Fol. 24B) :—

देव्युवाच ।

कैलासशिखरारूढ देवदेव जगद्गुरो ।
रमामन्त्रस्य किं + + तद्वद करुणानिधे ॥

ईश्वर उवाच ।

शृणु देवि प्रवक्ष्यामि कमलामन्त्रनिर्णयम् ।
येन विज्ञानमात्रेण नाराध्यं भुवनत्रये ॥

Chapter XV (Fol. 26A) :—

श्रीदेव्युवाच ।

कमलाया मनुयुगं कथयस्व महाप्रभो ।
केनोपायेन देवेश कमला वरदा भवेत् ॥

ईश्वर उवाच ।

कुबेरपि श्रोतुमिच्छामि (?) कमलामन्त्रमुत्तमम् ।
येन विज्ञानमात्रेण महादारिद्र्यखण्डनम् ॥

5973.

3917F. *Muṇḍamālātantra.*

Substance, country-made paper. 14¼ x 4½ inches. Folia, 14 (beginning from 41A and ending in 54B). Lines, 11 on a page. In tripâṭha form. Character, Bengali. Date, Śaka, 1614. Writing effaced. Appearance, old and dilapidated. Complete in 12 chapters.

The present MS contains paṭalas 1 to XII of which the first five chapters agree with those of the previous MS.

Post Colophon Statement :—

शुभमस्तु शकाब्दाः १६१४ ।

5974.

179. *Muṇḍamālātantra.*

Substance, country-made paper. 14 × 3 inches. Folia, 1-13. Lines, 5-6 on a page. Extent in ślokas, 198. Character, Bengali. Appearance, old. Incomplete.

This MS which runs up to the end of the sixth chapter has been described in L. I. 469.

5975.

10724. ज्ञानतिलकम् । *Jñānatilaka.*

Substance, palm leaf. 11 × 2¼ inches. Folia, 11-24. Lines, 4 on a page. Character, Kuṭila. Appearance, discoloured. Incomplete.

A MS of a *Jñānatilaka*, in the form of an interlocution between Nārada and Viṣṇu, is described in Nep. Vol. I, p. 180. The present work which is in the form of an interlocution between Śiva and his son Kārttikeya is apparently different and it deals with supreme knowledge.

The MS contains chapters V-VIII and a portion of chapter IV. The colophon of the 7th chapter (Fol. 19A) calls the work *Kālajñānatilaka*. Beginnings of the different chapters are as follows:—

Chapter V (Fol. 12A):—

श्रीकार्त्तिकेय वाच

त्वमीश सर्व्वदेवानां सर्व्वेश शिवशाश्वतः ।
एभिर्व्वक्षोभिरिदेव किं भासयसि शङ्कर(ः) ॥
मूढो[ऽ]हं अल्पबुद्धिश्च संसारभयपीडितः ।
स्पष्टं कथय देवेश समूलमभिप्रोक्तैः ॥

12B, श्रीईश्वर उवाच ।

त्वां मुक्त्वा नास्ति मे कश्चित् इष्टो पार्व्वतिनन्दन ।
यस्याहं कथयिष्यामि एतत् परमकारणम् ॥

. . ..

13A, अभावभावका येषां अभावतत्त्वनिश्चयात् ।
अभावगतचैतन्यास्ते मुक्ता नात्र संशयः ॥
अभावलक्षसंघातं यैर्गृहीतं नरेश्वरैः ।
दुस्तरं तेपि निस्तीर्णा महामाया भवार्णवं ॥
तीव्रेणापि न दह्यन्ते घोरसंसारवह्निना ।
ये प्रविष्टा महात्मानो अभावविमलाम्भसि ॥
क्रोधदंष्ट्रो दुराधर्ष माया-कुटिलविग्रहः ।
अभावभाविनां पुंसां किं करोति भवोरगः ॥
लोभजिह्वा महामाया संसारजननीश्वरः ।
शून्यसंधरतानां तु नराणां स पराङ्मुखः ॥

Chapter VI (Fol. 15B) :—

15B, श्रीकार्त्ति + + + + ।

+ वाधिदेव ईशान सर्व्वज्ञ सुरपूजित(ः) ।
प्रत्यक्षं दर्शयं देव अत्र वक्तोक्ति शंकर ॥

श्रीशङ्कर उ + + ।

+ + पश्य महासेन अनन्तं सर्व्वतोमुखं ।
महाज्ञानार्णवं शान्तं यं ज्ञात्वा वत्स मुच्यते ॥

Chapter VII (Fol. 17A) :—

[कार्त्तिके]य उवाच ।

तत्प्रसादाच्च देवेश अज्ञानतिमिरं घनं ।
ज्ञानसूर्य-समायोगात् विस्तीर्णं मम नश्यति ॥
+ + + + य नामानि अनामस्य सुरेश्वर ।
शिवस्य सूक्ष्मरूपस्य येन मे निश्चयो भवेत् ॥

श्रीईश्वर उ[वाच]।

+ प्राप्तं चादिरचितं सशिरस्कं यस्य मध्यतः।
नामस्य पश्चतं नित्यं वाच्यं ते परकारणं॥
नमस्तृतीययुग्मे + + मनामयमक्षरं।
तेन विज्ञानमात्रेण मुक्तस्त्वं भवबंधनात्॥
शिरद्वितीयकं पंचयुग्मोर्द्धशिरसं शिवं :
ईश्वरालंकृतं मूर्द्धि तं ज्ञात्वा निर्वृतो भव॥
संहारबिंदुसंयुक्ता वह्निरौकारक + + +।
अभिख्यातं च हृदं च दुःखपंचकनाशना॥

Chapter VIII (Fol. 19A) :—

श्रीकार्त्तिकेय उवाच।

गङ्गातरङ्गनिर्धूतजटाजूट शशाङ्कधृक्।
स्मरारे देव ईशान वृषभाङ्कित वामन॥

... ...

श्रीईश्वर उवाच।

... ...

19B, तथापि दुःप्रसाध्यस्य मारात्मा तवं मतम् :
समाधिनिर्णयं सूक्ष्मं भूयोपि कथयामि ते॥
यदेतदात्मनो पिण्डं शून्यात्मकं विचिन्तयेत्।
हृते चैव सर्वे पिण्डे सर्वशून्यमिदं जगत्॥
अहं त्रिषु चिरं वत्स भूतानि च समन्ततः।
निरुद्ध्य समभावेन मनोव्याप्ति नियोजयेत्॥
सर्वं समरसीभूत्वा बुद्धा परमकारके।
समो निरालम्बनेषु न किञ्चिदपि चिन्तयेत्॥

5976.

9991. *Jñānatilaka.*

Substance, palm-leaf. 11 × 2¼ inches. Folia, 3 (marked 2, 9, 10). Lines, 4 on a page. Extent in ślokas, 30. Character, Kuṭila. Appearance, old. Incomplete.

This is a mere fragment. Fol. 9B contains the colophon of the third chapter.

5977.

2890. मृत्युञ्जयतन्त्रम् । *Mṛtyuñjayatantra.*

Substance, country-made paper. 13 × 4½ inches. Folia, 16. Lines, 5 on a page. Extent in ślokas, 300. Character, Bengali. Appearance, fresh. Incomplete.

This MS, which contains chapters I–IV and a portion of chapter V, has been described in L. X. 4204.

A *Mahāvidyāsahasranāmastotra* mentioned in a MS in VSP (p. 44) as part of this Tantra is not found in the present MS.

5978.

187. पुरश्चरणरसोल्लासतन्त्रम् । *Puraścaraṇarasollāsatantram.*

Substance, country-made paper. 11½ × 4 inches. Folia, 32. Lines, 7 on a page. Extent in ślokas, 488. Character, Bengali. Appearance, old. Complete in ten chapters.

This MS has been described in L. I. 457. The work is also described in CS. V. 48. Besides with *Puraścaraṇa* proper, which is a well-known Tāntrika rite, the work deals with other topics as well, e.g. initiation (*dīkṣā*), greatness of the ten mahāvidyās, etc. The present MS contains chapters I–X. The greatness of the yavanas and the

success to be obtained by them by the performance of Tantra rites are referred to on Fol. 8B as follows :—

सूर्य्यग्रहणकालाद्धि नान्यः कालः प्रशस्यते ।
स कालः परमेशानि परं ब्रह्म समूर्त्तिमान् ॥
प्रजपेद् यदि चार्व्वङ्गि यवना यवनोद्भवाः ।
त्रिचार्थं यदि देवेशि यवनः प्रजपेद् यदि ॥
तत्काले चक्षुलायाश्चि सिध्यन्ति यवनास्ततः ।
ग्रहणे चन्द्रसूर्य्यस्य न जपेद् यदि पामरः ॥
पूर्व्वपुण्यं परित्यज्य विष्ठायां जायते क्रिमिः ।
तस्मात् यत्नेन देवेशि कर्त्तव्यो ग्रहणे जपः ॥
न तिथिर्नामिगोत्रञ्च न च सङ्कल्पमाचरेत् ।
कलिकाले महेशानि यवनो बलवांस्ततः ॥
मत्स्यमांसरताः सर्व्वे य[व]ना मद्यसेविताः ।
अतएव महेशानि य[व]नाः सिध्यते कलौ ॥

5979.

2783. *Puraścaraṇarasollāsatantra.*

Substance, country-made paper. 17 x 5¼ inches. Folia, 16. Lines, 10 on a page. Extent in ślokas, 400. Character, Bengali. Appearance, fresh. Complete in ten chapters.

Same as above.

5980.

2894. *Puraścaraṇarasollāsatantra.*

Substance, country-made yellow paper. 17¾ x 4¼ inches. Folia, 23. Lines, 5 on a page. Extent in ślokas, 400. Character, Bengali. Date, B.S. 1276. Appearance, fresh. Complete in eight chapters.

The present MS runs up to the end of the 8th Paṭala

Post Colophon :—

श्रीहरिहरशर्म्मणां श्रीश्रीदुर्गाशरणम् । सन १२७६ साल
२२ वैशाख मङ्गलवार ।

5981.

2900. फेत्कारिणीतन्त्रम् । *Phetkāriṇītantra.*

Substance, country-made yellow paper. 17 × 4 inches. Folia, 40. Lines, 6 on a page. Character, modern Bengali. Extent in ślokas, 1,000. Appearance, fresh. Incomplete at the end.

The work which deals with the black rites of Tantra like *māraṇa*, *uccāṭana*, etc., has been published in 20 chapters in the *Tantrasaṅgraha* and *Sulabhatantraprakāśa*. VSP (p. 39) notices a MS of the work which has 22 chapters.

Chapters are not indicated by numbers in the present MS. It generally agrees with the printed editions up to Fol. 34A where the 13th chapter of the printed editions almost reaches its end.

5982.

8476. परानन्दमतम् । *Parānandamata.*

Substance, country-made paper. 7¼ × 3½ inches. Folia, 1-18 of which Fol. 5, 9, 11, 13, 15, 16 are missing. Lines, 6 on a page. Extent in ślokas, 70. Character, modern Nāgara. Appearance, fresh. Complete.

The work deals with the views of the Parānanda School of the Tantras.

Beginning :—

श्रीः विश्वेशं भैरवं शान्तिं विष्णुं रुद्रं महेश्वरम् ।
भक्तेषु वात्सल्ययुतान् नमाम्येतान् पुनः पुनः ॥
आचार्यं परमानन्दं नमामि च जगद्गुरुम् ।
त्रिविधतापप्रहर्त्तारं दातारं सर्व्वसम्पदां ॥
देवानन्दं च तच्छिष्यं नित्यानन्दं तु भ्रातरं ।
सिद्धांश्च गुप्तमाचारान् उत्तराचारदीक्षितान् ॥

नारदादीनगस्त्यादीन् वामाचारस्थितान् मुनीन् ।
वशिष्ठादीन् मुनिवरान् दक्षिणाचारवीक्षितान् ॥
नमामि परमानं[द]मतस्थान् महाभागवतान् ।
मतानि च बहून्यत्र तामसादिप्रभेदतः ॥
वेदाप्रामाण्यवादीनि तन्मतस्था नराः क्वचित् ।
तमोमुख्यानि तेष्वेव नास्तिकानां मतानि च ॥
कुर्व्वंतश्चैव धर्म्मं स्वं यथोक्तं मतभावितं ।
क्वचिज्जन्मनि ते यान्ति वेदप्रामाण्यवादिषु ॥
जैमिन्याद्यास्तिकानां च राजसेषु मतेषु च ।
तत्रापि पुण्यपुञ्जानां सत्त्वाद्यादीन् प्रयत्नतः ॥
परानन्दमते चास्मिन् सर्व्वोत्कृष्टोत्तमे शुभे ।

इति उपोद्घातप्रकरणम् ।

परानन्दमतं वक्ष्ये त्रैलोक्येऽपि सुदुर्लभं ।
परमात्मा चेश्वरश्चेति जीवश्चेति पृथक् पृथक् ॥ १ ॥
नित्यानन्दः सुरूपी च दिव्यश्चेश्वरभावितः ।
ईश्वराणां स्वभक्तानां निग्रहानुग्रहक्षमः ॥ २ ॥

इति परात्मवर्णनम् ।

तस्य लोको महान् दिव्यः परमानन्दसंज्ञकः ।
यत्र गत्वा न यान्त्येव पुनः संसारमण्डले ॥ ३ ॥
मुक्ताश्चेश्वरा यत्र रमन्ते च यथासुखं ।
यत्र ध्यानासक्तचित्ता ऋषिर्देवस्त्रिया युताः ॥ ४ ॥

इति परमानन्दलोकवर्णनम् ।

ज्ञानवान् पुरुषोऽयं कर्त्ता स्वस्वकर्म्मणां ।
मनसा च समायुक्तः तत्तदिन्द्रियसौख्यभुक् ॥ ५ ॥
पापं कुर्व्वन् नरकगः पुण्यं कुर्व्वन् हि स्वर्गगः ।
कुर्व्वंश्चोपासनामैशीं तत्तदीशस्य लोकगः ॥ ६ ॥
एतेन लक्षणेनैव युक्तो जीवाख्यसंज्ञकाः ।

इति जीवलक्षणम् ।

परानन्दैकदेशस्तु स्वानन्दस्त्वेयदाहृतः ॥ ८ ॥
कृतपापान् दुराचारान् कृतपुण्यांस्तथैव च ।
आगते प्रलये ह्येतान् सानन्दे स्थापयत्यसौ ॥ ९ ॥
वैष्णवा विष्णुना सार्द्धं गच्छन्ति परमं पदम् ।
स्वेन स्वेनेष्टदेवेन गच्छन्ति परमं पदम् ॥ १० ॥
परमात्मा कदाचित् स ब्रह्माणमसृजत् प्रभुः ।
कृताकृतास्तु येऽथं तु जीवस्मानन्दसंस्थितं ॥ ११ ॥
सर्गस्य कारिणं देवं ब्रह्माणमकरोत् परः ।
पुण्यभावो यथा यस्य तथा तस्मै ददौ ततः ॥ १२ ॥
विष्णुत्वं वा शिवत्वं वा परात्मा भक्तवानितः ।
जगत्यस्मिन् शून्यमये ह्यागता ईश्वरास्तु ये ॥ १३ ॥
ध्यायन्तस्ते परं रूपं जपन्तः परमं मनुं
नीत्वा तु कतिचित् कालान् ब्रह्मा ब्रह्माण्डमसृजत् ॥ १४ ॥
लोकं दृष्ट्वा तु दुष्प्रेक्ष्यं तपसा दिव्यमुत्तमम् ।
चतुर्नवकनवकं लोकमेवं ईशास्तपोऽन्विताः ॥
तत्र स्थित्वा ब्रह्मदेवस्त्रीन् लोकानसृजत् प्रभुः ॥ १५ ॥
आकाशाद्वायुमसृजत् वायोरग्निं चकार सः ।
चकारैवं त्रिलोकीं तां पुण्यपापोचितां दृढां ॥ १६ ॥
तस्यां प्रवेशयामास जीवान् सानन्दसंस्थितान् ।
पापान् जीवांस्तु ब्रह्मास्तिर्यग्योन्यामपातयत् ॥ १७ ॥
राजसान् मानुषे ब्रह्मा सात्त्विकान् दैवे ह्यपातयत् ।
सृष्टेषु त्रिषु लोकेषु पञ्चतत्त्वात्मकेषु च ॥ १८ ॥
शक्रादिभ्यो हि देवेभ्यः ह्यधिकारान् ददौ प्रभुः ।
विष्णुस्तु पालयामास चोज्जहार तथा शिवः ॥ १९ ॥

Some of the characteristics of the school will be noticed in the extracts quoted below :--

5A, तदोचुस्ते वसिष्ठाद्याः कुत्र शिष्यान् कृपानिधे ।
आचार्यैः परमानन्दस्तदोवाच महामुनीन् ॥

इत्यादेव विरोधोऽस्ति मन्मते मुनिसत्तमाः ।
न न्यासो न च हिंसास्ति जङ्गमस्य जडस्य वा ॥
तदोचुर्मुनयः सर्व्वे यज्ञे हिंसाः श्रुताः शिव ।

शिव उवाच ।

अतएव मया प्रोक्तं मन्मते नास्त्यदो द्वयं ।
भाषणं त्रिविधं लोके युक्तं योग्यं च योजितं ॥
यदुक्तं गुरुणा तत्तु सत्यमित्यवधारयेत् ।
न तत्र तर्कः कर्त्तव्यो न युक्तिर्नापि नोचितिः ॥
यद् यद् ब्रूयाद् गुरुः साक्षात्तत्कुर्य्यादसंशयी ।
इदं तु भाषणं युक्तं द्वितीयं परिकथ्यते ॥
अन्यार्थकं तु योग्यं स्याद्योजितं त्रिकशैवः ।
कुर्व्वन्ति भाषणं विप्रा वादिनो वादतत्पराः ॥
न युष्माभिर्मया योग्यं योजितं नापि भाष्यते ।
मया युक्तं भाषणं तु क्रियते सर्व्वदैव च ॥
श्रोतव्यं चेत् शृणुध्वं भो नो चेद् गच्छत मा चिरं ।
इत्युक्ता मुनयः सर्व्वे ववन्दुः पादपङ्कजम् ॥

10B, परानन्दमतप्राप्तिर्यावन्नैवोपजायते ।
तावन्न्यासो यज्ञविधौ जङ्गमस्य च हिंसनं ॥
परानन्दमते प्राप्ते न [च] कुर्य्यात्त्विदं द्वयं ।
अत्यन्तवर्त्तिनामेव ह्यधिकारो मते मम ॥

End :—

वागमस्योपद्रवकर्त्तॄन् वन्यान् हिंस्रान् जन्तून् व्याघ्रादीन् हन्यादेव राजा । तानेव हिंस्रान् कात्यायन्यै बलिदानविधिना हित्वा बलिं समर्पयेत् काल्यै वा । ... ... इत्युक्तौ वशिष्ठसुदर्शनाभ्यां पृष्टस्तोऽमरदेवे शिव इति ।

... ...

परानन्दमतशास्त्रं यः पठेत् सुसमाहितः ।

अतन्नं नु समतं ज्ञात्वा स्वर्गलोकं व्रजेत्सुधीः ॥
अनेन प्रीयतां देवी महाकाली सुरार्च्चिता ।

There is no division into chapters in this MS.

5983.

3387. भूतशुद्धितन्त्रम् । *Bhūtaśuddhitantra.*

Substance, country-made paper. 10½ × 4¼ inches. Folia, 10. Lines, 8 on a page. Extent in ślokas, 750. Character, modern Bengali. Appearance, fresh. Complete.

This and the following MS have 17 chapters each. VSP (p. 43) notices a MS of this work which has 13 chapters.

Beginning :—

ॐ नमः कालिकायै ।

श्रीदेव्युवाच ।

देवदेव महादेव साम्प्रतं कथय प्रभो ।
भूतशुद्धिं देहशुद्धिं प्राणायामं ततः परम् ॥
क्रमेण कथ्यतां देव शूलपाणे पिनाकधृक् ।
मन्त्रं तन्त्रं महादेव येन शुध्यति भूतले ॥

ईश्वर उवाच ।

कथयामि वरारोहे खञ्जनाक्षि शुचिस्मिते ।
तत्त्वत्रयं प्रवक्ष्यामि गुह्याद् गुह्यतमं महत् ॥

End :—

सर्व्वेषु विविधा मुक्तिः काश्यां निर्व्वाणमुत्तमम् ।
यदि भाग्यवशात्तत्र म्रियन्ते यैश्च जन्तुभिः ।
पाप-पुण्यं परित्यज्य शिवतां प्राप्यते साक्षात् ॥

Colophon :—

इति श्रीभूतशुद्धितन्त्रे हरपार्व्वतीसम्वादे सप्तदशः पटलः ।

5984.

4611. *Bhūtaśuddhitantram.*

Substance, country-made paper. 19 × 4 inches. Folia, 1-28. Lines, 8 on a page. Extent in ślokas, 700. Character, Bengali. Appearance, fresh. Incomplete.

The present MS runs up to the end of the 16th Paṭala, which is followed by the beginning of the 17th Paṭala devoted to the praise of the work.

5985.

3188. मायातन्त्रम् । *Māyātantram*

Substance, country-made yellow paper. 14 × 5¼ inches. Folia, 12. Lines, 12, 13 on a page. Extent in ślokas, 432. Character, Bengali. Date, B.S. 1287. Appearance, fresh. Complete in 12 chapters.

The present MS contains chapters I-XII. The manuscript of the work described in L. I. 214 runs up to the 7th chapter. HPR. I. 285, which also bears the same name, appears to be a quite different work.

Beginning :

श्रीश्वर उवाच ।

शृणु देवि प्रवक्ष्यामि तत्त्वमन्यद् यथा पुरा ।
नोवे व्यामे नु मर्थ्यंच स्वर्गे मर्त्ये रसातले ।
विश्वे चैकार्णवीभूते न सुरासुरमानवाः ।
नैव क्षितिर्न वा किञ्चिन्नाथभावावशेषतः ॥
तदा विश्वम्भराद्देवात् सिसृक्षा मम जायते ।
ध्यात्वा स्वर्गादिसमयं मायां मज्जार च प्रभुः ॥
तदा वटदलं भूत्वा तोयान्तं समवस्थितम् ।
ततो नारायणं देवं (न चैव धरे) सा दधार स्वलीलया ॥

विचचार तदा तोये स्वेच्छाचारः स्वयम्भुः ।
विचरन्तं वटदले लोकेषु परमेश्वरम् ॥
वटवृक्षस्थितस्तत्र मार्कण्डेयो महामुनिः ।
ददर्श परमेशानं शिशुमव्यक्तरूपिणम् ॥
तुष्टाव स तदा हृष्टो मुनिः परमकारणम् ।
नमस्ते सर्व्वदेवेश ... ...
... ...
इति स्तुत्वा मुनिस्तत्र विरराम सुसंयतः ।
कृताञ्जलिपुटो भूत्वा दण्डवत् प्रपपात च ॥
तत उत्थाय देवेशं नाभिपद्मसमुद्भवम् ।
चतुर्वर्णं चतुर्वक्त्रं ददर्श परमं प्रभुम् ॥
सृष्टौ नियोजयामास तं ब्रह्माणं सुरेश्वरम् ।
ध्यात्वा ब्रह्मा तदा तत्र समर्थोऽपि परमेश्वरि ॥
जनयामास मनसा मानसान्स ततः शिवे ।
विना शक्तिं न शक्तास्ते सृष्टिं कर्त्तुं महेश्वराः ॥
योनौ सृष्टिरतो ज्ञेया ततो योनिमकल्पयत् ।
ततः काश्यपनामानं मुनिं पुनरजीजनत् ॥
पुनः सृष्टौ च तं पुत्रं ब्रह्मा प्रोवाच यत्नतः ।
जनयामास ततः कन्यां रूपयौवनसमन्विता ॥
नियोज्य मुनये तां तु ब्रह्मा प्रोवाच सृष्टये ।
नानायोन्याश्रितास्तासु समस्ता जीवजातयः ॥
उत्पादयामास तदा प्रजापतिरखण्डितः ।
ततो नारायणो देवस्तुष्टो मायामुवाच सः ॥
वटपत्रस्वरूपा त्वं यतो मां विधृताम्भसि ।
अतो धर्म्म-स्वरूपासि जगत्यस्मिन् सनातनि ॥
आराधयिष्यन्ति भुवि मनुजास्त्वां सनातनीं ।
सर्व्वकामेप्सवो लोके मायाधर्म्मस्वरूपिणीम् ॥

मन्त्रमाराधने चास्याः प्रवक्ष्यामि शृणु प्रिये ।
नादेन्दुसंयुतं दान्तं धर्म्माय हृच तत्परम् ॥
षडक्षरो महामन्त्रो धर्म्मस्याराधने मतः ।
यं कामं समनूद्दिश्य पूजयिष्यन्ति मानवाः ॥
अचिरादेव लप्स्यन्ति सर्व्वकामं न संशयः ।

So it proceeds to give the different mantras and different modes of worship of Māyā on particular occasions.

8A, एवमीमृतुमतीं वीक्ष्य सहस्रं यदि नित्यशः ।
जपेदेकाग्रमनसा कुलपूजारतः सुधीः ॥
आषोडशदिनं यावत् वाक्पतिर्भवति ध्रुवम् ।
मधुपानरतो रात्रौ चन्द्रबिम्बं प्रपुज्य च ॥
पुनः पुनः साधकाग्र्यो भवेत् कविवरः क्रमात् ।
मर्द्दयन् गिरियुग्मं देवि तत आलिङ्ग्य यत्नतः ॥
एवमष्टोत्तरशतं कृत्वा धनपतिर्भवेत् ।
कुण्डगोलोद्भवं पुष्पं समादाय प्रयत्नतः ॥
निवेदयेन्महादेव्यै प्रसादं तिलकं चरेत् ।
शतानाभिमन्त्रितं कृत्वा मोहयेदखिलं जगत् ॥

Curiously enough, it gives mantras to be used by Yavanas as well.

8A, कलिकाले तु देवेशि यवना बलवत्तराः ।
मत्स्यमांसरताः सर्व्वे सर्व्वदा मद्यसेविनः ॥
अनाचाररतास्तेन सिध्यन्ति यवनाः कलौ ।
यवनानां महेशानि चत्वारीं प्रकल्पिकीं ॥
निगदामि वरारोहे सावधानावधारय ।
कलावतीं समुद्धृत्य रक्तिकीं तदनन्तरम् ॥
रतिबीजमतो देवि ततस्तु वज्रयोगिनीम् ।
एषा तु चत्वारी विद्या यवनेषु प्रतिष्ठिता ॥

संयुक्तैषा यदा विद्या तदैवैकाक्षरी भवेत् ।
साचारा ब्राह्मणाद्यास्तु सिध्यन्ति बहुकालतः ॥
अनाचाराः प्रणश्यन्ति सत्यमेतन्न संशयः ।
उपायाः ब्राह्मणादीनां तेनोक्ताः शतशो मया ॥
सिध्यन्ति तैर्यथोक्तेन नियमैश्च यथाविधि ।

End :—

12A. इदानीं शृणु देवेशि पूजाधारं विशेषतः ।
जले यन्त्रे शिलायान्तु वि[ल्व](ल्ल)मूले घटोपरि ॥
लिङ्गे योनौ महापीठे शून्यागारे चतुष्पथे ।
कुट्टनीगृहमध्ये च कदलीमण्डपे तथा ॥
पुष्पयुक्ते भगे देवि गणिकागेहमध्यतः ।
महारण्ये प्रान्तरे च शवे च शक्तिसङ्गमे ॥
पञ्चानन्दपरो भूत्वा साधयेत् सकलेप्सिताम् ।
यं यं कामयते कामं तं तं प्राप्नोति निश्चितम् ॥
नूनं तद्गृहमागत्य कुबेरो दीयते वसु ।
वातस्तम्भं जलस्तम्भं गतिस्तम्भं विवस्वतः ॥
वह्नेः सत्यं करोत्येवं महामाया प्रसादतः ।
नासाध्यं विद्यते तस्य त्रैलोक्येपि च सुन्दरि ॥
योनिकुण्डे कृते होमे साक्षाद्ब्रह्माधरो भवेत् ।
पूजास्थाने कामबीजं लिखित्वा शिवयोगमात् ।
कवचं प्रपठेद्यस्तु शताष्टं सुरेश्वरि ॥
वाग्मी भवति मासेन सत्यं सत्यं न संशयः ।
अचिराल्लभते देवि कवितां सुखशालिनीं ॥
मोदते सर्व्वलोकेषु शिववत् परमेश्वरि ।
इति ते कथितं देवि सर्व्वतन्त्रेषु गोपितम् ॥

The Last Colophon :—

इति मायातन्त्रे हरपार्व्वतीसंवादे द्वादशः पटलः ।

Post Colophon :—

इति सन १२८७ तां कार्त्तिक माह संक्रान्तिदिवसे ग्रन्थः समाप्तः ।

5986.

181. *Māyātantram.*

Substance, foolscap paper 15×4 inches. Folia, 10. Lines, 7, 9 on a page. Extent in ślokas, 200. Character, Bengali. Appearance, fresh. Complete.

The present MS contains chapters I-VII.

5987.

193. उत्तरतन्त्रे पुरश्चरणविवेकः । *Puraścaraṇaviveka from the Uttaratantram.*

Substance, country-made yellow paper. Folia, 3. Lines, 6 8 on a page. Extent in ślokas, 63. Character, Bengali. Appearance, old. Complete.

According to the colophon this MS contains the first chapter of the Uttaratantra. The present MS is described in L. I, 460.

5988.

139. ब्रह्मज्ञानमहातन्त्रराजः । *Brahmajñāna-mahātantrarāja.*

Substance, yellow country-made paper. Folia, 17. Lines, 11 on a page. Extent in ślokas, 340. Character, Bengali. Complete. Appearance, old. Complete in six chapters.

This MS has been noticed in L. I, 408. The work is also noticed in L. II, 642 and in VSP (p. 40). It speaks of the knowledge of Brahman in the manner of a Tantra, *e.g.*, in the form of an interlocution between Śiva and Pārvatī.

5989.

4628. *Brahmajñānamahātantrarāja.*

Substance, country-made paper. 13¼ × 5 inches. Folia, 10. Lines, 8 on a page. Extent in ślokas, 200. Character, Bengali. Appearance, fresh. Complete in five chapters.

Same as above.

5990.

5973B. ब्रह्मसन्धानम् । *Brahmasandhānam.*

Substance, country-made paper. 11 × 5½ inches. Fol. 17B–104. Lines, 11 on a page. Character, Nāgara. Extent in ślokas, 1,400. Appearance, old. Complete.

This is a yogic text.

Beginning :—

17B, अथ ब्रह्मसन्धानं लिख्यते ।

ॐ नमः कमलदलविपुलनयनाभिरामाय श्रीरामचन्द्राय नमः ।
नमः सूर्याय परमहंसाय लेखकस्य नेत्ररोगनाशकायेति शुभम् ॥
ॐ नमो भगवते वासुदेवायेति ।
ॐ यया लिङ्गितदेहस्य त्रैलोक्याद्याख्यसम्पदः ।
दृश्यवत् प्रतिभासन्ते ब्रह्मलक्ष्मीं नमाम्यहम् ॥

स्कन्द उवाच ।

वेदवेदान्तसांख्यं वै स्मृतिसिद्धान्तमेव च ।
सर्व्वं मे विदितं चैव ब्रह्मसन्धानवर्ज्जितम् ॥

ईश्वर उवाच ।

शरीरं प्रथमं ज्ञात्वा धातुसाम्यं समं शुभम् ।
पश्चाद्युञ्जीत योगीन्द्रो योगोपकरणानि च ॥
पू[र]कं कुम्भकं चैव रेचकञ्च तथैव च ।
एते शरीरसाम्येन सम्भवन्ति हि योगिनाम् ॥

नाड्यः पवनाग्निधरा कारणमेव च ।
धातुसाम्ये स्थिते वत्स भवन्त्येतानि सङ्गताः ॥

Colophons of the different chapters :—

19B, इति ब्रह्मसन्धाने उत्क्रान्तिनिर्णयो नामः प्रथमः पटलः; 21A, ०त्रिस्थानावस्थितब्रह्मनिर्णयो नाम द्वितीयः पटलः; 22A, ०प्राणनिर्णयो नाम तृतीयः पटलः; 22B, ०अयनद्वयनिर्णयो नाम चतुर्थः पटलः; 23A, ०सूर्य्यविचारो नाम षष्ठः पटलः; 23B, ग्रहणनिर्णयो नाम सप्तमः पटलः; 24A, ०द्वादशान्तविचारो नामाष्टमः पटलः; ०स्थूलसूक्ष्मनिर्णयो नाम नवमः पटलः; 24B, ०निष्प्रपञ्चसमरसो नाम दशमः पटल; 25B, ०भूतोत्पत्तिविचारनिर्णयो नाम एकादशपटलः; 26A, ०भूतप्रलयो नाम द्वादशपटलः; 28A, ०प्राणोत्पत्तिविचारनिर्णयो नाम त्रयोदशपटलः; 28B, ०स्त्रीपुरुषोत्पत्तिवी[र्य्य]विचारनिर्णयो नाम चतुर्द्दशपटलः; 29A, ०बीजोत्पत्तिविचारनिर्णयो नाम पञ्चदशपटलः; 31A, ०पिण्डोत्पत्तिविचारनिर्णयो नाम षोडशः पटलः; 31B, ०धातूत्पत्तिविचारनिर्णयो नाम सप्तदशः पटलः; 32B, ०शरीरान्तर्गतसंख्यानिर्णयो नाम अष्टादशपटलः; 33A, ०ब्रह्माण्डविचारनिर्णयो नाम एकोनविंशः पटलः; 34A, ०परब्रह्मनादोत्पत्तिविचारनिर्णयो नाम विंशतितमः पटलः; 35A, ०कालविचारनिर्णयो नाम एकविंशतितमः पटलः, 36B, ०प्रकृत्युदयविचारनिर्णयो नाम द्वाविंशः पटलः; 37A, ०इष्टोपदेशविचारनिर्णयो नाम त्रयोविंशतितमः पटलः; 38A, ०शिवतीर्थविचारनिर्णयो नाम चतुर्विंशतितमः पटलः; 38B, ०ध्याननिर्णयो नाम पञ्चविंशः पटलः; 40B, मानसपूजाविचारो नाम षड्विंशतितमः पटलः; 41A, ०जपविधाननिर्णयो नाम सप्तविंशतितमः पटलः; 42A, ०अग्निपूजाविचारनिर्णयो नामाष्टाविंशः पटलः; इति महाज्ञान-परमरहस्य-चतुर्द्दशविधभूतसर्गे लयोत्पत्तिविचारसिद्धान्तकुलज्ञान-ब्रह्मसंधानं समाप्तम् ।

Titles appearing on the upper ends of the margin of every folium (*Brahmasandhāna* on the left and *Kumārīkalpa* on the left) of the subsequent portion of the MS (Fol. 42B–104) would seem to represent it as a part of the

Brahmasandhāna or *Kumārīkalpa.* The contents, however, show that we have here extracts from six Tāntrika works as will appear from the descriptions given below :—

I. Kumārīpūjā (Fol. 42–48) which quotes from Saṅkarṣaṇayāmala, Viśvabhairava, Pātālapiṅgala, etc.

48B, इति कुमारीपूजाविधिसंग्रहः समाप्तः।

II. Uddhārakośa (Fol. 49-72) by the sage Dakṣiṇāmūrti which quotes from works like Tripurātilaka, Āgamālaṅkāra, Chinnāśiromaṇi, etc.

Colophons of the different chapters :—

52A, दक्षिणामूर्त्तिविरचिते उद्धारकोश-सर्व्वागमार्णवे दशविद्या-मन्त्रोद्धार-कोशगुणाख्यानं नाम प्रथमः पटलः; 55B, इति श्रीदक्षिणामूर्त्तिविरचिते उद्धारकोशे सर्व्वागमसारे षट्देवीमन्त्रोद्धारकोशप्रपञ्चको नाम द्वितीयः कल्पः; 60B, ०सप्तविद्या-सप्तकुमारकोशाख्यानं नाम तृतीयः कल्पः; 62B, ०नवग्रह-मन्त्रोद्धारकोशाख्यानं नाम चतुर्थः कल्पः; 66A, ०सर्व्ववर्णकोशाख्यानं नाम पञ्चम-कल्पः; 72B, सर्व्वागममन्त्रसागरे सप्तमः कल्पः; समाप्तोऽयं उद्धारकोशः।

III. Durgārahasya (Fol. 72–84).

Colophons of the different chapters :—

74B, इति श्रीदुर्गारहस्ये मन्त्रविद्याप्रकाशो नाम प्रथमः पटलः; 75A, ०द्वितीयः पटलः; 75B, ०तृतीयः पटलः; 77A, ०चतुर्थः पटलः; 78B, ०पुरश्चर्य्याविधिर्नाम पञ्चमः पटलः; 79B, ०मन्त्रविद्याप्रकाशो नाम षष्ठः पटलः; 81A, ०सप्तमः पटलः; 82A, ०चक्रपूजाविधिर्नाम अष्टमः पटलः; 83A, ०नवमः पटलः; 84B, इति श्रीरुद्रयामले तन्त्रे दुर्गारहस्ये मन्त्रप्रकाशो नाम दशमः पटलः। सम्पूर्णोऽयं दुर्गारहस्याख्यतन्त्रराजश्चेति। शिवम्।

IV. Matsyodara Tantra (Fol. 85–96) which deals with yoga.

Beginning :—

85A, ॐ श्रीदेव्युवाच ।

श्रुतं देव मया सर्व्वं यामलं ब्रह्मयामलम् ।
कीदृशन्तु भवेज्ज्ञानं सकलं निष्कलं तथा ॥
कीदृशन्तु भवेत्तीर्थं शरीरस्थन्तु भैरव ।
एतत्पृच्छाम्यहं देव सारं विज्ञानमुत्तमम् ॥

Colophon :—

96A. इति श्रीपरमरहस्यं सर्व्वागमोद्धृतसारात्सारतरं मत्स्योदरतन्त्रं नाम योगशास्त्रं समाप्तम् ।

V. प्राणाग्निहोत्रतन्त्र which is also a work on yoga (Fol. 96-102).

Beginning :—

श्रीकार्त्तिकेय उवाच ।

अल्पविद्या नरा ये च अग्निहोत्रं न कुर्व्वते ।
तेषां प्राणाग्निहोत्रन्तु प्रसादं कुरु शूलभृत् ॥
शरीरेऽस्मिन् ब्राह्मण(?) को यजमानः का पत्नी, क ऋत्विक्

... ...

ईश्वर उवाच ... ...

अस्मिन् शरीरे समाग्नयो भवन्ति ।
मुखे चाहवनीयोऽग्निर्दक्षिणाग्निर्मनःस्थितः ।
हृदये गार्हपत्योऽग्नि नभ्यामौपसदः स्मृतः ॥

Colophon :—

102A. इति शिवभट्टारकेण कुमारस्य कथितं प्राणाग्निहोत्रं तन्त्रं समाप्तम् ।

VI. Rudrākṣa Kalpa which speaks of the origin of Rudrākṣa and the religious merit resulting from wearing rosaries made of it (Fol. 102-104).

Beginning :—

ॐ देव्युवाच ।

मम विस्मयमुत्पन्नं ब्रह्मास्त्रस्य तु सम्भवम् ।
दर्शनात् स्पर्शनाद्वापि किं पुण्यं धारणादपि ?

Colophon :—

इति ब्रह्मास्त्रकल्पः तन्त्रोक्तः समाप्तः ।
शुभमस्तु लेखकपाठकयोः   गुरवे श्रयोऽस्तु ॥

5991.

4649. पिच्छिलातन्त्रम् । *Picchilātantram.*

Substance, country-made paper. 19 x 4 inches. Folia, 7. Lines, 7 on a page. Extent in ślokas, 190. Character, modern Bengali. Appearance, discoloured. **Incomplete.**

This MS runs up to the end of the 12th chapter. The colophons represent this to be the first part (Pūrva-khaṇḍa) of the work. According to the post-colophon statement the 13th chapter was deliberately not copied as it dealt with what is called *bhūtaśuddhi*. The work is described in L. I, 295 and L. VI, 2188 which contain 21 and 14 chapters respectively. It deals principally with the worship of Kālī and incidentally gives incantations for various magic rites.

Last Colophon :—

इति पिच्छिलातन्त्रे पूर्वखण्डे द्वादशः पटलः ।

Post Colophon Statement :—

त्रयोदशपटलोऽत्र न लिखितः भूतशुद्धिप्रपञ्चात् । ॐ नमो दुर्गायै । ॐ विघ्नेश्वराय नमः ।

5992.

3153. **निबन्धमहातन्त्रम् ।** *Nibandhamahātantram.*

Substance, country-made yellow paper. 16 × 6 inches. Folia, 314. Lines, 8 on a page. Extent in ślokas, 7,838. Character, Bengali. Appearance, fresh. Complete.

The present MS has been described in L. X. 4265. The work consists of two parts. The first part in 87 chapters is divided into two kalpas—Sārasvatakalpa (chapters 1–82) and Śyāmākalpa (chapters 83–87). The second part in 33 chapters is divided into five kalpas—Māheśa° (chapters 1–9), Gāṇeśa° (chapters 10–18), Vaiṣṇava° (chapters 19–25), Saura° (chapter 26) and Śākta° (chapters 27–33).

5993.

3456. **आचारसारतन्त्रम् ।** *Ācārasāratantram.*

Substance, country-made paper. 15 × 3¼ inches. Folia, 9. Lines, 8 on a page. Extent in ślokas, 278. Character, Bengali. Appearance, fresh. Complete in 5 chapters.

The work is called by different names in different places. In the beginning of the present MS it is called Mahācīnatantrakrama (अथ महाचीनतन्त्रक्रमो लिख्यते)। The last colophon (इत्याचारसारे महारहस्ये श्रीपार्वतीश्वरसम्वादे चीनाचार-महातन्त्रे पञ्चमः पटलः) calls it Cīnācāra and states that it forms part of the Ācārasāra. The present MS runs up to the end of the fifth chapter of the work. IO. IV. 2563 contains 7 chapters. The work has been printed in the *Vividhatantrasaṃgraha* in five Paṭalas under the title Mahācīnācāratantra. Several verses given in Chatterji's edition of the work after the end of the fifth chapter are not found in any of the MSS of the work described here.

5994.

1640. *Ācārasāratantram.*

Substance, country-made paper. $9\frac{3}{4} \times 3$ inches. Folia, 28. Lines 6 on a page. Extent in ślokas, 350. Character, Nāgara. Date, Samvat 1856. Appearance, old and worm-eaten. Complete in 7 chapters.

The first seven verses as found in the MS described above as well as in the India Office MS are not found here. The concluding verses of this MS agree with those of the India Office MS. The concluding verses of the three MSS described below, not found here or in the India Office copy, refer to the greatness of the Kaulas.

Post Colophon :—

अभिषेच्य यदा शक्तौ कुलद्रव्यं निवेशयेत् ।
देवताशापं आप्नोति तर्पणं निष्फलं भवेत् ॥
स्वशक्तिं परशक्तिं वा दीक्षितां गुरुसम्मतः ।
पाययित्वा पिबेत् द्रव्यमिति तत्त्वविदो विदुः ॥
सङ्केतं चापि चोन्मत्तं यत्किञ्चित् वीरसाधनम् ।
कुलाचारं विना वत्स नैव सिद्धिप्रवर्त्तकम् ॥
समाप्तश्चायं ग्रन्थः ।
श्रीगुरुः पातु मे नित्यं पातु मे शङ्करः स्वयम् ।
श्रीदुर्गा पातु हृदयं हृदयानन्दरूपिणी ॥
संवत् १८५६ ।

5995.

2893. *Ācārasāratantram.*

Substance, country-made paper. $17\frac{3}{4} \times 4\frac{1}{4}$ inches. Folia, 18. Lines 5 on a page. Extent in ślokas, 324. Character, modern Bengali. Appearance, fresh. Complete in 7 chapters.

The present MS contains Paṭalas I–VII.

5996.

132. *Ācārasāratantram.*

Substance, country-made paper. 18 × 3¼ inches. Folia, 5. Lines, 6 on a page. Extent in ślokas, 95. Character, Bengali. Appearance, old. Incomplete.

This MS has been described in L. I. 470. It begins in the middle of the fourth Paṭala and runs up to the end of the seventh. The colophons of Paṭalas IV (fol. 1B) and V (fol. 3B) give the name of the work as Ācāratantra.

5997.

4189. मत्स्यसूक्तम् । *Matsyasūktam.*

Substance, country made paper. 19¼ × 4 inches. Folia, 10. The first leaf is a restoration. Lines, 9 on a page. Extent in ślokas, 650. Character, Bengali. Date, Śaka 1605 and B.S. 1180. Appearance old and discoloured. Complete in 10 Paṭalas.

L. II. 608 refers to a work of this name as a compilation and describes a MS which contains chapters 35-60. The old collection of MSS of the Society has a MS (No. [illegible]) which generally agrees with the MS described [illegible] and contains chapters 35-64 of the Uparibhāga section of the work dealing with *Āśauca*, *Prāyaścitta* and *Vratas* taken from various Purāṇas. The last colophon in the latter MS attributes the work to Halāyudha.

Beginnings and colophons of the different Paṭalas :—

Paṭala I :—

ॐ नमः ब्रह्माय ।

मन्दबुक उवाच ।

विरूपाक्ष महायोगिन् सर्वतत्त्वविदे रत ।
तारायाः परमं कल्पं रहस्यं कथयस्व मे ।

किं कृत्वा तु चतुर्वर्गं दुर्लभं सर्वं महागिरि ।

तत्त्वेन कथय त्वं मे कृपया तात प्रसादतः ॥

पराशर उवाच ।

कुब्जिका नाम सा देवी सुप्रभा [illegible]

महासना कर्त्तृका सा चतुर्बाहुसमन्विता ।

नीलोत्पलवपुः श्यामा सर्व्वालङ्कारभूषिता ।

निवेद्य यद्यतं मन्त्रं पूजिताचन्दनेन वा ॥

2A. बलिं दत्त्वा तु सकलं सम्पाद्यं हुताशनम्

शालमत्स्यञ्च पाठीनं गोधामांसमनुत्तमम् ॥

आज्यञ्च मधुना युक्तं बलिं दद्यात् मन्त्रवित् ।

न्यासं कृत्वा तथा ध्यानं यन्त्रमुद्धृत्य यत्नतः ॥

विना यन्त्रञ्च मन्त्रञ्च कवचं मन्त्रभृन्नतः ।

... ...

मन्त्रकाले च मत्तं भार्य्यां यत्नेन वर्ज्जयेत्

वर्ज्जयित्वा विष्णुकल्पं वर्ज्जयेत्तुलसीदलम् ॥

वर्ज्जयेन्मालतीपुष्पं वर्ज्जयेद्विष्णुसन्निधिम् ।

पूजाकाले तु संप्राप्ते वासुदेवं स्मरेत्तु यः ॥

पूजाफलं न चाप्नोति नरकं प्रतिपद्यते ।

2B. इति मत्स्यसूक्ते सिद्धसम्वादे महोग्रताराकल्पे प्रथमाद्यः पटलः ।

Patala II :—

पराशर उवाच ।

सामान्यकल्पं विधिवत् कथ्यमानमिदं परम् ।

पूजाकल्पं महोग्राया दुर्लभं भुवनत्रये ॥

3B, इति मत्स्यसूक्ते ताराकल्पे द्वितीयः पटलः ।

Paṭala III :—

पराशर उवाच ।

जन्मसंस्कारजं नाम पुत्रे जाते प्रशस्यते ।

मन्त्राक्षरं पूजयित्वा कुङ्कुमादिलता श्रियं ॥

4A. इति मत्स्यसूक्ते तृतीयः पटलः ।

Paṭala IV :—

पराशर उवाच ।

यत्र यत्र हि... ... ... ।

प्रदक्षिणा-नमस्कारं प्रणामं तत्र दीयते ॥

गोरक्ष उवाच ।

यथा यदुक्तं विप्रर्षे सर्व्वशा[स्त्र]विनाशनम् ।

निखिलं कथितं सर्व्वं विरूपाक्षेण ब्राह्मण ॥

यः पठतीति यथातथ्यं पठता लभ सुभक्तितः ।

स्वर्गं निदर्शयेदेव सर्व्वलोकहितं व्रत ॥

5A. इति मत्स्यसूक्ते ताराकल्पे चतुर्थः पटलः ।

Paṭala V :—

विरूपाक्ष उवाच ।

अथातः संप्रवक्ष्यामि पूजाविधिमनुत्तमम् ।

7B. इति मत्स्यसूक्ते ताराकल्पे पञ्चमः पटलः ।

Paṭala VI :—

विरूपाक्ष उवाच ।

एवं पूजां यथाशक्त्या कृत्वा वै साधकोत्तमः ।

वक्ष्येऽथ सर्व्वं विधिवत् परितोष्य यथा गुरुम् ॥

8A. इति मत्स्यसूक्ते षष्ठः पटलः ।

Paṭala VII :—

पराशर उवाच ।

विरूपाक्ष महायोगिन् सर्व्वसत्त्वहिते रत ।

सन्देहं मम तं छिन्धि कृपया कृपणप्रिय ॥

एषा विद्या महाविद्या भुक्तिमुक्तिफलप्रदा ।

हठात् सिद्धिं न सिध्यन्ति साधकास्तु कथं मुने ॥

विरूपाक्ष उवाच ।

महाचीनक्रमाचारा तारिणी शीघ्रसिद्धिदा

न चेत् सिद्धिं न विन्दन्ति जनाः कल्पशतैरपि ॥

9A, इति मत्स्यसूक्ते सप्तमः पटलः ।

Paṭala VIII :—

अथान्यत् संप्रवक्ष्यामि तारायाः वीरसाधनम् ।

प्रातः शुचिरनाचान्तः सुखासीनो गुरुं स्मरेत् ॥

... ...

ततः सायं श्मशानस्थः भूतमानीय साधकः ।

प्रथमेन च बीजेन सर्व्वाङ्गं लेपयेत्ततः ॥

9B, इति मत्स्यसूक्ते अष्टमः पटलः ।

Paṭala IX :—

विरूपाक्ष उवाच ।

अथ भेदान् प्रवक्ष्यामि तारिण्याः सर्व्वसिद्धिदान् ।

येषां विज्ञानमात्रेण जीवन्मुक्तश्च साधकः ॥

10A, इति मत्स्यसूक्ते नवमः पटलः ।

Paṭala X :—

गन्धवदनपत्राग्रावृतः ॥

विरूपाक्ष महायोगिन् सम्यग् योगो हृतस्त्वया ।

सम्यक् च कथितो योगो न ताराक्रम उत्तमः ॥

किमुच्यते महापापो एकलिङ्गं चतुष्पथः ॥

विरूपाक्ष उवाच ।

चतुष्कोणान्तरे यत्र भाण्डिकं दृश्यते परम् ।
शक्तलिङ्गं विजानीयात् तत्र सिद्धिरनुत्तमः ॥
चतुष्पथं विजानीयात् मुद्राक्ते नाभिगौरिका (?) ।
तत्र यत्नेन गन्तव्यं समर्थं सिद्धिकाङ्क्षिभिः ॥

इति विरूपाक्षविरचिते महायन्त्रे सिद्धमंत्रादि महोग्रताराकल्पे दशमः पटलः ।

Post Colophon.—

श्रीगुरवे नमः ।

लिखितं श्रीभट्टाचार्य देवशर्मणाः स्वाक्षरमिदं सन ११८० साल शकाब्दाः १६९५ ।

5998

3190. परमानन्दतन्त्रम् । *Paramānandatantram.*

Substance, European foolscap paper. 13 × 5 inches. Folia, 156. Lines, 5, 6 on a page. Extent in ślokas, 3,600. Character, Bengali. Appearance, fresh. Complete in 25 ullāsas.

It belongs to the school of Śrīvidya. The Tantra speaks of itself as deceptive in object. Bhairava is ordered by Śankara to write Tantras with a view to delude the people of the iron age who are given to sensuousness and debauchery, so that they may, through their vicious propensities, be eager to accept the Tantra for their religion and be hurried down into degeneration. The present work does not agree with the *mantrakhanda* section of the work of the same name described in *Mad.*, XII, 5657, 5670-2.

Beginning :—

अनाद्यनन्तमानन्दमप्रतिष्ठं परं शिवम् ।
यदन्तर्भाति तत्त्वानां चक्रं तं परमाश्रयम् ॥

श्रीदेव्युवाच ।

महेश देव देवेश विश्वकारण वल्लभ ।
त्वन्मुखात् मया देव तन्त्राणि बहुशः पुरा ॥
वैष्णवानि च शैवानि सौरगाणपतानि च ।
शाक्तान्यनेकरूपाणि विविधान्यपराण्यपि ॥
संश्रुतानि तथाप्यद्य परमानन्दसम्भवः ।
नैव जातोऽतिगहनभावात्संमिश्रणादपि ॥
तस्मादद्य महादेव सुन्दर्यास्तन्त्रमुत्तमम् ।
सुव्यक्तं सुव्यवस्थञ्च परमानन्ददायकम् ॥
कृपया वद मे देव यद्यहं तव वल्लभा ।

श्रीभैरव उवाच ।

शृणु देवि प्रवक्ष्यामि सुन्दरीतन्त्रमुत्तमम् ॥
एतत्तन्त्रप्रसादाच्च तव चापि महेश्वरि ।
यस्माच्च जायते देवि परमानन्दसंभवः ॥
तस्मात्तन्त्रमिदं प्रोक्तं परमानन्दसंज्ञितम् ।
पुरा कैलासशिखरे प्रोक्तवान् शङ्करः स्वयम् ॥
कदाचिद्देव्यहं तत्र स्थितस्तत्सेवनोद्यतः ।
पराशक्तिसहायस्य चन्द्रचूडस्य पार्श्वतः ॥
तदा विरिञ्चिविष्ण्वीशैस्सेवितः परमेश्वरः ।
ब्रह्मादीनुक्तवान् देव भवन्तः सर्व्व एव हि ॥
नानाविधानि तन्त्राणि नानाकामप्रदानि च ।
कलौ सर्व्वमनुष्याणां कामोपहतचेतसाम् ॥
मोहकानि विचित्राणि कुर्व्वन्तु द्रुतमेव हि ।
एवं महेशेनाज्ञप्ताः स्वयम्भ्वाद्याः प्रणम्य तम् ॥
गतास्ततोऽहमाज्ञप्तस्तेन देवेन शम्भुना ।
त्वं भैरवगणैर्युक्तः कुरु तन्त्राण्यनेकशः ॥
पृथग् नानाविधानीति ततोऽहं प्रणिपत्य तु ।
बद्धाञ्जलिः प्रोक्तवान् तं देवदेवं जगत्पतिम् ॥

भगवन् देव चित्तं मे जातशङ्काकलङ्कितम् ।
तदाज्ञां देहि किञ्चित्त्वां पृच्छामि परमेश्वरम् ॥
ततः परशिवेनाहमाज्ञप्तो वद वत्सक ।
इत्यथाहमुवाचेदं यथापृच्छं महेश्वरि ॥
भगवन् करुणासिन्धुस्त्वं लोकस्य हिते रतः ।
किमर्थं लोकमोहाय आज्ञापयसि शङ्कर ॥
अथ देव उवाचेदं शृणु भैरव तत्त्वतः ।
न मे द्वेष्योऽस्ति न परः प्रियोऽस्ति जगतीतले ॥
उदासीनो ह्यसङ्गोऽहं शान्तमूर्त्तिरनुत्तरः ।
मामजानन्त एते वै लोकाः संचितकर्म्मणाम् ॥
नानाविधानां पाकेन भोगेषु नियतं रताः ।
तान् मोहयितुमेवैषा मम नामाङ्कसंगता ॥
स्वातन्त्र्यशक्तिर्मायाख्या महादुर्घटकारिणी ।
ममाज्ञारूपमापन्ना ब्रह्मादिषु निविश्य सा ॥
उद्भावयति तन्त्राणि नानाफलयुतानि वै ।
तेषां कर्म्मोपभोगाय पुनः पुनरनेकधा ॥
कलिधर्म्मप्रवृद्ध्यर्थं लोकाः कामपरायणाः ।
दुष्पूरकामलोभेन हृतचित्ता दुराशयाः ॥
विषयाभिमुखासक्ताः क्रोधनेर्ष्याः सदाऽशुभाः ।
आलोक्य तानि तन्त्राणि मोहात् पण्डितमानिनः ॥
मन्मायापहृतज्ञाना गुरुहीना गुरुद्रुहः ।
तत्तत्तन्त्रसन्दर्भेषु मोहेनाभिरता जडाः ॥
असद्ग्रन्थेष्वेव जनाः प्रवृत्ताः कामनापराः ।
तदाशयमविज्ञाय मूढाः स्वकर्म्मसंरताः ॥
अन्ते तत्कर्म्मपाकेन विहता बहुधा नराः ।
अन्धं तमो विशन्त्येते सर्व्व एवात्र मानवाः ॥

End :—

अद्वैतविद्यां श्रीविद्यां परमानन्दरूपिणीम् ।
विज्ञाय पुरुषार्थे[न] मगलत्वां पिबत्[य]सौ ॥
तस्मादेतत् प्रयत्नेन गोपनीयं महेश्वरि ।
यदिदं पश्यते देवि निन्दकाय समर्पयेत् ॥
एतत्तन्त्रं पठन् देवि लिखंश्चापि प्रपूजयन् ।
देवताप्रीतिमाप्नोति पुरुषार्थान् समश्नुते ॥

Colophons of the different chapters :—

2B, इति श्रीमत्परमानन्दतन्त्रे भैरवदेवीसंवादे तन्त्रावतारो नाम प्रथमोल्लासः; 4A, इति श्रीमत्परमानन्दतन्त्रे तन्त्रभेदनिर्णयो नाम द्वितीयोल्लासः; 5B, ०श्रीविद्यास्वरूपकथनं नाम तृतीयोल्लासः; 8B, ०बालामन्त्रोद्धारादिकथनं नाम चतुर्थोल्लासः; 10A, ०बालासन्ध्यान्तविधिकथनं नाम पञ्चमोल्लासः; 14B, ०द्वारपूजादिन्यासान्तकथनं नाम षष्ठोल्लासः; 18B, ०सप्तमोल्लासः; 28A, ०अष्टमोल्लासः; 32B, ०नवमोल्लासः; 37A, ०दशमोल्लासः; 41A, ०एकादशोल्लास; 51A, ०द्वादशोल्लासः; 61B, ०त्रयोदशोल्लासः; 76B, ०चतुर्दशोल्लासः; 94B, ०पञ्चदशोल्लासः; 100B, ०षोडशोल्लासः; 107B, ०सप्तदशोल्लासः; 114A, ०अष्टादशोल्लासः; 118A, ०एकोनविंशतितमोल्लासः; 122B, ०विंशतितमोल्लासः; 133A. ०एकविंशतितमोल्लासः; 135B, ०द्वाविंशोल्लासः; 145A, ०काम्यविधित्रयोविंशतितमोल्लासः; 155A, ०चतुर्विंशोल्लासः; 156A (the last colophon) इति श्रीपरमानन्दतन्त्रे भैरवदेवीसंवादे सर्व्वतन्त्रसारे पञ्चविंशोल्लासः समाप्तः ।

5999.

3601. सिद्धलहरीतन्त्रम् । *Siddhalaharītantram.*

Substance, country-made paper. 16¼ × 3¼ inches. Folia, marked 1 to 28 on the right hand side, and 190 to 217 on the left hand side. Lines, 5 on a page. Extent in ślokas, 560. Character, modern Bengali. Appearance, fresh. Complete in nine chapters.

The work deals with the details of the worship of **Kālī** and the mystic significance of the fifty letters of the Sanskrit alphabet. It is generally in the form of an interlocution between Jātūkarṇa and Nārada though interlocutions between Pārvatī and Śiva as also between Subhagā and Nārada are also occasionally met with. *Gautamī Tantra* is referred to in fol. 11A (यथोक्तं गौतमीतन्त्रे नान्यतन्त्रेषु तद्वद).

Beginning, giving contents of the work :—

जातूकर्ण उवाच ।

त्रिफलो बीजहीनश्च सन्दिग्धोऽस्तमितस्तथा ।
मनवस्ते न सिध्यन्ति स्याद्गुरुः शान्तघातकी ॥
ब्रह्मपुत्र महाभाग सदर्थं चास्य मे वद ।

नारद उवाच ।

प्रफुल्लकलिकाबीजं बीजहर्षमितोदितम् ।
रजः-सत्त्व-समोपेतं चन्द्रबिन्दुसमन्वितम् ॥
प्रफुल्लं ब्राह्मणश्रेष्ठ कथितं भक्तितस्तव ।
कालिका कुलीनानां अष्टसिद्धिस्त्रयो गुणाः ॥
त्रिंशच्चाश्च तथा स चक्रं(?) शिववक्त्रजाः ।
रामकृष्णास्तथा विद्याः शिवो दुर्गा च कालिका ।
त्रिपुरा भैरवी लक्ष्मी[म्] तारा च बगलामुखी ।
चतुर्थ्यन्तं नमोऽन्तेन मन्त्रविद्याः पृथक् पृथक् ॥
एतेषां मन्त्रविद्यानां आद्यन्ते मुनिनन्दन ।
प्रफुल्लं यदि नो विप्र तद्रूपं विफलं द्विज ॥

End.

नवलक्षमहाविद्याः कालिकायाः सुदुर्लभाः ।
सर्वासां चैव विद्यानां आकारं द्वात्रिंशदक्षरी ॥
कामराजात् समुद्भूता द्वात्रिंशदक्षरी परा ।
द्वात्रिंशदक्षरी चैव नवलक्षादिनिर्गता ॥

द्वाविंशद्गुह्रला विद्या कवचेषु निरूपिता ।
प्रधानां नवमन्त्राणां द्वात्रिंशन्मुनिनन्दन ॥
किं बहुनया महाभाग गच्छामि व्योमसन्निधिम् ।
इत्युक्त्वा प्रययौ शीघ्रं नारदो व्योमसन्निधिम् ॥

After the ninth chapter there occurs an extract (Fol. 27B) in the form of an interlocution between Śiva and Pārvatī. It is not known if this is also a part of the present work.

This section begins as follows:

देव्युवाच ।
देव देव महादेव सर्वागमविशारद ।
अधुना देवदेवेश पञ्चाशद्वर्णनिर्णयम् ॥
तत्त्वं रूपञ्च ध्यानञ्च कथयस्व दयानिधे ।

6000.

10608. **नारसिंहकल्पम् ।** *Nārasiṁhakalpam.*

Substance, country-made paper. $10\frac{3}{4} \times 4\frac{1}{2}$ inches. Folia, 22. Lines, 9 on a page. Extent in ślokas, 594. Character, modern **Nāgara**. Appearance, fresh. Complete in eight chapters.

It deals with the worship of Nṛsiṁha, a form of Viṣṇu.

Beginning :—

ॐ विशुद्धविज्ञानघनस्वरूपं
विज्ञानविश्राणनबद्धदीक्षम् ।
दयानिधिं देहभृतां शरण्यं
देवं हयग्रीवमहं प्रपद्ये ॥
या वैष्णवी सुखमदद्वयबोधरूपा
भूम्यादिपञ्चकतया बहुधा विभिन्ना ।
तां षोडश-द्वितयतत्त्वनृसिंहमूर्तिं
तां मूलशक्तिममलां प्रणतोऽस्म्युदाराम् ॥

योऽसौ नित्यविशुद्धनिर्गुण-सदानन्दाद्वयज्ञानभूः
साक्षात्सत्त्वमयीमवाप स हरिः श्रीनारसिंहीं तनुम् ।
मृणाङ्कुलिखड्गिनीं कवलय[न्] संसारघोराम्बुधि-
स्रोतश्चालनशीतलामृतलहरिपूरं सुखायास्तु नः ॥
प्रणिपत्य जगन्नाथं चराचरगुरुं हरिं ।
वक्ष्ये प्रयोगं मन्त्रस्य नृसिंहानुष्टुभः शुभम् ॥
आत्मयोनिं पुरा देवं नारदः परमेष्ठिनम् ।
पादौ प्रणम्य पप्रच्छ यथावत् परिचर्य्यया ॥

नारद उवाच ।

संसारसागरे घोरे विषयग्राहसङ्कुले ।
जन्ममृत्युजराग्राह-दुःखशोकतरङ्गिणि ॥
... ...
अस्मिन् भवार्णवे पुण्यहयानां दिशामल(?) ।
मनश्चक्र-महायन्त्रे भ्रमन्तं भयविह्वलम् ॥
अनाथमार्त्तं विभ्रान्तं पाहि मां शरणागतम् ।
यथाहमस्मात् संसारादनादेरतिदुस्तरात् ॥
आत्मानमुद्धरिष्यामि तथा मे साधु चिन्त्यताम् ।
नो परोक्षं तवैवास्ति त्रिषु लोकेषु किञ्चन ॥
... ...

ब्रह्मोवाच ।

शृणु वत्स महाभाग मन्त्रं दुःखहारकम् ।
समासेन प्रवक्ष्यामि रहस्यं ह्येतदुत्तमम् ॥
यैरभ्यर्चितो विष्णुः सर्वभूतेश्वरेश्वरः ।
कर्मणा मनसा वाचा तैरेवं दुःखमाप्यते ॥

Colophons of the different chapters :—

3B, इति श्रीनारसिंहकल्पे वैष्णवे प्रथमः पटलः; 6A, इति द्वितीयः पटलः; 8A, इति तृतीयः पटलः, 11B, इति चतुर्थः पटलः; 13B, इति नारसिंहे वैष्णवे पञ्चमः पटलः; 16B, इति वैष्णवे षष्ठः पटलः; 17B, ०सप्तमः पटलः; 22A इति श्रीनारसिंहे वैष्णवे कल्पेऽष्टमः पटलः; समाप्तश्चायं कल्पः ।

6001.

1903. देवीरहस्यतन्त्रम् । *Devīrahasyatantram.*

Substance, country made paper. 10 4 inches. Folia, 25. Lines, 4 on a page. Extent in ślokas, 621. Character, Nāgara. Appearance, old. Incomplete.

The present MS as also another one of the same work have been described respectively in L. X. 4160 and HPR. II. 251. In the latter the work is represented as a part of the Rudrayāmala. The work deals with the worship of the Sun-God. For a different work called *Devīrahasya* which is also stated to belong to the Rudrayamala, cf. No. 5880 above.

The present MS contains five chapters (31st to 35th) of the Devīrahasyatantra.

Colophons of the different chapters :—

5A, इति श्रीदेवीरहस्यतन्त्रे सूर्य्यपटलाख्यं नाम एकत्रिंशपटलः ।

14A. ०सूर्य्यपूजापद्धतिवर्णनं नाम द्वात्रिंशः पटलः ।

16A, ०वज्रपञ्जरकवचपद्याख्या नाम त्रयस्त्रिंशः पटलः ।

23B, ०सूर्य्यनामसहस्राख्यं नाम चतुस्त्रिंशः पटलः ।

25A, ०परमार्थस्तोत्राख्यानं नाम पञ्चत्रिंशः पटलः ।

6002.

2817. राधातन्त्रम् । *Rādhātantram.*

Substance, country-made paper. 18½ × 3½ inches. Folia, 39. Lines, 7 to 10 on a page. Extent in ślokas, 1,500. Character, Bengali. Appearance, worm-eaten and discoloured. Complete in 35 chapters.

The *Tantrasaṃgraha* and *Sulabhatantraprakāśa* editions of this Tantra as also the edition of it as published by Kamakhya Nath Mukherji (Calcutta, 1283 B.S.) are complete in 32 Paṭalas while the present MS as well as the following one are complete in 35 chapters each.

It relates to the Kaula cult as practised by Rādhā and Kṛṣṇa, the company of Rādhā as Śakti, ensuring the success of Kṛṣṇa in his rites. Padminī, the *Dūtī* of Tripura-sundarī, is born by command of the goddess as the daughter of Vṛṣabhānu and Śrī Kṛṣṇa accepts her as his Śakti.

6003.

3474. *Rādhātantram.*

Substance, country-made paper. 11½ × 4 inches. Folia, 88. Lines, 7 on a page. Extent in ślokas, 1,500. Character, Bengali. Date, B.S. 1214. Appearance, discoloured. Complete in 35 Paṭalas.

Post Colophon :—

नत्र श्रीव्रजमोहन सेनस्य मोः पांचपाड़ा । सन १२१४ साल ११६ कार्त्तिक ।

6004.

675. गौतमीयतन्त्रम् । *Gautamīyatantram.*

Substance, country-made paper. 13 × 5 inches. Folia, 108. Lines, 6, 8 on a page. Extent in ślokas, 2,160. Character, Bengali. Appearance, tolerable. Complete in 31 chapters.

This is a well-known Vaiṣṇava Tantra which in 34 chapters has been published with a Bengali translation by the Basumati Press of Calcutta (1334 B.S.). The work in 32 chapters has been published in the *Tantrasaṃgraha* and *Sulabhatantraprakāśa*. The present MS contains chapters I–XXXI. The Vaṅgīya Sāhitya Pariṣat MS of the work contains chapters I–XXXII.

6005.

234. गुह्यातिगुह्यतन्त्रे विद्योत्पत्तिः । *Vidyotpatti from the Guhyātiguhyatantram.*

Substance, country-made yellow paper. Folia, 6. Lines, 6 on a page. Extent in ślokas, 138. Character, Bengali. Date, Śaka 1729. Appearance, old. Complete.

The present MS has been described in L. I. 448. The work has also been described in L. I. 334. It deals with the importance and worship of the different forms of Śakti.

Beginning :—

सत्ये काली च श्रीविद्या कमला भुवनेश्वरी ।
सिद्धविद्या महेशानी त्रिशक्तिः कमला शिवे ॥
महाविद्या सत्ययुगे मातङ्गी भैरवी शिवे ।
धूमावती च विद्या स्यात्त्रेतायां शृणु पार्व्वति ॥
काली तारा सुन्दरी च सिद्धविद्या प्रकीर्त्तिता ।
मातङ्गी कमला लक्ष्मीर्महालक्ष्मीः प्रकीर्त्तिता ॥
धूमावती भैरवी च विद्यात्रेत महेश्वरि ।
द्वापरे कालिका तारा गोपनी भैरवी तथा ॥
सिद्धविद्या महेशानि सुन्दरी भैरवी तथा ।
धूमावती महाविद्या मातङ्गी कमला तथा ॥

विद्यात्वेन महेशानि कलौ काली तु केवला ।
काली तारा छिन्नमस्ता महाविद्या कलौ मता ॥
सुन्दरी भैरवी लक्ष्मीर्मातङ्गी भुवनेश्वरी ।
महाविद्या महेशानि धूमा च बगला शिवे ॥
विद्यात्वेन महेशानि कलौ संपरिकीर्त्तिता ।
एवं प्रकृतिभेदेन भेदास्तु प्रकृतिर्दश ॥
प्रकृतिर्विष्णुरूपा स्यात् पुरुषश्च महेश्वरः ।
कृष्णमूर्त्तिः कालिका स्यात् राममूर्त्तिस्तु तारिणी ॥
छिन्नमस्ता नृसिंहः स्यात् वामनो भुवनेश्वरी ।
जामदग्न्यः सुन्दरी स्यात् मीनो धूमावती भवेत् ॥
बाला कूर्म्ममूर्त्तिः स्याद्बलभद्रश्च भैरवी ।
महालक्ष्मीर्भवेद्बुद्धो दुर्गा स्यात् कल्किरूपिणी ॥
स्वयं भगवती काली कृष्णस्तु भगवान् स्वयम् ।

Post-Colophon statement :—

शकाब्दाः १७२९ ।
पञ्चपञ्चाश नमैके मासे राधे भृगोर्दिने ।
विद्योत्पत्तिः सम्पूर्णा शाके सिद्धिप्रदायिनी ॥

6006.

204. सरस्वतीतन्त्रम् । *Sarasvatītantram.*

Substance, country-made yellow paper. Folia, 5. Lines, 7 on a page. Extent in ślokas, 153. Character, Bengali. Appearance, old. Complete in six chapters.

The work deals with the essential rites connected with *japa* or the muttering of mantras. The present MS, containing chapters I–VI, has been described in L. I. 447. L. I. 261 describes another MS of the work. The

work has been edited in six chapters by Girishchandra Vedāntatīrtha and Satischandra Siddhāntabhūṣaṇa (Rajshahi, 1323 B.S.). It refers (Fol. 2A) to *Gaṅgāgama* and *Rudrayāmala.*

6007.

10221. *Sarasvatītantram.*

Substance, country-made yellow paper. 13 × 5¼ inches. Folia, 5. Lines, 14 on a page. Extent in ślokas, 140. Character, modern Nāgara. Appearance, fresh. Complete.

The present MS contains chapters I-VII inclusive. After the seventh Paṭala there are two ślokas regarding Kullukā mantra. The seventh Paṭala deals with *Yonimudrā* ; the beginning and end of it run as follows:—

Beginning :—

ईश्वर उवाच ।

योनिमुद्राविधानं हि वक्ष्ये तन्त्रानुसारतः ।
कृतेन दिनैकेन सर्वपापप्रणाशनम् ॥

End :—

सेयं मयोक्ता खलु योनिमुद्रा
बन्धस्तु दैवैरपि दुर्लभोऽस्याः ।
अनेन बन्धेन न साध्यते यत्
नास्त्येव तत् साधका दूरत वस्तु ॥
इति योनिमुद्रा ।

6008.

5035. *Sarasvatītantram.*

Substance, country-made yellow paper. 16 × 3½ inches. Folia, 6. Lines, 6 on a page. Extent in ślokas, 140. Character, Bengali. Appearance, fresh. Complete in six Paṭalas.

The work is called *Sārasvatatantra* in the colophons of this MS.

6009.

4618. **कैवल्यतन्त्रम् ।** *Kaivalyatantram.*

Substance, country-made yellow paper. 19½ × 4¼ inches. Folia, 7. Lines, 8 on a page. Extent in ślokas, 168. Character, Bengali. Appearance, fresh. Complete in five Paṭalas.

The work has been described in L. 1. 265. It deals with the use of the *pañcatattvas*, e.g., fish, meat, wine, etc. in the Tantras.

6010.

171. *Kaivalyatantram.*

Substance, country-made paper. 14 × 5¼ inches. Folia, 9. Lines, 6, 7 on a page. Extent in ślokas, 162. Character, Bengali. Appearance, old. Complete in five Paṭalas.

Same as above.

6011.

4188. **कुमारीतन्त्रम् ।** *Kumārītantram.*

Substance, country-made paper. 18 × 4½ inches. Folia, 6. Lines, 8 on a page. Extent in ślokas, 300. Character, Bengali. Appearance, old. Complete in nine chapters.

The present MS has been described in HPR. III. 66. According to the last colophon of the present MS it comprises the first part (Pūrvabhāga) of the work and deals with the worship of Kālī (*Kālīkalpa*).

6012.

5621C. *Kumārītantram.*

Substance, palm leaf. $14 \times 1\frac{1}{2}$ inches. Folia, 55 to 68. Lines, 5 on a page. Extent in ślokas, 225. Character, Uḍiyā. Appearance, good. Complete in nine chapters.

Same as above.

6013.

4670. *Kumārītantram.*

Substance country made paper. 16×6 inches. Folia, 7. Lines [illegible] on a page. Extent in ślokas, 200. Character, Bengali. Appearance, discoloured. Complete in nine chapters.

Same as above.

6014.

3453. *Kumārītantram.*

Substance, country-made paper. $14\frac{3}{8} \times 3\frac{7}{8}$ inches. Folia, 12 Lines, 6 on a page. Extent in ślokas, 225. Character, Bengali. Appearance discoloured. Complete in nine chapters.

Same as above.

6015.

5882B. **कुलप्रकाशतन्त्रम् ।** *Kulaprakāśatantram.*

Substance, country-made paper. $8\frac{3}{4} \times 6$ inches. Folia, 3. Lines, 9 on a page. Extent in ślokas, 36. Character, modern Nāgara. Appearance fresh. Incomplete.

The MS contains only an extract from the *Kulaprakāśa Tantru* and describes the śrāddha ceremony of a Kaula. A *paddhati* for the *śrāddha* is also appended.

Beginning :—

श्रीगणेशाम्बागुरुभ्यो नमः ।

कुलप्रकाशतन्त्रे ।

कुलश्राद्धं प्रवक्ष्यामि कौलधर्म्मोत्तमोत्तमम् ।
उपासकानां शुद्धानां शिवसान्निध्यकारकम् ॥
भूताष्टम्योः पूर्णिमायां वासरे शुक्रभौमयोः ।
+ + + तिथौ वापि पुष्ये पैत्रे कुहूदिने ॥
आमन्त्र्य ब्राह्मणान् शुद्धान् कुलाचारादितत्परान् ।
ब्रह्मनिष्ठान् यतीन् शान्तान् दीक्षितान् गुरुतत्परान् ॥
स्नातः स्नातान् समाहूय कौलश्राद्धं समाचरेत् ॥

Colophon :—

इति कुलपार्व्वणश्राद्धम् ।

6016.

4671. **कालीकुलामृततन्त्रम् ।** *Kālīkulāmṛtatantram.*

Substance, country-made paper. 17½ × 6 inches. Folia, 26. Lines, 11 on a page. Extent in ślokas, 1,150. Character, Bengali. Date, Śaka 1727. Appearance, discoloured. Complete in fifteen Paṭalas.

The work deals principally with the worship of Kālī and with the worship of Tārā in a general way.

Beginning :—

ॐ नमो भवान्यै ।

कैलासशिखरे रम्ये नानासुखसमाकुले ।
सर्व्वर्त्तुकुसुमाकीर्णे नानापक्षिसुनादिते ॥
... ...
... ...

कालीकुलामृतं तन्त्रं प्रसङ्गात् कथितं प्रभो ।
विस्तरेण महाभाग कथ्यतां यदि मे कृपा ॥
विद्याराज्ञाश्च उद्धारं वर्णवर्णान् यथाश्रुतान् ।
ऋषिश्छन्दो देवताश्च बीजं शक्तिश्च कीलकम् ॥
विनियोगं यदर्थश्च ध्यानपूजादिकं क्रमात् ।
स्तोत्रश्च कवचश्चास्याः साधनश्च यथाक्रमम् ॥
कथयस्व महाभाग यद्यहं तव वल्लभा ।

श्रीभैरव उवाच ।

शृणु पार्व्वति वक्ष्यामि भैरवि प्राणवल्लभे ।
अतिगोप्या महापुण्या सारात्सारतरा परा ॥

End :—

अन्यतन्त्रेषु कापट्यं मम सर्व्वत्र वर्त्तते ।
नात्र किञ्चिन्महादेवि तथ्यमेतद्ब्रवीमि ते ॥
सत्यं सत्यं पुनः सत्यं सिद्धिरत्रैव कीर्त्तिता ।
इति ते कथितं सर्व्वं नान्यद्वक्तव्यमस्ति ते ॥

Last Colophon :—

इति श्रीकालीकुलामृततन्त्रे पञ्चदशपटलः समाप्तः ।

Post Colophon Statement :—

शुभमस्तु शकनरपतेरतीताब्दाः १७२७ । ३ ॥

6017.

10610. आनन्दार्णवतन्त्रम् । *Ānandārṇavatantram.*

Substance, country-made paper. 11 × 5 inches. Folia, 12. Lines, on a page. Extent in ślokas, 480.* Character, Nāgara. Appearance, o and discoloured. Complete in 10 Paṭalas.

The work deals with the worship of Śrīvidyā. It ha no connection with the *Ānandatantra* (IO. IV. 2541.)

Beginnings of the different Paṭalas :—

Paṭala I :—

श्रीगुरु ऐक्यानन्दपादुकां पूजयामि नमः ॥

श्रीमत्कैलासशैलाग्रे कल्पद्रुमवनौतले ।
रत्नसिंहासनासीनं सर्वेशं सर्वमङ्गला ॥

सर्वमङ्गला उवाच ।

श्रुतं विधानं विद्यायाः साङ्गोपाङ्गसविस्तरम् ।
तन्त्रैस्तन्त्रान्तरैश्च यथा यथा निरूपणम् ॥
अनन्वयैरन्यरूपैरन्योन्य[ा]दिमतक्रमैः ।
असंप्राप्त्यैकरूपत्वात् सन्देहो जायते मम ॥
अप्यपरेषु तन्त्रेषु यत् परोक्तं शिव त्वया ।
तथा चरितुमत्यन्तमशक्यं योगिनामपि ॥
प्रतितन्त्रे विशेषोऽस्ति तत्तदाकलनं यदि ।
तद्विधानक्षमः साक्षात् सर्वज्ञोऽप्यतिविस्तरात् ॥
तस्मात्तत् श्रोतुमिच्छामि साङ्गोपाङ्गानुशासनम् ।
सारं समस्ततन्त्राणां प्रशस्तं नातिविस्तरम् ॥
गुप्तत्वात्पवमच्छाद्यमार्द्रत्वात्पथं तदा ।
पथद्वयपरं मार्गं मंगलावहमुत्तमम् ॥
सर्वसिद्धिकरं सर्वपुरुषार्थैकसाधनम् ।
विधानं सर्वविद्यानां बोधनं पापनाशनम् ॥
विद्यास्वरूपमुद्राग्रचक्रसम्भावनाक्रमम् ।
तयोरैक्यानुसन्धानमशेषमद्वैतकं वद ॥

श्रीसर्वेश उवाच ।

शृणु देवि प्रवक्ष्यामि तव प्रश्नानुरूपकम् ।
नारायणाय कल्पादौ श्रिया संसूचितं क्रमम् ॥
रूपं त्रिपुरसुन्दर्या विद्याया हृदयं परम् ।
चक्रागमदः साक्षाद्विधानं त्रिषु दुर्लभम् ॥

सहस्रादावरणेनैव लभते विधिनामुना ।
बहुकालतपोलभ्यं कालं प्रोक्तं प्रकल्पितम् ॥
अयं मेरुरिति ख्यातं विधिर्बाह्यान्तरात्मके ।
अनेन विधिनाराध्य हरिर्विश्वेशतां ययौ ॥
आनन्दार्णवनामापि तन्त्रं कल्याणसंज्ञितम् ।
संकल्पसिद्धिदं देवि पुरुषार्थैकसाधनम् ॥
वक्ष्याम्यपारं संक्षिप्य तन्त्रं श्रुतिमयोक्तिभिः ।
शृणु सुन्दरि सूक्ष्मग्रधिया सिद्धार्थं सादरम् ॥
बाला ब्रह्मात्मिका विद्या कुमारी वैष्णवी परा ।
युवती शाम्भवी देवी रजःसत्त्वतमोगुणैः ॥
वाग्भवानुगता बाला कुमारी मन्मथात्मिका ।
युवती शक्तिजा देवि वह्न्यर्केन्दुमहोदयात् ॥
तस्मान्नारायणी विद्या सात्त्विका मन्मथात्मिका ।
सूर्यतेजोमयी देवी कुमारी विश्वपालिनी ॥

Paṭala II (Fol. 1B):—

चक्रजन्मक्रमं वक्ष्ये देवेश्युद्धारपूर्वकम् ।
यस्य विज्ञानमात्रेण पूजाफलमवाप्नुयात् ॥
बिन्दुत्रिकोणाष्टकोणं द्विदशारमनुच्छदम् ।
वसुराशाख्यभूविम्बत्रयं श्रीचक्रमीरितम् ॥

Paṭala III (Fol. 2B):—

शृणु देवि प्रवक्ष्यामि दीक्षाकारणसञ्चयम् ।
यन्तमेवक्रमन्यासानेकोनया तानसाधयेत् ॥
विद्याखण्डत्रयोपेतां त्रिपीठाङ्किदलान्तरे ।
कामरूपकजालंध्र-पूर्णभूपूरसंज्ञकान् ॥

Paṭala IV (Fol. 3B):—

अथ चक्राणि चक्रेभ्यो विद्याश्चैव विभूतयः ।
शृणु देवि पुराप्रोक्तमेवया चोदितं क्रमात् ॥

भूबीजात् व्यक्षरा जाता श्रीकण्ठा गुणशालिकाः ।
वाक्काम-शक्त्यादिगुणा दशाष्टदशरूपिणः ॥

Paṭala V (Fol. 4B) :—

अथ वक्ष्यामि देवेशि नवयोन्यंकि[तं] परम् ।
चतुश्चत्वारिंशदस्रचक्रं पञ्चस्वरूपकम् ॥

Paṭala VI (Fol. 5B) :—

अथ वक्ष्यामि देवेशि दीक्षितो गुरुणा सता ।
प्रातरुत्थाय शिरसि यजेत् श्रीगुरुपादुकाम् ॥

Paṭala VII (Fol. 7B) :—

शृणु देवि प्रवक्ष्यामि विद्यायाः साधनं परम् ।
मङ्गलाचारसम्पन्नो जपेद्विद्या त्रिलक्षकाम् ॥

Paṭala VIII (Fol. 8B) :—

अथ वक्ष्यामि वाक्सिद्धिप्रमुखाखिलकल्पयन् ।
शुक्लां वा लोहितां देवीं पुस्तकाक्षस्रगुज्ज्वलाम् ॥
वराभयकरां ध्यायेद्विद्यां वाचा जपेत् प्रिये ।
वेष्टयेदपि तच्चक्रं देवि तद्विद्यया सह ॥

Paṭala IX (Fol. 9A) :—

अथ वक्ष्यामि देवेशि मालामन्त्रं द्विधा मतम् ।
वर्णमाला रश्मिमाला सद्यः फलकरं नृणाम् ॥

Paṭala X (Fol. 10B) :—

वक्ष्ये शेषरहस्याख्यमशेषक्रमदायिका ।
शक्तिं कल्याणविद्यायाश्चक्रमध्यक्षशालिनाम् ॥

Last Colophon :—

इति श्रीमद् आनन्दार्णवतन्त्रे कल्याणचतुःशतीसंहितायां रहस्य-
कथनं नाम दशमः पटलः ।

In the colophons of the sixth and the last Paṭala the work is also called चतुःशती संहिता ।

6018.

169. ज्ञानतन्त्रम् । *Jñānatantram.*

Substance, country-made yellow paper. 18 x 3½ inches. Folia, 8. Lines, 6–7 on a page. Extent in ślokas, 83. Character, Bengali. Appearance, old. Complete in nine chapters.

The present manuscript has been described in L. I. 444.

This MS has nine chapters. A tenth chapter is found in HPR. I. 124. It is in the form of an interlocution between Śiva and Nārada.

6019.

1851. योगिनीतन्त्रम् । *Yoginītantram.*

Substance, country-made yellow paper. 10 x 4 inches. Folia, 47. Lines, 7–8 on a page. Extent in ślokas, 1,475. Character, Bengali. Appearance, fresh. Incomplete.

The present MS contains the first part in 19 Paṭalas. The entire work, in two parts, has been described in IO. IV. 2555 and published in the *Vividhatantrasaṃgraha* as also by J. Vidyāsāgara (Calcutta, 1897). Khemraj Krishnadas (Bombay, V.S. 1960), and Narayan Vandyopādhyāya (Calcutta, 1294 B.S.). The title page of the last of these editions attributes the work to Śaṅkarācārya Kāpālika.

6020.

4604. *Yoginītantram.*

Substance, country-made paper. 16½ x 3½ inches. Folia, 66. Lines, 6 on a page. Extent in ślokas, 1,475. Character, Bengali. Appearance, fresh. Incomplete.

This MS also contains only the first part in 19 chapters.

6021.

5173. *Yoginītantram.*

Substance, country-made paper. 14¾ × 4¾ inches. Folia, 21. Lines, 9 on a page. Extent in ślokas, 475. Character, Bengali. Appearance, discoloured. Incomplete.

This MS runs from the beginning up to a portion of chapter VIII of the first part.

6022.

3388. लिङ्गार्च्चनतन्त्रम् । *Liṅgārcanatantram.*

Substance, country-made paper. 16 × 5 inches. Folia, 21. Lines, 9 on a page. Extent in ślokas, 900. Character, Bengali. Appearance, fresh. Complete in 18 chapters.

The work has been described in CS. V. 83 and L. I. 288. It is a Śaiva work dealing with the worship of the phallic emblem of Siva and allied matters.

6023.

4599. *Liṅgārcanatantram.*

Substance, country-made paper. 17 × 3½ inches. Folia, 10. Lines, 10 on a page. Extent in ślokas, 400. Character, Bengali. Date, Śaka 1691. Appearance, discoloured. Complete.

This MS is almost of the nature of a *paddhati* containing extracts from the Tantra. Colophons of only the first and last chapters are found here.

Post Colophon :—

श्रीपरदेवतायै नमः ॥

श्रीकालीशङ्करदेवशर्म्मणा श्रीरामकिङ्कर-देवशर्म्मकः पुस्तक-मिदम् ।

शकाब्दा १६९१ मेदिनीपुरस्थ श्री............

The name is blurred over with ink.

6024.

4673. *Liṅgārcanatantram.*

Substance, country-made paper. 17 × 5½ inches. Folia, 18. Lines, 12 on a page. Extent in ślokas, 802. Character, Bengali. Appearance, discoloured. Complete in 18 chapters.

Post Colophon :—

श्रीयुक्तलाला रामगतिराय-महाशयस्य पुस्तकमेतत् श्रीहरचन्द्र-लेखस्य स्वाक्षरस्य । ॐ नमो गुरवे ।

6025.

4699. *Liṅgārcanatantram.*

Substance, country-made paper. 17½ × 6 inches. Folia, 36. Lines, 14 on a page. Extent in ślokas, 882. Character, Bengali. Appearance, discoloured. Incomplete.

This MS runs from the beginning up to a portion of chapter XVIII.

6026.

1620. कामाख्यातन्त्रम् । *Kāmākhyātantram.*

Substance, country-made yellow paper. 13½ × 3 inches. Folia, 25. Lines, 6 on a page. Extent in ślokas, 450. Character, Bengali. Appearance, old. Complete in 9 chapters.

The work has been described in L. III. 1067 and published in the *Vividhatantrasaṃgraha.*

6027.

3166. *Kāmākhyātantram.*

Substance, European foolscap paper. 14½ × 3 inches. Folia, 28. Lines, 5 on a page. Extent in ślokas, 402. Character, Bengali. Written in red ink. Appearance, discoloured. Complete in nine chapters.

The last verse of the MS described in L. III. 1067 and of the printed edition is not found in the present MS.

6028.

/ 5965. **करङ्किणीमततन्त्रे यक्षिणीकल्पः ।** *Yakṣiṇīkalpa from the Karaṅkiṇīmatatantram.*

Substance, Kāśmīri paper 10½ × 6¼ inches. Fola, 6. Lines, 11 on a page. Extent in ślokas, 100. Character, modern Kāshmiri. Appearance, fresh. Complete.

It is not clear as to whether this is an original Tantra or a compilation based on one. It deals with the cult of Yakṣiṇīs.

Beginning :—

ॐ श्रीगणेशाय नमः ।

ॐ बालेन्दुमोर्द्धबज्ज्वलजटाजटिलमौलये ।
त्रिपुरान्ध(न्त)ध्वजध्वंसपण्डिताय पिनाकिने ॥
करङ्किणीमते तन्त्रे सिद्धभावसमन्वतः ।
निर्गतं तत्प्रसादेन किञ्चिदुद्दिश्यते मया ॥
विचित्रा विभ्रमा हंसी भीषणाञ्जनरञ्जिका ।
विशाला मदना घण्टा कालकर्णी महाभया ॥
माहेन्द्री शङ्खिनी चान्द्री श्मशानी वटयक्षिणी ।
मेखला विकला लक्ष्मीः मालिनी शतपत्रिका ॥
सुलोचना सुशोभाढ्या कपाली च पिनाकिनी ।
नटी कामेश्वरी देवी कर्णरेखा च सुन्दरी ॥
मनोहरी प्रमोदा तु खड्गिनी मलकेशिनी ।
भोगिनी पद्मिनी पूर्णा स्वर्णवती रतिप्रिया ॥
इति षट्त्रिंशदाख्याता यक्षिण्यो वरसिद्धिदाः ।
करङ्किणीमते तन्त्रे शम्भुदेवेन भाषिताः ॥
आराधनमहं तासां प्रवक्ष्यामि समासतः ।

End :—

पिशाचिनी भवेत्तुष्टा कर्म्मान्ते भोजने कृते ।
सप्तविंशतिदीनारान् प्रत्यहं संप्रयच्छति ॥
ॐ चर्च्चितौ पिशाचिनि स्वाहा ।

Colophon :—

इति यक्षिणीकल्पः सम्पूर्णः समाप्तः
शुभमस्तु लेखकपाठकयोः ।

6029.

155. गायत्रीब्राह्मणोल्लासतन्त्रम् ।

Gāyatrībrāhmaṇollāsatantram.

Substance, country-made paper. Folia, 38. Lines, 6 on a page. Extent in ślokas, 875. Character, Bengali. Appearance, old. Complete in five chapters.

The present MS has been described in L. I. 481. The work, in five chapters, has been published in the *Vividhatantrasaṃgraha* and the *Sulabhatantraprakāśa* under the name of *Gāyatrītantra*.

The list of contents given at the end of the manuscript :—

अथ गायत्रीतन्त्रनिर्घण्टं ।

गायत्रीध्यानकथनम् १, ऋष्यादिन्यासकथनम् १, मुद्राकथनम् २, वर्णन्यासकथनम् २, अक्षरवर्णकथनम् २, त्रिपदागायत्रीकथनम् २, प्रणवमेरुसेतुकथनम् ३, गायत्रीकथनम् ३, क्षत्रियवैश्ययोर्द्विपदागायत्रीकथनम् ३, गायत्रीवर्णस्य देवताकथनम् ३, गायत्रीपुटितेष्टमन्त्रकथनम् ४, गायत्रीजीवात्मनोरभेदकथनम् ४, प्रसङ्गे गायत्रीजपे दशांशहोमादिनिषेधकथनम् ४, आधाराधेयकथनम् ४, गणेशादिपूजाकथनम् ५, लिङ्गस्य पूजातत्त्वकथनम् ६, लिङ्गार्धदेवीध्यानकथनम् ६, शिवलिङ्गस्य तत्स्थाने विकल्पकथनम् ७, शिवलिङ्गविशेषपूजाकथनम् ७, सर्वलिङ्गदानफलकथनम् ७, शिव इति वर्णद्वयार्थकथनम् ८, शिव-

पूर्व्वजन्मशतैरेव रोहिकपापकथनम्, बलिदानप्रशंसाकथनम्, गुरोराज्ञा विना कर्म्मारम्भे दोषकथनम्, शारदीपूजाकथनम्, शरत्कालीयमहाष्टम्यां महाबलि-निषेधकथनम्, महाबलिकथनम्, शुद्धसत्त्वात्मककथनम्, सामवेदादिध्यानमन्त्र-कथनम्, कलौ वेदपाठनिषेधकथनम्, मोहं मन्त्रेण त्यागकथनम्, गायत्री-रहस्यपर्य्यायकथनम् ।

6030

10675. *Gāyatrībrāhmaṇollāsatantra.*

Substance, country-made paper. 15 × 3¾ inches. Folia, 29 (marked 7-35). Lines, 8 on a page. Extent in ślokas, 850. Character, Bengali. Appearance, discoloured. Complete in five chapters.

Post Colophon :—

गगने + शातुकर्णाश्रयाविनाशामम्बाद्दे आगमसन्दर्भे समाप्तः
श्रीमाधवस्वामी । श्रीउमाकान्तधर्म्मेणास्य ।

6031.

8435. **सनत्कुमारसंहिता ।** *Sanatkumārasaṃhitā.*

Substance, country-made paper. 9½ × 3½ inches. Folia, 18. Lines, 10 on a page. Extent in ślokas, 540. Character, Nāgara. Date, Śaka 1611. Appearance, discoloured. Complete in 11 chapters.

This is a Vaiṣṇava Tantra in the form of a dialogue between Sanatkumāra and Pulastya.

The work, under the name *Sanatkumāratantra*, has been published in the *Vividhatantrasaṃgraha* and described in L. 1. 239.

Post Colophon :—

शुभमस्तु । श्रीकृष्णाय नमः । शाके १६११ मार्गशिर-शुक्ल-
द्वितीयायां श्रीरत्नेश्वरेण लिखितम् ।

6032.

4520. कामधेनुतन्त्रम् । *Kāmadhenutantram.*

Substance, country-made yellow paper. 13 × 3½ inches. Folia, 36. Lines, 7 on a page. Extent in ślokas, 980. Character, modern Bengali. Appearance, fresh. Complete in 24 chapters.

The **Kāmadhenutantra** in the present manuscript is complete in 24 paṭalas, whereas the printed editions in the *Viridhatantrasaṃgraha* and the *Sulabhatantraprakāśa* have 21.

Beginnings of the chapters XXII–XXIV :—

Chapter XXII :—

श्रीदेव्युवाच ।

देवदेव महादेव कृपया परमेश्वर ।
चन्द्रपर्व्व सूर्य्यपर्व्व मेघाच्छन्नं भवेद्यदि ॥
किं कर्त्तव्यं तदा देव जपहोमादिकर्म्मणः ।

Chapter XXIII :—

श्रीशिव उवाच ।

अपरैकं प्रवक्ष्यामि कामधेनोर्मतं शृणु ।
निर्म्माय लिङ्गं चार्व्वङ्गि शुद्धगोमयभस्मना ॥
ताम्रपात्रं च संस्थाप्य ब्रह्मरन्ध्रे शिवोपरि ।
निर्म्माय विधिवल्लिङ्गं सर्व्वं पार्थिववत् प्रिये ॥
तस्य पूजाफलं भद्रे मम ज्ञाने वरानने ।
कथितुं नैव शक्नोमि कल्पकोटिशतैरपि ॥

Chapter XXIV :—

श्रीदेव्युवाच ।

मालारहस्यं योगेन्द्र कथयस्व कृपानिधे ।
यदि पुष्पाक्षयेन्मन्त्रं ह्यरैर्ज्ञाति तत्कथम् ॥
मुखाद्यदि जपेन्मन्त्रं पुष्पस्य चञ्चलं भवेत् ।
चञ्चले सति चार्व्वङ्गि तज्जपं विफलं भवेत् ॥

6033.

3993. माहेश्वरतन्त्रम् । *Māheśvaratantram.*

Substance, country-made paper. 11×5¼ inches. Folia, 168. Lines, 8 on a page. Extent in ślokas, 3,528. Character, Nāgara. Appearance, fresh. Date, Samvat, 1946. Complete in 51 Paṭalas.

The present MS contains the last part of the work in 51 chapters which describe the story of Kṛṣṇa and his greatness and lays down the rules of his worship.

Beginning :—

श्रीगणेशाय नमः ।

देवदेव महादेव करुणार्णवशङ्कर ।
हर शम्भो शिवमृड पशुनाथ नमोऽस्तु ते ॥
नमस्ते सर्व्वदेवानां दैवताय परात्मने ।
पिनाकिने नमस्तुभ्यं गङ्गाधर नमोऽस्तु ते ॥
भूतिभूषितदेहाय भक्तानामभयङ्कर ।
कर्पूरविशदाभाय त्रिनेत्राय नमोऽस्तु ते ॥
... ...
त्वया प्रोक्तानि तन्त्राणि चतुःषष्टिमितानि भोः ।
न तेषु तत्त्वविज्ञानं प्रकटीकृतमीश्वर ॥
तत् प्रकाशय देवेश प्रवक्तुं यदि मन्यसे ।

शिव उवाच ।

नैतज्ज्ञानं वरारोहे वक्तुं योग्यं वरानने ।
राज्यं देयं शिरो देयं देयं सर्व्वस्वमप्युत ।
न देयं ब्रह्मविज्ञानं सत्यं सत्यं शुचिस्मिते ।
ब्रह्महत्यासहस्राणि कृत्वा यत् पापमश्नुते ।

तत् पापं लभते देवि परमार्थप्रकाशनात् ।

... ...

... ...

तस्मात्तु गोपयेद्विद्वान् जननीजारगर्भवत् ।

End :—

इत्युक्ता पार्व्वतीचित्ते लीलामाधाय वर्णिताम् ।
अवाप परमानन्दं हर्षाश्रुपुलकाञ्चिता ॥ ११५

Colophons of the different chapters :—

5A, इति श्रीमन्माहेश्वरतन्त्रे ज्ञानखण्डे प्रथमं पटलम्: 9B, श्रीमन्माहेश्वरतन्त्रे शिवोमासम्वादे द्वितीयं पटलम्; 15A, ०तत्त्वसारे उत्तरखण्डे तृतीयं पटलम्; 19B, ०शिवपार्व्वतीसम्वादे चतुर्थः पटलः; 22B, इति श्रीमन्माहेश्वरतन्त्रे पञ्चमं पटलम्; 26A, इति श्रीमन्माहेश्वरतन्त्रे शिवपार्व्वतीसम्वादे तत्त्वसारे उत्तरखण्डे षष्ठपटलम्; 32A, ०शिवपार्व्वतीसम्वादे उत्तरखण्डे सप्तमं पटलम्; 34A, इति श्रीमन्माहेश्वरतन्त्रे अष्टमं पटलम्; 35A, ०नवमं पटलम्; 38A, ०दशमं पटलम्; 41B, ०एकादशमं पटलम्; 44A, ०द्वादशपटलम्; 47A, ०त्रयोदशमं पटलम्; 49A, इति श्रीमन्माहेश्वरतन्त्रे गुप्तसारे चतुर्दशमं पटलम्; 51B, इति श्रीमाहेश्वरतन्त्रे पञ्चदशमं पटलम्; 53B, ०षोडशमं पटलम्; 57A, ०सप्त[दश]मं पटलम्; 60B, ०उत्तरखण्डे अष्टादशमं पटलम्: 63B, ०एकोनविंशतिमं पटलम्; 67A, ०विंशतिमं पटलम्; 70B, ०एकविंशतितमं पटलम्; 73A, ०द्वाविंशतिमं पटलम्; 75B, ०त्रयोविंशतिमं पटलम्; 77B, ०चतुर्व्विंशतिमं पटलम्; 79B, ०पञ्चविंशतिमं पटलं; 82A, ०षड्विंशतिमं पटलम्; 85A, ०सप्तविंशतिमं पटलम्; 89B, ०शिवोमासंवादे अष्टाविंशतिमं पटलम्; 92A, ०गुप्तसारे अष्टाविंशतितमं पटलम्; 94B, ०एकोनत्रिंशत्तमं पटलम्; 97B, ०त्रिंशत्तमं पटलम्; 102A, ०एकत्रिंशत्तमं पटलम्; 106B, इति श्रीमन्माहेश्वरतन्त्रे उत्तरखण्डे शिवोमासम्वादे मन्त्रपुरश्चरणविधिनिरूपणं नाम द्वात्रिंशत्तमं पटलम्; 109B, इति श्रीमन्माहेश्वरतन्त्रे शिवगौरीसम्वादे यथावश्यागमननिरूपणं त्रयस्त्रिंशः पटलः; 111A, ०चतुस्त्रिंशः पटलः; 112B, ०पञ्चत्रिंशपटलम्;

114A, ०षट्त्रिंशः पटलः; 119B, ०सप्तत्रिंशपटलम्; 123A, ०अष्टत्रिंश-पटलम्; 126B, ०एकोनचत्वारिंशं पटलम्: 129A, ०चत्वारिंशपटलम्; 131A, ०एकचत्वारिंशत्तमं पटलम्; 134A, ०द्विचत्वारिंशत्तमपटलम्; 136B, ०त्रिचत्वारिंशत्तमं पटलम्; 141B, ०चतुश्चत्वारिंशत्तमं पटलम्; 146A, ०पञ्चचत्वारिंशत्तमपटलम्; 147B, ०षट्चत्वारिंशत्तमपटलम्; 149B, ०पुरुषोत्तमस्तवो नाम सप्तचत्वारिंशत्तमं पटलम्; 152B, ०अष्टचत्वारिंशत्तमं पटलम्; 157B, ०ऊनपञ्चाशत्तमं पटलम्; 162A, ०गोलोकवर्णने पञ्चाशत्तम-पटलम्; 168B, ०उत्तरखण्डे एकपञ्चाशत्तमः पटलः।

Post Colophon :—

सम्पूर्णमिदं माहेश्वरतन्त्रम्। शुभमस्तु। संवत् १९४६ पुस कृष्ण १० मङ्गल।

6034.

2887. **राजराजेश्वरीतन्त्रे शाक्ताभिषेकः।** *Śāktābhiṣekaḥ from the Rājarājeśvarītantram.*

Substance, country-made yellow paper. 16 × 4 inches. Folia, 3. Lines, 8 on a page. Extent in ślokas, 80. Character, Bengali. Appearance, fresh. Complete.

Another MS of the work is noticed in VSP (p. 45).

Colophon :—

इति राजराजेश्वरीतन्त्रे देवीश्वरसंवादे शाक्ताभिषेकः समाप्तः।

Beginning :—

ईश्वर उवाच।

गुप्तं सर्व्वेषु तन्त्रेषु तत्र स्नेहेन पार्व्वती।
अभिषेकं प्रवक्ष्यामि सर्व्वरोगभयापहम्॥
धन्यं यशस्यमायुष्यं सर्व्वपातकनाशनम्।
सर्व्वाशापूरकं सर्व्वमन्त्रदोषनिवारणम्॥

... ...

... ...

विकारे देशिकः कुर्य्यादभिषेकं विचक्षणः ।
अत्सौभाग्ये च नारीणामभिषेकः प्रवर्त्तते ॥

6035.

3927. शाम्भवीतन्त्रे ज्ञानसङ्कुली ।

Jñānasaṅkulī from the Śāmbhavītantram.

Substance, country-made paper. 13¾ × 3 inches. Folia, 9. Lines, 7 on a page. Extent in ślokas, 200. Character, Bengali. Date, Śaka 1757. Appearance, fresh. Complete.

The work deals with Yoga topics. No mention of the name *Śāmbhavītantra* is found in the MS of the work as described in L. IX. 2957. Fragments of the *Śāmbhavītantra* are noticed in VSP (p. 52).

Beginning :—

अथ शाम्भवीतन्त्रम् ।

नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ।
नमामि व्यक्तपुरुषं परं ब्रह्म च सर्व्वदा ॥

... ...

श्रीदेव्युवाच ।

कुतः सृष्टिर्भवेद्देव कथं सृष्टिर्विनश्यति ।
अव्यक्तं ब्रह्मणो ज्ञानं सृष्टिसंहारवर्ज्जितम् ॥
ब्रह्मज्ञानं कथं देव सृष्टिसंहारवर्ज्जितम् ।

End :—

अनुपमं निराधारं निःशब्दं शब्द उच्यते ।
अचलत् निर्मलं चैव शून्यव्यापी निरञ्जनम् ॥
वेदान्तसारसर्वस्व + मात्रे शिवभाषितम् ।
सिध्यन्ति सर्वयोगिनां नात्र कार्य्या विचारणा ॥

Colophon :—

इति श्रीयोगशास्त्रे शाम्भवीतन्त्रे उमामहेश्वरसंवादे ज्ञानसंकुली समाप्ता ।

Post Colophon :—

श्रीकृष्णमोहन देवशर्म्मणो लिपिरियम् । शक १७ । ५७ । ११ भाद्रस्य ।

6036.

4596. नितान्ततन्त्रे पुरश्चर्याविधिः । *Puraścaryāvidhi from the Nitāntatantram.*

Substance, country-made paper. 16½ × 4 inches. Folio, 1. Lines, 8 on a page. Extent in ślokas, 84. Character, modern Bengali. Appearance, fresh. Incomplete.

The work has been described in L. I. 387 under the name *Saṃkṣepapuraścaraṇa*. A MS of the work has been noticed in VSP (p. 37).

Beginning :—

ॐ नमो गणेशाय ।

नितान्ततन्त्रे ।

संक्षेपेण पुरश्चर्यां वक्ष्यामि शृणु पार्व्वति ।
यां कृत्वा साधको देवि परं मोक्षमवाप्नुयात् ॥
अशेषदुरितध्वंसो मन्त्रसिद्धिर्भवेद्ध्रुवम् ।
काम्यसिद्धिर्महासिद्धिर्भवेदेव न संशयः ॥

6037.

266. भावचिन्तामणिः । *Bhāvacintāmaṇi.*

Substance, country-made paper. 11¾ × 6 inches. Folia, 4. Lines, 13 on a page. Extent in ślokas, 133. Character, Nagara. Date, Saṃvat 1796. Appearance, new. Complete in six chapters.

The present MS has been described in L. IV. 1520. It contains the sixth chapter of the work, dealing with the good and bad omens for children as indicated by the positions of astronomical bodies. The MS seems to be the concluding part of a bigger work called सन्तानदीपिका, which name occurs in the last colophon and on the left margin of Fol. 1A, 3B.

6038.

10826. **विश्वसारतन्त्रे गूढावतारः ।** *Gūḍhāvatāra from the Viśvasāratantram.*

Substance, country-made paper. 13 × 4½ inches. Folia, 2. Lines, 12 on a page. Extent in ślokas, 58. Character, Bengali. Appearance, discoloured. Complete.

In the form of an interlocution between Śiva and Pārvatī it gives an account of the incarnation of Viṣṇu as Caitanya. The mantra and gāyatri of Caitanya are also given.

This very topic is assigned in VSP (p. 50) to the 11th chapter of the last part of the *Viśvasāroddhāra Tantra* and not to that of the *Viśvasāra* as in the present MS.

Beginning :—

श्रीश्रीराधाकृष्ण ।

श्रीपार्व्वत्युवाच ।

सर्व्वं श्रुतं महादेव त्वद्वक्त्रात् कवचादिकम् ।
मन्त्रपूजाविधिश्चैव श्रुतं योगादिका क्रिया ॥
साम्प्रतं श्रोतुमिच्छामि देवानामपि दुर्लभम् ।
गोलोकानन्दनाथस्य गूढावतरणं कलौ ॥
... ...

सदाशिव उवाच ।

... ...
श्रीनवद्वीपमध्ये कलौ प्रथमसन्ध्यायाम् ।
हरिजनि[र]भूत् गौराङ्गदेवः स्वयम् ॥

. . ..

गङ्गाया दक्षिणे भागे नवद्वीपे मनोहरे ।

कलिपापविनाशाय शचीगर्भे सनातनः ॥

... ...

षडष्टाशवेदेन कलेरब्दे समागते ।

जम्बुद्वीपे पुण्यक्षेत्रे वर्षे भारतसंज्ञके ।

आविर्भासि श्रीयमिश्रपुरन्दरगृहे स्वयम् ॥

Colophon :—

इति विश्वसारतन्त्रे उत्तरखण्डे हरपार्वतीसंवादे श्रीगौराङ्ग-भावस्य कलौ गुप्तावतारमेकादशपटलः समाप्तः ।

Post Colophon :—

शाकं सप्त त्रिधुः षडेव मुनिना मासे शुचौ ॥

6039.

4650. **महानिर्वाणतन्त्रम् ।** *Mahānirvāṇatantram.*

Substance, country-made paper. 19 × 4½ inches. Folia, 106. Lines 7 on a page. Extent in ślokas, 2,940. Character, Bengali. Appearance, fresh. Complete.

The present MS contains the first part in 19 chapters. The work has been published in the *Vividhatantrasaṃgraha* and in the *Tantrik Texts* of Arthur Avalon (Calcutta, 1929). For various other editions of the work cf. BM 1892–1906, p. 718; 1906–1928, p. 1074.

Post Colophon :—

श्रीरामशिवशर्मणः पुस्तिकेयम् ।

6040.

5844A. हाटकतन्त्रम् । *Hāṭakatantram.*

Substance, country-made paper. 8 × 4½ inches. Folia, 1 to 7, 24 to 27. Lines, 9 on a page. Extent in ślokas, 125. Character, Nāgara. Appearance, discoloured. Incomplete.

The present MS contains only three sections of the work.

Beginning .—

श्रीगणेशाय नमः ।

श्रीपार्वत्युवाच ।

देवदेव जगन्नाथ तपश्चर्यादिसाधनम् ।
पञ्चदादशवर्णीनां साधनं हि मुमुक्षुणाम् ॥

शङ्कर उवाच ।

षड्गुष्वापर्णे यत्नेन कथयामि समासतः ।
पञ्चामेदादशादीनां साधनं सम्यगुच्यते ॥
पञ्चाग्निसाधनार्थाय प्राचीं संसाध्य यत्नतः ।
तत्र । प्राचीसंसाधनार्थाय भूमिसंशोधनं कुर्य्यात् ।

This section breaks off abruptly at the 7th leaf.

On Fol. 24 begins धूमपानविधि as follows :—

अथ वक्ष्ये महेशानि धूमपानविधिं शुभम् ।
यस्यानुष्ठानमात्रेण देवता सम्प्रसीदति ॥
प्राचीं संसाध्य यत्नेन शुभतीर्थोपपीठके ।
कृत्वा वेदिं चतुर्हस्तां मण्डपाच्छादितां शुभाम् ॥
पताकातोरणाद्येन कलशेनोपशोभिताम् ।
मण्डपस्याग्रदिग्भागे लोकपालान् यजेत्सुधीः ॥
भैरवं मण्डपाग्निं च तोषयेद्बलिदानतः ।
वेद्या दक्षिणसौम्ये तु कूपयुग्मं खनेद्भुवि ॥

25A. कुण्डमध्ये त्रियंत्रैः च वाङ्क्वैकेन निश्चितम् ।
नालेन च समायुक्ता सिन्दूरकुसुमान्विता ॥
सात्त्विकी राजसी चैव मेखला चोर्द्ध्वतः क्रमात् ।
इति कुण्डविनिर्माणं पश्चात् कर्म्म प्रकाशय तत् ॥

25B. तस्योपरि प्रतिष्ठाप्य वस्त्रैश्छिद्रान्वितान् बहून् ।
होमशेषमन्त्रगायत्र्या साज्येन मन्त्रसिद्धये ॥
शतमष्टोत्तरं हुत्वा तथा मन्त्रस्य सिद्धये ।
देवतावरणार्थञ्च प्रागेव विधानकम् ॥
पूजनस्थप्रदेशे तु बिलं वक्त्रचतुष्कमम्
तस्योपरि न्यसेत् पद्मस्थां नलिकां षोडशाङ्गुलाम् ।
मूले स्थूलाञ्च सूक्ष्मा चैकाग्रशाखा विभान्विता ।
तस्योपरि स्वयं तिष्ठेत् लम्बमानमधोमुखः ॥
स्थूलामध्यविभागे तु संलग्नहृदयपदाम्बुजः ।
नलिकाग्रे मुखं क्षिप्य धूममधाच्छनैः शनैः ॥

On Fol. 26B begins शीतसाधनविधि as follows:

ईश्वर उवाच ।

अथ वक्ष्ये महेशानि शीतसाधनकर्म्मणः ।
विधानं शृणु मन्त्राणां साधनं परमं मतम् ॥
शुद्धं जलाशयं प्राप्य नदी वाथ तटाकम् ।
प्रवाहरोधनं कृत्वा मध्ये वेदीं प्रकल्प्य च ॥
सिकतापूरिता शुद्धा पूर्व्ववद्धर्म्मदानतः ।
ध्वजभूषणभूषाभ्यां शान्तिकल्प यथाविधि ॥
तत्रोपविष्टो नियतमाकण्ठजलमध्यगः ।
रात्रि[ं] प्रहरपर्य्यन्ते तु मुहूर्त्तत्रितयावधि(ः) ॥
दिवा भवति यावद्वै तावन्मन्त्र[ं] समभ्यसेत् ।
जलमातृ[ः] प्रपूज्यादौ घृतधाराभिरन्वहम् ॥
गुरूपदिष्टविधिना देवताभावसिद्धये ।
मार्गपूर्णां समारभ्य यावत् फाल्गुणीपूर्णिमा ॥
तावत् कार्य्यं प्रयत्नेन शीतसाधनमुत्तमम् ।

6041.

5844B. भैरवतन्त्रम् । *Bhairavatantram.*

Substance, country made paper. 8 × 4¼ inches. Folia, 27B-29, 31-36, 7-8. Lines, 8, 9 on a page. Extent in ślokas, 115. Character, Nāgarī. Appearance, old. Incomplete

Topics (like वह्निसाधन, धूमपान and प्रीतसाधन) which are here stated (Fol. 32A) to have been dealt with previously (apparently in the earlier parts of the work) are found in what is called the *Hārakatantra* in another part of the same MS described under the previous number.

Beginning :—

अथ भैरवतन्त्रोक्त-मन्त्रसाधनविधि[ः] लिख्यते ॥

पार्व्वत्युवाच ।

देवदेव जगन्नाथ शूलिन् त्रैलोक्यपावन ।
मन्त्राणां साधनोपायं वद मे त्वं जगद्गुरो ॥
कर्म्मणा येन जन्तूनां मन्त्राणां सिद्धिरुत्तमा ।
धर्म्मार्थकाममोक्षाणां जायते तद्वदस्व माम् ॥
भूर्भुवःस्वः पतित्वं च शक्रादिमरुतां तथा ।

... ...

स्थावरं जङ्गमं विश्वं यस्य दृष्ट्यवलोकनम् ।
उदयञ्च क्षयं याति तन्मे कथय शङ्कर ॥

ईश्वर उवाच ।

साधु पृष्टं महादेवि सर्व्वब्रह्माण्डमण्डपे ।
मन्त्राणां साधनोपायं सर्व्वसिद्ध्येकसाधनम् ॥
धर्म्मार्थकाममोक्षाणां साधनं परमं महत् ।
भूरादीनां हि लोकानां शक्रादीनां तथा परं ॥
रम्भादिललनानां च भोक्तृत्वस्यैकसाधनम् ।
चराचरस्य विश्वस्य तथा पातालवासिनाम् ॥

प्रसुत्वं याति वेगाच्च सुरपूज्यो भवेन्नरः ।
तस्योपायमहं वक्ष्ये तच्छृणुष्व सुभेक्षणे ॥

... ...

... ...

29A, सिद्ध(सौद्ध)साध्यादिभिर्भेदैः शुद्धमन्त्रं विचारयेत् ।
ऋणादि-सिद्धिशोधित मन्त्रदीक्षां विधानतः ॥

... ...

... ...

+ + + मनसा ध्यानं पुरश्चर्यां समाचरेत् ।
जपहोमादिभिर्नूनं देवताभावमाप्य च
गन्धमाल्यादिमन्त्रैश्च श्रीगुरोः शिक्षया पुनः ।
तारकस्तुर्विधं कुर्यात् प्रमत्तादिकमन्यथा ।
रक्तार्कधूमपीतानां साधनन्तु क्रमाच्छृणु ॥
वह्नेस्तु साधनं प्रोक्तं चक्रपञ्चकतत्त्वतः
दाराद्यानां तथा + + साधनं परमं महत् ॥
श्रौतं वा स्मार्त्तकं वापि स्वस्थेन सुखसिद्धिदम्
सूर्य्यकान्तसमुद्भूतं श्रेष्ठमभ्यासमं कुरु ॥
लौकिकाग्निः परो विन्दुः स चेद् ग्राह्यो यदा भवेत् ।
श्रौतस्मार्त्ताग्निका ग्राह्या नान्यो ग्राह्यः कदाचन ॥

The only colophon found in this MS runs as follows :—

32A, इति भैरवतन्त्रे ईश्वरपार्वतीसंवादे एकादि-द्वादशाद्यैः साधनं समाप्तम् ।

On Fol. 32A begins a new section as follows :—

श्रीदेव्युवाच ।

महादेव महेशान तपोराशे जगत्पते ।
भुवनाक्षरसंख्यानां मन्त्रसिद्धिप्रदायक ॥

एकेन साधनेनैव साधिताः सर्व्वसिद्धयः ।
भवन्ति नियतं शम्भो भूतनाथ जगत्पते ॥
सिद्धोपायं परं ब्रूहि मन्त्रसाधनसिद्धये ।
कृपया देवदेवेश यद्यहं तव वल्लभा ॥
कथितं ते पुरानाथ श्मशानाकाशनिवासकम् ।
धूमपानञ्च शीतस्य साधनं परमं स्थितम् ॥
एकेन कर्म्मणा सिद्धिर्भवेत् पुंसां शिवात्मनाम् ।
चतुर्भिर्या भवेत् सिद्धिः सा सिद्धिः प्राप्यते नृणाम् ॥

भैरव उवाच ।

शृणु वक्ष्ये महेशानि साधकानां हिताय च ।
अनुग्रहाय लोकानां मन्त्रसिद्धिकरं परम् ॥
सर्व्वानुष्ठानतः श्रेष्ठं तपसः साधनं परम् ।
कथयामि महेशानि परं श्रेयोऽधिसाधनम् ॥
धर्म्मार्थकाममोक्षाणां साधनं सम्प्रकीर्त्तितम् ।
भूर्भुवःस्वरादिलोकानां कैलासावधिवासिनां ॥
लम्पत्वकरणं श्रेष्ठं धर्म्मयोः साधनं परम् ।
शृणुष्वैकाग्रमनसा यदि पृच्छसि भामिनि ॥
नदीतीरे पर्व्वतवरे प्रत्यन्ते शिवालये ।
शक्तिक्षेत्रे शुभे पीठे श्मशाने वा सुरेश्वरि ॥
भूमिं समां विधायाथ सवर्णां चित्तहारिणीम् ।
सिद्धिदां कूर्म्मसदृशीं विशुद्धां सुशोभिनीं ॥

6042.

2162. भैरवीतन्त्रे भैरवदीपदानविधिः ।

Bhairavadīpadānavidhi from the Bhairavītantram.

Substance, country-made paper. 10 × 5 inches. Folium, 1. Lines, 20 on a page. Extent in ślokas, 22. Character, Nāgara. Appearance, fresh. Complete.

The present MS has been described in L. X. 4044. It describes the process of the offering of lamps to Vaṭuka-bhairava.

Post Colophon :—

संवत् १८१८ माघ सु ४ लि ।

6043.

4802. मेरुतन्त्रम् । *Merutantram.*

Substance, Nepalese paper 12 × 4 inches. Folia 56. Lines 9 on a page. Extent in ślokas, 2,500. Character, Newari. Appearance, old and discoloured. Incomplete.

The present MS contains chapters VI–X of the work. The whole work in 35 chapters has been published by Kshemaraj Krishnadas (Bombay, 1908). For a description of the work see HPR. I. 294, II. 169, CS. V. 69, CG. IV. 2570

6044.

1890. *Merutantram.*

Substance, country-made paper. 9 × 4¼ inches. Folia 18. Lines 5 on a page. Extent in ślokas, 300. Character, Nāgara. Appearance, tolerable.

This MS contains the sixth chapter of the work. This chapter deals with Puraścaraṇa.

6045.

10301. *Merutantram.*

Substance, country-made paper. 12 × 6 inches. Folia, 6. Lines 10 on a page. Extent in ślokas, 180. Character, Nāgara. Date, Samvat 1814. Appearance, discoloured.

This MS contains (Fol. 1-5A) the पीठसम्भव (origin and description of the pīṭhas) section of the 10th chapter of the *Merutantra*. The extract given on Fol. 5A f. is incomplete and has no colophon. This portion begins as follows :—

त्रिकोणत्रितयं वृत्तं दलाष्टकविभूषितम् ।
भूपुरेण समाकीर्णं चतुर्द्वारोपशोभितम् ॥
यत्र कापालिनी देव्याः सर्व्वमाम्नायदायकम् ।
महाकालीं महालक्ष्मीं महासरस्वतीं तथा ॥
रतिप्रीति तथा कान्ति द्वितीयेत्थं तृतीयके ।
इच्छाज्ञानक्रियां चैव त्रिकोणे तु तृतीयके ॥
मध्ये कपालिनीं पूज्य दलाष्टौ मातृकार्च्चनम् ।
ततोऽष्टौ भैरवांश्चैव दिग्पालान् सायकान् यजेत् ॥

Post Colophon :—

संवत् १८१४ वर्षे कार्त्तिक सुदि १५ शुक्रवार : लिखितं विद्यारण्यौ वटुकनाथ देवशर्म्मा ।

6046.

3917D. योनिमन्त्रचिन्तामणितन्त्रम् । *Yonimantra-cintāmaṇitantram.*

Substance, country-made paper. 14 × 4 inches. Folia, 30B-52A. Lines, 11 on a page. In tripāṭha form. Character, Bengali. Appearance, old. Incomplete.

This MS contains only one chapter of the work dealing with the worship of the *Yoni* and cognate matters.

Beginning :—

ईश्वर उवाच ।

... ...

आधारोत्क्रमं कृत्वा कालाद्रूयर्पानिर्भयेत् ।
हृदयञ्च ततो गत्वा मुद्रां बद्धा पुरातनीम् ।

End :—

योनिबीजं महेशानि प्रतिपद्ये जपेत् प्रिये ।

ततश्च योनिकवचं..................... ॥

The *yonikavaca* referred to here then follows. It is styled त्रैलोक्यमङ्गल.

Colophon :—

इति योनिमन्त्रचिन्तामणितन्त्रे देवीश्वरसम्वादे प्रथमः पटलः ।

6047.

3176. निगमलतातन्त्रम् । *Nigamalatātantram.*

Substance European foolscap paper. 13 × 4½ inches. Folia, 51. Lines, 9 on a page. Extent in śloka 900. Character, Bengali. Appearance fresh. Complete in 40 chapters.

One MS of the work, complete in 24 chapters, corresponding to 27 chapters of the present MS, is described in HPR. I. 204. L. II. 699 describes another incomplete MS containing chapters IV–XV inclusive. VSP (p. 37) notices a MS of it running up to the 40th chapter.

Of the various deities mentioned in this work reference may be made to Vairocana, Śaṅkha, Pāṇḍava, Māmaka, Asita, Padmāntaka, Narakāntaka (Fol. 17A), Maṇidharivajriṇī, Mahāpratisarā (Fol. 18A), Akṣobhya (Fol. 20A, where he is called a ṛṣi, and Fol. 26B). The work deals with the details of Kaula worship.

Post Colophon Statement :—

ॐ नमः शिवपार्व्वतीभ्याम् ॥

पुस्तकमिदं श्रीकृष्णानन्दशर्म्मणः ।

6048.

3450. *Nigamalatātantram.*

Substance, country-made paper. 18 × 6¼ inches. Folia, 17. Lines, 12 on a page. Extent in ślokas, 600. Character, Bengali. Appearance, fresh. Complete in 24 Paṭalas.

The present MS contains the first 27 chapters of the MS described under the previous number.

6049.

185. निगमतत्त्वसारः । *Nigamatattvasāra.*

Substance, country made yellow paper. Folia, 24. Lines, 9-14 on a page. Extent in ślokas, 125. Character, Bengali. Incomplete.

The present MS is noticed in L. I. 407. It begins from the middle of the first chapter and runs up to the end of the third chapter.

The work deals with topics like the accurate mode of application of *mantras* and *stotras*, the recitation of the *caṇḍī*, the purification of the *pañcatattvas*, etc. The second chapter refers in the following words to the omnipotence and omnipresence of Brahman:

... ...

3A. कामिनीरूपमाश्रित्य कामिनीनां कलेवरे ।
कामोन्मत्तः कामयते परं ब्रह्मैव सर्वदा ॥
ऊर्द्ध्वशून्ये गतिर्यस्य मध्यशून्ये स्थितिः स्मृतः ।
शून्यान्ते क्रीडते ब्रह्म को विजानाति तत्त्वतः ॥
ऊर्द्ध्वशून्यं ब्रह्मरन्ध्रं भ्रुवोर्मध्ये तु मध्यमम् ।
मूलाधारेऽप्यधः शून्यं त्रयमेव प्रकीर्त्तितम् ॥
शून्यमूर्द्ध्वं यदा गच्छेत् तदा ब्रह्मविचारम् चरेत् ।
मध्यशून्यं यदा गच्छेत् तदा ध्यानादिचिन्तनम् ॥
अधःशून्ये यदा गच्छेत् तदा कामादिचिन्तनम् ।

ऊर्द्ध्वशून्याद् यदा मध्यं स गच्छति महेश्वर ।
तदा कौमारादिकं सर्व्वं स करोति न चान्यथा ॥
ऊर्द्ध्वशून्याद् यदा चाधः स गच्छति कुलेश्वर ।
तदा हास्यादिकं सर्व्वं स करोति न चान्यथा ॥
ऊर्द्ध्वशून्याद् यदा चाधः स गच्छति तदा ध्रुवम् ।
तृषाक्षुधादिकं सर्व्वं तदा सोऽपि करोति हि ॥
सम्प्रच्छन्नेन ब्रह्माण्डं स गच्छति महानिधि ।
गृहे गृहे च गन्तव्यं कौलार्थं परमं गुरुः ॥

... ...

... ...

... ...

यदा तु चक्रगो ब्रह्मसम्भूयपति परं विभुः ।
तदा कम्पयते सर्व्वं शरीरं हि कुलेश्वर ।
यदा गच्छेत् त्रिकूटस्थं तदा तापं करोत्यसौ
सर्व्वेच्छया ब्रह्मरन्ध्रं स गच्छति महेश्वर ।
मक्षिका कृमिकीटादिमर्कटाश्वादिसङ्कुलैः ।
कृमिरूपं समाश्रित्य सोऽपि तिष्ठति सर्व्वदा ॥
त्वां मां रूपभेदरूपमाश्रित्य कुलभैरव ।
स तिष्ठति परं ब्रह्म लीलया तु स्वमिच्छया ॥
घटादौ शून्यरूपश्च पटादौ शिल्पादिकम्
धर्म्मादिकाममोक्षार्थं आगमे च वितिष्ठति ॥
क्रियार्थं वेदशास्त्रेषु योगार्थं नानाकर्म्मसु ।
तत्त्वार्थं तर्कशास्त्रेषु निगमेषु निरूपकम् ॥

6050.

2891. *Nigamatattvasāra.*

Substance, country-made yellow paper. 12¾ × 4¾ inches. Folia, 17. **Lines, 5 on a page.** Extent in ślokas, 437. Character, Bengali. Appearance, fresh. Complete in 11 chapters.

The present MS is described in L. X. 4184.

6051.

4617. *Nigamatattwasāra.*

Substance, country-made paper. 17¼ × 4¼ inches. Folia, 7. Lines, 10 on a page. Extent in ślokas, 300. Character, Bengali. Appearance, discoloured. Complete in 11 chapters.

6052.

4676. **निगमकल्पद्रुमः ।** *Nigamakalpadruma.*

Substance, country-made paper. 16 × 6 inches. Folia, 8. Lines, 10 on a page. Extent in ślokas, 320. Character, Bengali. Appearance, discoloured. Complete in 10 chapters.

The work has been described in L. I. 293.

The cardinal views of the work appear in the following lines (Fol. 2B-3A):—

महाख्यसम्भवं योगं नारीदेहेऽस्ति भैरव ।
सप्तलक्ष-महाविद्या[:] कथिताः तव सुव्रत ॥
रोमकूपे वसन्त्येता मन्त्ररूपा[:] पृथक् पृथक् ।
यावन्ति सन्ति रोमाणि शरीरे प्राणवल्लभ ॥
तावद्देवाश्च देव्यश्च सन्ति तस्याः कलेवरे ।
तिस्रः कोट्यस्तदर्द्धेन तीर्थानि जाह्नवीजले ।
जाह्नवी योनिमूले च सततं परिसंस्थिता ॥
मूलस्थाने सदा मुक्तिं स्थापिताहं न संशयः ॥
प्रकृतिश्च पुमांश्चैव परं ब्रह्म प्रकीर्त्तितम् ।
पुमान् विन्दुस्वदने नादरूपा जगन्मयी ॥
तयोः संयोगमात्रेण ब्रह्मःपूजा विधीयते ।
निर्गतं यत् परं द्रव्यं तेन सम्पूज्य देवताम् ॥
शक्तिमन्त्रोपमन्त्रेण गोलीभूतं सदा शिवम् ।
देवीं सम्पीड्य ध्यानेन सदानन्दवर्द्धिनीम् ॥

तद्दृष्ट्वा मन्त्रेशान मुक्तिभाग् जायते नरः ।
अन्तर्यागमिदं प्रोक्तं बाह्ययागं ततोऽधिकम् ।
बिन्दुर्लिङ्गं शिवः पुंसः योनिर्नादस्वरूपिणी ॥
नादबिन्दुसमायोगादमृतं यत्र भैरव ।
तेनामृतेन द्रव्येण तर्पयेत् परदेवताम् ॥

6053.

8432. *Nigamakalpadruma.*

Substance, foolscap paper. 8 × 4 inches. Folia, 14. Lines, 9 on a page. Extent in ślokas, 350. Character, modern Nāgarī. Appearance, fresh. Complete in ten chapters.

The following verses are found after the tenth Paṭala:

मीनो येन न खादितो न चषकं येनापि नालिङ्गिता
कन्या येन न सेविता रतिसुखं पीतं न मद्यं तथा ।
पुत्री येन सहोदरा न भजिता मांसं च नो भक्षितं
व्यर्थं तस्य कुलक्रमं यदि प्रिये माहेश्वरो नैव सः ॥
पूर्णा श्रीभुवनेश्वरी भगवती श्रीराजराजेश्वरी
पूर्णौ भैरवभैरवौ च वटुकं पूर्णा सदा कालिका ।
पूर्णा श्रीबगला च धूम्रवदना श्रीछिन्नमस्ताम्बिका
पूर्णं श्रीगुरुपादुकामृतक्रमं श्रीपूर्णपात्रं भजे ॥
या सुरा सा मुदे वियो मदः स महेश्वरः ।
यो वर्णश्च भगश्चा यो गन्धः स जनार्दनः ॥
इच्छायां परमा शक्तिः लीलायां किल भैरवः ॥
श्रीपरदेवार्पणमस्तु ॥

The detailed colophon to the first Paṭala in the present MS runs as follows:—

इति निगमकल्पद्रुमे महारहस्ये देवीश्वरसंवादे परमोपनिषत्सारोद्धारे अद्वैतभावानुभवनिर्वाणनिरूपणो षट्कारात्मते प्रथम पटलः ।

6054.

3363. दक्षिणामूर्त्तिसंहिता । *Dakṣiṇāmūrtisaṃhitā.*

Substance, country-made paper. 14 × 3 inches. Folia, 3-70. Lines, 6 on a page. Extent in ślokas, 1,632. Character, Bengali. Appearance, old and worn out. Incomplete (containing a portion of chapter 2 and chapters 3-60).

The work deals with the worship of various forms of Śakti. MSS of the work are described in IO. IV. 2583, VSP. 34, CS. V. 37 and Ulwar. Extr. 629 (the number of chapters in the last two of which is 66, though their end agrees with that of the present MS).

Colophons of the different chapters.—

3B, इति श्रीदक्षिणामूर्त्ति-संहितायां महालक्ष्मीपूजा द्वितीयः पटलः; 4B, ॰त्रिशक्तिलक्ष्मीपूजनविधिस्तृतीय पटलः; 5B, ॰साम्राज्यदायिविद्यायजनविधिश्चतुर्थः पटलः; 6A, ॰आत्मा परं ज्योतिर्विद्याराधनविधिः पञ्चमः पटलः; 6B, ॰प्रणव-विद्यापरनिष्कलभेदेन समाराधन षष्ठः पटलः; 8B, ॰अजपाविधानो नाम सप्तमः पटलः; 10A, ॰मातृकासाधनविध्यष्टमः पटलः; 14B, ॰त्रिपुरसुन्दरीसमाराधन-नवमः पटलः; 15A, ॰पूर्व्वसिंहासनविधिर्दशमः पटलः; 15B, ॰ललिताविधिरेकादशः पटलः; 16A, ॰कामेश्वरीपूजाविधिर्द्वादशः पटलः; 16B, ॰सिंहासनविधि-स्त्रयोदशः पटलः; ॰सिंहासनविधिश्चतुर्दशः पटलः; 17B, ॰सञ्जीवनीपूजाविधिः पञ्चदश पटलः; 18A, ॰सञ्जीवनीविधिः षोडशः पटलः; 19A, ॰वज्रप्रस्तारिणी सप्तदशः पटलः; ॰त्रिपुरेशीभैरवी नित्याष्टादशः पटलः; 19B, ॰पश्चिमसिंहा-सननित्याविधान ऊनविंशतिपटलः; 20A, ॰महासिंहासनेश्वरीडामरभैरवेश्वरी विंशति पटलः; ॰चैतन्यभैरवी एकविंशतिपटलः; 20B, ॰षट्कूटाभैरवी द्वाविंशति पटलः; ॰षट्कूटाभैरवी त्रयोविंशति पटलः, 21A, ॰अघोरभैरवी पञ्चविंशति पटलः; 21B, ॰भैरवी नाम षड्विंशति पटलः; 22A, ॰पञ्चसुन्दरी नाम सप्तविंशति पटलः; 23A, ॰पारिजातेश्वरी त्वष्टाविंशति पटलः; ॰पञ्चवागीशी-यजनविधिरूनत्रिंशत् पटलः; 23B, ॰पञ्चवागीशीयजनविधिस्त्रिंशत् पटलः; 24A, ॰कल्पलतायजन एकत्रिंशत् पटलः; 25B, ॰श्रीमदनपूर्णाद्वात्रिंशत् पटलः;

29A, ०मातङ्गेश्वरीरत्नविद्यायजनत्रयस्त्रिंशत् पटलः; 30B, ०भुवनेश्वरी-त्रिगुणितसाधनचतुस्त्रिंशत् पटलः; 32A, ०भुवनेश्वरी षड्गुणितं यन्त्रसाधन पञ्चत्रिंशत् पटलः; 34A, ०भुवनेश्वरी द्वादशगुणितो षट्त्रिंशत् पटलः; 36B. ०घटार्गलसाधन सप्तत्रिंशत् पटलः; 39A, ०पञ्चमीक्रमार्चनविधिरष्टात्रिंशत् पटलः; 41A, ०पञ्चमीप्रकटं यन्त्रोद्धारप्रयोगसाधनविधिरूनचत्वारिंशत्(?) पटलः; 42A. ०आयतनानन्दो(?) विवरणं चत्वारिंशत् पटलः, 42B, ०कामेश्वरी-नित्याविवरणं नाम एकचत्वारिंशत् पटलः, 43B, भगमाला नित्याविवरणम् द्वाचत्वारिंशत् पटलः; 44B. ०त्रयश्चत्वारिंशत् पटलः; 45B भेरुण्डानित्या-विवरणं चतुश्चत्वारिंशत् पटलः; 46A. ०वह्निवासिनीयजन पञ्चचत्वारिंशत् पटलः; 46B, ०महाविद्येश्वरीयजन षट्चत्वारिंशत् पटलः; 47A. ०शिवदूतीयजनविधिः सप्तचत्वारिंशत् पटलः; 48A. ०त्वरितायजनविधिरष्टचत्वारिंशत् पटलः; 48B, ०कुलसुन्दरीनित्यानित्यायजन ऊनपञ्चाशत् पटलः; ०नीलपताकिनीयजन पञ्चाशत् पटलः; 49B, ०विजयायजन एकपञ्चाशत् पटलः; 50A. ०सर्वमङ्गलायजन द्वापञ्चाशत् पटलः; 51A. ०ज्वालामालिनीयजन त्रिपञ्चाशत् पटलः, 51B, ०नित्याविवरणं नाम [चतुः]पञ्चाशत् पटलः; 53A. ०पञ्चपञ्चाशत् पटलः; 55B, ०करसङ्गा-विद्यावि[व]रणं नाम षट्पञ्चाशत् पटलः, 59B, ०श्रीविद्याविवरणं नाम सप्तपञ्चाशत् पटलः; 62B, ०विद्यान्याम विद्याविवरणं नामाष्टापञ्चाश. पटलः; 66A, ०शिवशक्तिसम्बन्धे ध्यानादियजनं नाम नवपञ्चाशत् पटलः 70B, ०मदनागोपगर्भमिस्त्रिकाभिधानं नाम षष्ठि पटलः।

6055.

4759.

Dakṣiṇāmūrtisaṃhitā.

Substance, country-made paper. 9¼ × 4¼ inches. Folia, 2. Lines, 9 on a page. Extent in ślokas, 24. Character, Nāgarī. Appearance, fresh. Incomplete.

This MS contains the sixth chapter of the work, but the number of the chapter is not indicated in the colophon.

6056.

5453. कुमारसंहिता । *Kumārasaṃhitā.*

Substance, country-made paper. 10 × 4 inches. Folia, 12. Lines, 9 per page. Extent in ślokas, 250. Character, Nāgara. Appearance, fresh. Complete in 10 chapters.

This is in the form of an interlocution between Brahmā and Śiva. It deals with the details of worship of Gaṇapati.

Ulwar 2028 Extr. 615 describes a MS of it in 7 chapters. Cat. Cat. (III. 24) refers to another MS of it in 10 chapters.

Beginning :—

श्रीगणेशाय नमः ।

समस्तायुधसंपूर्ण-षड्भुजद्वादशान्वितम् ।
अप्रस्तादनिताकारमाद्यं वन्दे गजाननम् ॥
रजताद्रिवरे रम्ये मुनिवृन्दनिषेविते ।
... ...
... ...
रत्नसिंहासनारूढं देव्या सह महेश्वरम् ।
द्रष्टुं समागतो ब्रह्मा प्रणिपत्य कृपानिधिम् ॥
बद्धाञ्जलिपुटो भूत्वा पृष्टवान् परमेश्वरम् ।

ब्रह्मोवाच

... ...
... .
... ...
महाविद्या महामाया देवी विश्वमयी किल ।
मायया निर्मितं विश्वं जगदेतच्चराचरम् ॥
इत्युक्तं भवता पूर्वं परब्रह्ममयीति च ।
तस्माद् विघ्नेश्वरं देवं श्रीविद्यासहितं परम् ॥

[illegible]त्वादि पुरश्चरणालङ्कृतम् ।
सर्व्वं वदस्व कृपया पाहि मां भक्तवत्सल ॥

ईश्वर उवाच :

शृणु [illegible] विद्यागणपतेर्मनुम् ।
सर्व्वैश्वर्यप्रदं दिव्यं सर्व्वलोकविमोहनम् ॥

Colophons of the different chapters :—

2B. इति कुमारसंहितायां [illegible] विद्यागणेशमन्त्रोद्धारः प्रथमोऽध्यायः ।

4B. इति कुमारसंहितायां द्वितीयोऽध्यायः ।

[This chapter deals with Puraścaraṇa.]

5B. ०इति श्रीकौमारसंहितायां तृतीयोऽध्यायः ।

[This chapter treats of Pūjā proper.]

6B. इति कुमार[illegible] चतुर्थोऽध्यायः ।

[This chapter treats of Pañcāṅga[illegible].]

7A. इति कौमारसंहितायां [illegible] पञ्चमोऽध्यायः

8A. इति कुमारसंहितायां [illegible] नाम षष्ठोऽध्यायः ।

8B. ०होमविधिर्नाम सप्तमोऽध्यायः ।

10A. ०विद्यागणपतिकल्पे [illegible] नामाष्टमोऽध्यायः

11A. ०[illegible] नाम नवमोऽध्यायः ।

Last Colophon :—

इति कौमारसंहितायां [illegible] नाम दशमोऽध्यायः ।

6057.

5973. चन्द्रहाससंहितायां चन्द्रज्ञानम् । *Candrajñānam from the Candrahāsasaṃhitā.*

Substance, country-made paper. 11¼ × 6 inches. Folia, 1-8. Lines, 9 to 12 on a page. Extent in ślokas, 225. Character, Nāgara. Appearance, old and discoloured. Complete.

This is in the form of an interlocution between Śiva and the moon. It contains a metaphysical discussion about the real nature of the various things of the world.

Beginning :—

श्रीगणेशाय नमः ।

ॐ स्वस्ति सिद्धम् । ... ...

ॐ नौमि स्वात्मप्रकाश-प्रशमित-विषमक्लेशराशिं महेशम्

वन्दे वाग्देवतां तां कलयति किल या मूका तां वाक्लतायाः ।

विघ्नग्रामप्रबन्धाटित्र ह्रद्दुरं स्तौमि विघ्नाधिराजम्

दत्तप्रागदौत्सेकं गुरुवरमपरं ज्ञानदञ्च प्रपद्ये ॥ १ ॥

ॐ कैलासपीठमध्यस्थं देवदेवं महेश्वरम् ।

ब्रह्मादिकारणैः सार्द्धं देवेशञ्च उमापतिम् ॥

महोरगसमायुक्तं अप्सरैः परिवारितम् ।

महाध्यानस्थितं देवं मुनिभिश्चापि संवृतम् ॥ २ ॥

... ...

... ... ॥ ३—५ ॥

तत्रस्थं देवदेवेशमुमया सहितं शिवम् ।

दृष्ट्वा तथाविधं देवं ध्यानासक्तं कपालिनम् ॥ ६ ॥

संशयाविष्टमनसः चन्द्रो वेदविदां पतिम् ।

अष्टाङ्गप्रणिपातेन प्राञ्जलिः प्रणतः शिरः ॥ ७ ॥

तदमानोऽब्रवीत् वाक्यं + + मत्वं पुनः पुनः ।

मुहूर्त्तमपि सञ्चिन्त्य इदं वचनमब्रवीत् ॥ ८ ॥

इन्द्रजालं हि पश्यामि इदं सत्यमसत्यता ।

मोहितं मायया सार्द्धं ब्रह्माद्यं सचराचरम् ॥ ९ ॥

देवमानुषतिर्य्यक्षां गन्धर्व्वोरगराक्षसाम् ।

सर्व्वं देव महादेव प्रतिष्ठा बुद्धि मे मतिः ॥ १० ॥

क्षणिकस्य तु रूपस्य तथा शब्दस्य वै प्रभो ।

अयुक्तस्यैव मन्त्रस्य भ्रमिदृष्टस्य निश्चयः ॥ ११ ॥

आकाशस्य कथं देव प्रणामन्ति च निश्चयः ।
स्वयमेव तु यो नष्टो यस्तु चित्तेन कल्पितः ॥
शब्दस्य क [च] तस्यैव मन्त्रत्वमपि बुध्यते ॥ १२ ॥
प्रयुक्तमथ वीणा यं तन्त्रीस्वरसमन्वितम् ।
चित्तेन साध्यते तस्य षड्जमध्यमधै(दै)वतम् ॥ १३ ॥
तथा मंत्रा[ः] तथाकारा विद्या चैव सहस्रशः ।
अप्रबुद्धधियो मूढाः स्वचित्ता च बहि[ः] स्थिताः ॥ १४ ॥
कृत्ति[ः] केनैव सन्तुष्टा भ्रामिता च त्वया पुरः ।
असत्कामिन्द्रजालस्य सर्वं सकलं प्रभो ॥ १५ ॥
उच्चार्यमाना ये मन्त्रा न मन्त्रा तांपि ये विदुः ।
मोहिता देवगन्धर्वा मिथ्याज्ञानेन दर्शिताः ॥ १६ ॥
मायाः स्वप्नोपमाः सर्वे मुद्राध्यान च धारणाः ।
न तच्चिह्नमिदं सर्वं शास्त्रजालं क्रियागमम् ॥ १७ ॥

सोम उवाच ।

देवा विनायकस्यैव षण्मुखस्य त्रिलोचन ।
नंदिभृंगिमहाकाल-कुबेरशुक्रयोस्तथा ॥ १८ ॥
वासुकिश्च गरुत्मांश्च तथा नारायणाद् वै ।
सनत्कुमारप्रमुख-ऋषीणां भावितात्मनाम् ॥ १९ ॥
दुर्वास[स]प्रमुखा ये शाक्ते या च संस्थिताः ।
मन्त्राश्च विविधाकारा विद्याश्चापि सहस्रशः ॥ २० ॥
कथितं तु त्वया सर्वं तेषां चैव समासतः ।
तानि सर्वाणि देवेश शिवःस्नेह मया श्रुतम् ॥ २१ ॥
भ्रामितास्तु त्वया सर्वे मायया महेश्वर ।
साख्यातं कस्य चेन्ज्ञानं शरीरं गर्हितम् ॥ २२ ॥
अप्रबुद्धाश्च ते सर्वे भ्रामिताः शास्त्रपाठकैः ।
नास्ति त्वत्सदृशो धूर्तो वाग्जाले बुद्धिनाशनः ॥ २३ ॥
तन्त्रे तन्त्रे [त्व]या प्रोक्तं मया प्रत्यक्षतः श्रुतम् ।
शपथानि असंख्यानि मिथ्या देव त्वया कृताः ॥ २४ ॥

नैव कस्यापि (स)सद्भावं मोहितास्ते त्वया प्रभो ।
रञ्जितास्ते त्वया व्यायामे मिथ्याज्ञानेन गर्व्विता[ः] ॥ २५ ॥
अप्रबुद्धधियः सर्व्वे तेऽपि मूढत्वतां गताः ।
मिथ्याज्ञानेन संछन्ना मिथ्याशास्त्रेण गर्व्विताः ॥ २६ ॥
साकारस्य क्षयं चास्ति मन्त्रोच्चारे क्षयं पुनः ।
क्षणिका तु क्रिया देव जन्मापि मरणं तथा ॥ २७ ॥
कस्य जन्म मृतः को वा दह्यते चात्र कः प्रभो ।
पिंडं तु कस्य वा देव कुतः श्राद्धं कुतः क्रिया ॥ २८ ॥
प्रत्यक्षं बान्धवानां स्वस्थाने यत्प्रलीयते ।
पार्थिवे पार्थिवं तत्त्वं वायौ (वायोर्वायुर्ग) वायुगतं तथा ॥ २९ ॥
आपस्त्वाप्सु च वै लीनास्तेजस्तेजसि विश्वति ।
आकाशे तु तथाकाशं मनोबुद्धिरहं तथा ॥ ३० ॥
यथागताः पुनस्तत्र लीनाः स्वप्ने समं ततः ।
अमूर्त्तो भगवान् जीवो निर्गुणो विरजः स्वगः ॥ ३१ ॥
इन्द्रियाश्च गुणाः सर्व्वे स्वे स्वे स्थाने प्रलीयते ।
कायं मांसमयं देव दाहश्च कृतवान् प्रभो ॥ ३२ ॥
किं धर्मास्ति जडा मूढा अज्ञानव[शि]यगीकृताः ।
किं मांसं किञ्च वास्थीनि रुधिरं श्लेष्मनेव च ॥ ३३ ॥
धातुत्रयं वै देव तथा मेदस्तथा वसा ।
अन्त्राणि हृदयो वाथ आमं मृ+ तथा कफम् ॥ ३४ ॥
रेतो वा श्लेष्ममूत्रे वा पुरीषं चर्म्मनालयः ।
मज्जां वापि नखाश्चैव रोमाः शतशस्तथा ॥ ३५ ॥
कर्णौ दन्तौ च नासा च जिह्वाकुष्ठौ च वाक् तथा ।
चक्षुर्वा चपिटका वापि ग्रीवा वापि सुकोमल ॥ ३६ ॥
बाहू हस्तौ तथा चैव उदरं कटिमेढ्रकम् ।
स्फिजं जंघा च पादौ च बाधा सा कृतवान् प्रभो ॥ ३७ ॥
नाम वापि तथा देव गोत्रं वर्णं तथैव च ।
रोमाणि सर्वयवैवावयवश्च तथा प्रभो ॥ ३८ ॥

एभ्यो मध्याद् विरूपाक्ष कोऽसौ चैव स्मृतः प्रभो ।
कस्य श्राद्धं क्रियाकाण्डं पिण्डदानादिकञ्च यत् ॥ ३९ ॥
जीवो ह्यनादिरमलः स्वरूपी खेचरः परः ।
न रूपं न च वा वर्णं न स्थानं न च धारणा ॥ ४० ॥
ये ये भावाः शरीरस्य ते सर्व्वे स्वपरं गताः ।
कस्य कालं यमं कस्य भटाश्चैव सुदारुणाः ॥ ४१ ॥
नरकाः प्राम्भनाश्चैव प्रेतार्थ[ं] वसेत् कः
एको यदि भवेत् कालकेकः प्राप्तं भवेच्च सः ॥ ४२ ॥
सहस्रासंख्यालाः आहूर्वन्न हता प्रभो ।
तत्र कालाश्च बहवो एका वापि कथं प्रभो ॥ ४३ ॥
प्रकृत्यां विष्णुलोकात् निर्गता विलयं गताः ।
त(स्या)श्चात्र संख्यासंख्यानि तत्र काला[ः] किमागताः ॥ ४४ ॥
ब्रह्माद्यापि एको वा सहस्राः चैव तस्य वै ।
मध्यकानि असंख्यानि सहस्राश्चैव सहस्रशः ॥ ४५ ॥
एककालप्रलयाश्च तत्र कालाः किमागताः ।
एककालो बहून् वापि यमने वापि नीयते ॥ ४६ ॥
स्वान्ते वा बाऽदृष्टे वा स कथं नीयते प्रभो ।
एतत् सर्व्वं समासेन सर्व्वं भैरव तत्त्वतः ॥ ४७ ॥

End :—

महाख्ये ज्ञानभागी स्यात् पूर्व्वोक्तस्य वै नु सः ।
महाभागी भविष्यति एतस्मै वदतो अरः ॥ १७३ ॥
एवमुक्त्वा महादेवो गतोऽन्तर्धानमीश्वरः ।
चन्द्रेण प्राप्तं विज्ञानं कृतकृत्यो यथार्थतः ॥ १७४ ॥
इ[ति] शास्त्रं न वक्तव्यं यस्य कस्य समीपतः ।
अभक्ते नैव दातव्यं अभक्ते नैव दीयते ॥ १७५ ॥
यो मोहाद्दीयते ज्ञानमपरीक्ष्य च मन्दधीः ।
नाशो ज्ञानस्य भागी स्याज्जन्मान्तरशतैरपि ॥ १७६ ॥

यो निन्दयति मोहेन इदं शास्त्रमगौरवात् ।
स याति नरकं घोर[ं] यावदाभूमिसंप्लवम् ॥ १७७ ॥

Colophon :—

इति परमरहस्ये चन्द्रहाससंहितायां चन्द्रज्ञानं समाप्तम् ।

6058.

11068. **महाकालसंहितायां षोडशपात्रम् ।** *Ṣoḍaśapātra from the Mahākālasaṃhitā.*

Substance, country-made paper. 7×4 inches. **Folia, 7. Lines, 7 on a page.** Extent in ślokas, 40. Character, modern Nāgara. Appearance, fresh. Complete.

It gives the *mantras* for the purification of wine used in Tantric worship and put into a number of pots arranged in a particular order. (Also cf. *Śārikārcanapaddhati* below.)

Beginning :—

श्रीगणेशाय नमः । ॐ ।

श्रीमद् भैरवशेखरप्रविलसच्चन्द्रामृतप्लावितं
क्षेत्राधीश्वरयोगिनीगणमहासिद्धैः समाराधितम् ।
आनन्दार्णवकं महात्मकमिदं साक्षात्त्रिखण्डामृतं
वन्दे श्रीप्रथमं कराम्बुजगतं पात्रं विशुद्धिप्रदम् ॥
देवं मोहनसाधकं दयितया दत्तं पीयामृतं
क्रीडन्नं कामदेवकृपा तस्मै समावेदितम् ।
वामे दत्त(?) करादु विमुद्रमुद्रकवशं पात्रो विधायात्मके
वन्दे पात्रमहं द्वितीयमधुना नादैकसंवर्द्धनम् ॥
सर्व्वाम्नायकलाकलापकलितं कौतूहलद्योतनं
चन्द्रोपेन्द्र-महेन्द्र-सूर्य्यवरुणैर्ब्रह्मादिभिः सेवितम् ।
ध्यातं सिद्धगणैः स्तुतं मुनिगणैर्मोक्षार्थिभिः सर्व्वदा
वन्दे पात्रमहं तृतीयमधुना ज्ञानात्मबोधक्षमम् ॥

End :—

पाने कृते पूर्णचन्द्रप्रकाशः पाने कृते पूर्वसमानबुद्धिः ।
पाने कृते पूर्णपवित्रदेहो पानं पिबेत् पञ्चदशं प्रवीराः ॥
पीते षोडशपात्रमिन्दुकलया ब्रह्माथ विष्णुर्विभुः
शान्तश्चादिमसप्तपात्रविभवश्चाकिञ्चनः स्फुटम् ।
उत्पत्तिस्थितिसंहारकालकल्पकारित-स्वात्मप्रकारेण वै ।
भोऽक्षं षोडश पात्रमेव गुणतो ग्रक्षामि + त्वं भवेत् ॥

Colophon :—

इति महाकालसंहितायां षोडशपात्रे समाप्त ।

6059.

9260. पराशरसंहितायां हयग्रीवोद्धारकल्पः ।

Hayagrīvoddhārakalpa from the Parāśarasaṃhitā.

Substance, country-made paper. 11 × 6 inches. **Folia, 6. Lines, 13 on a page.** Extent in ślokas, [illegible]. Character, Nāgara. **Appearance, tolerable.** Complete.

The *Hayagrīvoddhārakalpa*, treating of the details of the worship of Hayagrīva and constituting the seventh chapter of the *Parāśarasaṃhitā*, is quoted in this and the following MS, which describe the process of the worship.

The colophon of this extract runs as follows in leaf 5A :—

इति श्रीपराशरसंहितायां हयग्रीवोद्धारकल्प[ः] सप्तमोऽध्यायः ।

Beginning of the MS :—

अथ सारसंग्रहे ।
अथोच्यते हयग्रीवमन्त्रः सर्वसमृद्धिदः
सम्बुद्धं गगनं तामकर्णेन्दुसमन्वितं
एकाक्षरो मनु[ः] प्रोक्तो हयग्रीवस्य + + +

यस्य सकारः वामकर्णा उकारः बिन्दुरनुस्वारः ।
एतैः ॐ हूमिति बीजमुद्धृतम् ॥

End of the MS :—

अथ वा तं करे कुम्भेऽभिमन्त्र्य जलं पिबेत् ।
पीतं वादिमुखे ध्यात्वा स्तम्भमेतस्य भावयेत् ॥

मन्दभाग्योऽपि भक्तोऽद्धृलितां [illegible] मन्त्र [illegible]
कृत्वा वर्षां भवेत् । [illegible] भवेत् ।

6060.

9448. *Hayagrīvauṅkārakalpa from the Parāśarasaṃhitā.*

Substance, country-made paper. 10 × 4½ inches. Folia, [illegible]. Lines, [illegible] on a page. Extent in ślokas, 120. Character, Nāgara. Appearance, [illegible]. Complete.

Same as above.

6061.

2424. **आङ्गिराकल्पः ।** *Āṅgirākalpa.*

Substance, country-made paper. 10 × 4 inches. Folia, 30. Lines, 13 on a page. Extent in ślokas, 828. Character, Nāgara. Appearance, fresh. Complete.

The present MS has been described in L. N. 4046. The work deals with the details of the worship of the deity Āsurī.

6062.

272. **विश्वामित्रकल्पः ।** *Viśvāmitrakalpa.*

Substance, country-made paper. 12 × 4½ inches. Folia, 37. Lines, 14 on a page. Extent in ślokas, 1,600. Character, Nāgara. Date, 1740 Ś.E. Appearance, fresh. Complete.

The work deals with the daily duties of the twice-born and, strictly speaking, belongs to the Smṛti class of literature. Of Tāntrika topics dealt with herein mention may be made of bhūtaśuddhi, dīkṣā and puraścaraṇa of the Gāyatrīmantra.

The present manuscript is noticed in L. II. 885. CS. III. 508 describes a work, in sūtra form, of the same name and similar contents.

This MS seems to be a part of a much larger one, because the first leaf of this has, on the right upper-hand corner, the number 246 and the last leaf has, at the same place, the number 283.

Post Colophon Statement :—

श्रीयोगेश्वरात्मकलक्ष्मीकेशवार्पणमस्तु ।

श्रीः शुभम् । शके १७३९ तारणनाम संवत्सरे कार्त्तिक शुद्ध-त्रयोदशी गुरुवासरे तद्दिने इदं पुस्तकं वरवटाख्यग्रामनिवासि-ज्योतिषीत्युपनामक-गोविन्दात्मज-प्रभाकरदेवेन स्वार्थं परोपकारार्थं लिखितम् यादृशमिति ।

अर्जितं भूरिकष्टेन पुस्तकं लिखितं मया ।
हर्तुमिच्छति यः पापी तस्य वंशक्षयो भवेत् ॥

6063.

5962. कालरात्रिकल्पः । *Kālarātrikalpa.*

Substance, country-made paper. 9 × 4 inches. Folia, 38. Lines, 7 on a page. Extent in ślokas, 550. Character, Nāgarī. Appearance, old and discoloured. Complete.

It relates to the details of the worship of the deity called Kālarātri including an account of the six black rites to be performed with the mantras of this deity. According to

four colophons in the present MS (Fol. **3A**, 17A, **18B**, **25A**) the work forms part of the *Rudrayāmala* and according to one colophon (Fol. 29B) it belongs to the *Āgamasāra*. A portion in this MS (Fol. 25A–38) is absent in another MS of the same work described below. The concluding portion (Fol. 32A–36B) is in a vernacular.

Beginning :—

श्रीगणेशाय नमः। श्रीगुरुभ्यो नमः।

पार्व्वत्युवाच।

देवदेव जगन्नाथ भक्तानुग्रहकारक।
त्वत्प्रसादान्मया सर्व्वं श्रुतं रुद्रादियामलम्॥
इदानीं श्रोतुमिच्छामि यन्मे मनसि वर्त्तते।
कालरात्र्याः क्रमार्च्चा + तत्सर्व्वं कृपया वद॥

ईश्वर उवाच।

... ...

सन्ति नानाविधा मन्त्रा आगमोक्ताः सबीजकाः।
तथैव वैदिका मन्त्राः पुराणहामरे तथा॥
ते सर्व्वे निष्प्रभा जाताः कलौ वीर्य्यविवर्ज्जिताः।

... ...

मन्त्रमागमशास्त्रन्तु प्रतिज्ञासिद्धमेव च।
अनादरेण तन्नष्टं गुरुभक्तिं विना तथा॥
तन्मध्ये सारभूतं तु प्रत्यक्षफलदायकम्।
अन्यथा न भवेद्देवि + + +॥
सिद्धमन्त्रमिमं देवि साधनाधारोत्तमं [तथा]।
पुरश्चर्य्यक्रिया नास्ति स्मरणात् पूजनात् फलम्॥
मन्त्रस्यैतस्य माहात्म्यं सामर्थ्यं स्तुतिमेव च।
वक्तुं न शक्यते देवि कल्पकोटिशतैरपि॥

... ...

तस्याः पूजां प्रवक्ष्यामि मम बुद्ध्यनुसारतः ॥
अयनामेकचित्तेन न कस्य कथितं प्रिये ।
कृष्णपक्षस्य चाष्टम्यां भूते भौमदिने तथा ॥
प्रारम्भं कारयेत्तत्र भक्तिभावेन सादरात् ।
ब्राह्मे मुहूर्ते चोत्थाय स्मरेद्देवीं चतुर्भुजाम् ॥
उमसन्नवदनाम्भोजां लीलालोचनघूर्णितां ।
कनकाङ्गदसंयुक्तां दिव्यचन्द्रार्द्धधारिणीम् ॥
नीलांशुकपरीधानां मुक्ताकिङ्किणिकर्णिकां ।
पक्वदाडिमबिम्बोष्ठीं भूषितां सितकंचुकीम् ॥
नासामणाधिकं ज्योतिः शिरःपुष्पैरलंकृतां ।
पयोधर स्त + + + काश्मीरुक्तानितम्बिनीं ॥
मुक्ताग्रैवेयलतासमुदयादित्यसन्निभां ।
एवं ध्यात्वा भवेत् किञ्चित् उच्छिष्टस्वपनात्तत ॥
ततो ब्रह्मकोष्ठे तु एकान्ते जनवर्जिते ।
दक्षाङ्गुलिनिभुग्नां तु कुर्याच्चलनविमर्दनम् ॥

The mantra of the deity is given as follows (Fol. 5B):—

अस्य श्रीकालरात्रिमन्त्रस्य दक्षऋषिः जगतीच्छन्दः कलापुरनिवासिनी मायाराज्ञी देवता हृदये क्लीं शक्ति नाभौ लौं कीलकं मम श्रीकालरात्रिप्रीत्यर्थं जपे विनियोगः ।

मन्त्रोद्धारं प्रवक्ष्यामि गोप्याद्गोप्यतरं महत् ।
प्रणवं वाग्भवं माया मन्मथं कमलोद्भवम् ॥
बीजं पञ्चशिखो ध्यं ततः पञ्चवसुबीजन् ।
कामेश्वरी ततः पश्चात् सर्वं जनमनोहरी ॥
सर्वसुखक्षकरी च सर्वराजवशंकरी ।
सर्वदुष्टनिर्दलनी सर्वस्त्रीपुरुषाकर्षणी ॥

Colophon :—

इति श्रीकालरात्रिकल्पे पूजाविशेषः ।

Post Colophon :—

रघुनाथस्य सुतेन कमलाकरेण इदं पुस्तकं लिखितम् ॥

6064.

10046. *Kālarātrikalpa.*

Substance, foolscap paper. 8¼ × 6½ inches. Folia, 18. Lines, 12-14 on a page. Extent in ślokas, 325. Character, modern Nāgarī. Appearance, fresh. Complete in 13 chapters.

The portion contained in this MS up to chapter 12 runs up to Fol. 25A of the MS described under the previous number (6063).

6065.

10520. शिवाम्बुकल्पः । *Śivāmbukalpa.*

Substance, country-made paper. 7 × 4 inches. Folia, 16. Lines, 6 on a page. Extent in ślokas, 200. Character, Nāgarī. Appearance, fresh. Complete.

It deals with the Tantric use of urine as a drink which is stated to be able to drive away all sorts of diseases. A work of the same name said to belong to the *Rudrayāmala* is noticed in Stein. 236.

Beginning :—

श्रीगणेशाय नमः ॥

पार्व्वत्युवाच ।

देवदेवं प्रणम्यादौ सर्व्वज्ञं परमेश्वरं ।

प्रणम्य श्रोतुमिच्छामि शिवाम्बस्य च निर्णयम् ॥

श्रुत्वा देवमनुष्याणां पवित्रं सर्व्वसिद्धिदम् ।
कुर्व्वे पुस्तकमेव रम्यवचनं श्रीशक्तिरत्नाकरं
श्रीमान् राजकिशोर एष गिरिजापादाब्जभक्त्युत्सुकः ॥
[श्रमधाधारणपादपद्मविभवं श्रीराजकैशोरकम् --Oxf.]

Two MSS of the work, complete in five ullāsas, are described in L. I. 242 and Oxf. 101ᵇ. The present MS contains the first three chapters of the work and the concluding portions of the fourth and the fifteenth chapters. The first three chapters speak of the greatness of Sakti. The portions of the other two chapters deal respectively with the list of mahāvidyās and with rites to be performed when one fails to properly kill an animal offered to the deity.

6217.

Navamisiṃha.

5457. तन्त्रचिन्तामणिः । *Tantracintāmaṇi.*

Substance, country-made paper. 12¼ × 6½ inches. Folia, 412. Lines, 11-15 on a page. Extent in ślokas, 15,000. Character, Nāgara. Appearance, old and discoloured. Complete in 40 chapters.

Beginning, containing a description of the contents and an indication of the works consulted:—

यस्याः कार्य्यमिदं कुलाकुलगतं तत्त्वेन सम्पादितम्
भूतं पञ्चरसोज्ज्वलञ्च निगमाचारेण यत्र क्रमात् ।
भूताद्यं किल सागरेण भणितं नित्यं नमस्कुर्व्वते
तस्यै साधकसिद्धिदानविमलप्रख्यातकीर्त्यै नमः ॥

वन्दे ज्ञानवरप्रदाननिरतं पादारविन्दं गुरो-
र्दिव्यौघप्रभृतेश्च विघ्ननिचयध्वंसैकलम्बोदरम् ।
तन्त्राणां प्रथनाकरं पशुपतिं गुह्येश्वरीं कालिकां
ब्रह्मोपेन्द्रमहेन्द्रवन्दितवरां वज्रादिकां योगिनीम् ॥
नेपालाधिपतेः समस्तधरणीजानीन्द्रचूडामणे-
र्नानादानसमर्पितादिकविताश्रीकस्य विद्यानिधेः ।
भूपालेन्द्रधराधिपस्य नवमौलिंश्च्यमात्यः क्रमं
निर्णीयाशु बुधैः समं वितनुते श्रीतन्त्रचिन्तामणिम् ॥
वैदग्ध्यश्लाघ्यबन्धिधाम्नि निगद्गुम्भि-
काव्ये तदा बुधजने मम मुग्धता स्यात् ।
तस्मादहं ग्रथनमत्र करोमि लोके
प्राकृद्दोषशमनं कुरु देवि मातः ॥
हे धीराः परमार्थलग्नमनसः सिद्धं तरामीश्वरः
तन्त्रे तन्त्रशतक्रमामखिलं जानन्ति येऽद्भुतमुकाः ।
तत् पश्यन्तु भवन्तः ... मदीयं मुख-
... लोकनोत्सुकतया नायाससाध्यं मनः ॥
तन्त्राणां रचनं येषां ग्रन्थेऽस्मिन् प्रकटीकृतं ।
तेषां नामानि तन्त्रस्य ... कथयन् पुनः ॥
कलादियुगभेदेन मार्गभेदं पृथक् पृथक् ।
आधिक्यमागमानाञ्च न्यूनतादिक्रमं ततः ॥
कालिकाकुलसर्वस्वनाममयीकल्पना ।
निर्णयो दक्षिणाचारा सिद्धमार्गोपासना ॥
श्यामाया: सर्वेषां मन्त्रमुख्यमादौ प्रकाशके ।
मन्त्रोद्धारक्रमेणैव वामदक्षिणमन्त्रकाम् ॥
विद्याभ्यासात्मके मार्गनिर्णयस्य पृथक् पृथक् ।
आवश्यको मकारेषु आम्नायाधीनतश्च यः ॥
गुरुं विना तन्त्रमन्त्रे नाधिकारनिरूपणम् ।
दीक्षाप्रशंसा कथिता द्वितीये तु प्रकाशके ॥

श्रीगुरोः शिवतुल्यत्वं गुरुलक्षणनिर्णयौ ।
गुरुं विनोपदेशो च स्त्रीणां वामे स्वनायकात् ॥
सल्लक्षणालक्षणे शिष्ये तयोरन्वयनिर्णयः ।
व्याख्याव्याख्यविवेकः स्यादुपदेशान्तरं तयोः ॥
वैदिकादिषु मन्त्रेषु स्त्रीशूद्रौ नाधिकारिणौ ।
आगमेष्वनयोश्च विचारो देयादेयविवेचना ॥
एतेषां संस्थितिर्ज्ञेया प्रकाशे(के) तु द्वितीयके ।
तृतीयप्रकाशे संस्काराः षोडशैव तु मन्त्रगाः ॥
तत्र नामप्रदानाख्ये चक्राणां लिखनं कृतम् ।
मन्त्राणामपि संस्काराः षोडशैव प्रचोदिताः ॥
मन्त्रे प्राणप्रदानन्तु पञ्चमे च प्रकाशके ।
मासादिनिर्णयः षष्ठप्रकाशे तु प्रकीर्त्तितः ॥
दीक्षाविधिर्धर्मनाडिका,नाडी भगोद्धारप्रश्नो भुवः ।
वास्तुनरविधेर्यादौ तस्योत्पत्तिः प्रकीर्त्तिता(:) ॥
तन्मण्डलस्य प्रायोक्तं तत्र देवविनिर्णयः ।
बलिमन्त्राश्च तन्त्रोक्ता वास्तुमण्डलदैवतं ॥
प्रकाशे सप्तमे प्रोक्तं चाष्टमेऽथ निगद्यते ।
दिक्साधनं मण्डपस्य कुण्डादिलक्षणानि च ॥
अङ्कुरार्पणं प्रोक्तं नवमे तु प्रकाशके ।
गुरोर्निमन्त्रणविधिर्दत्तकालस्य शुभाशुभम् ॥
यज्ञं सम्मार्जनविधिर्वह्नेः स्थितिविवेचनम् ।
कुण्डसंस्कारपूर्वं हि वह्निसंस्थापनं पुनः ॥
दीक्षाया दिनकृत्यं हि तदङ्कच्छादनं ततः ।
मन्त्रप्रदाने भेदोऽस्ति वामदक्षिणमार्गयोः ॥
उपदेशः कुलस्त्रीणां दीक्षाभेदोपदेशकौ ।
उपासनाविधिः स्वप्नजमन्त्रस्य निर्णयः ॥
मनोर्गुरोश्च देवस्य यागो दशप्रकाशके ।
क्रमदीक्षाविधिर्विद्याविशेषैः परिकीर्त्तिता ॥

पूर्णाभिषेककथनं एकादशप्रकाशके ।
गुरुभक्तिस्तथाचारौ प्रोक्तौ दक्षिणकौलयोः ॥
धर्म्माधिकारिणौ कौले वामे चार्कप्रकाशके ।
आचारा दशधा:) प्रोक्ता महानीलादयः क्रमात् ॥
श्यामादिविद्याविषयं त्रयोदशप्रकाशके ।
दिव्यवीरपशूनाञ्च भावा बालाप्रपूजने ॥
योग्यायोग्यविवेकोऽस्ति चतुर्दशप्रकाशके ।
सात्त्विकादिप्रभेदेन पूजा भिन्ना प्रकीर्त्तिता ॥
पृथक् मांसप्रदं कर्म्म प्रातःकृत्यविधिस्ततः ।
अजपाया विधानञ्च स्नानं नानाविधं स्मृतम् ॥
विभूतिधारणं सन्ध्यावन्दनञ्च क्रमात् पुनः ।
गायत्रीणां समुद्धारः प्रकाशे तिथिसङ्ख्यके ॥
पूजाप्रशंसा दानञ्चासनं भूतापसारणम् ।
भूतशुद्धिर्मातृकादिः कलासङ्ख्याप्रकाशके ।
अन्तर्यजनकर्म्माणि चार्घ्यादिस्थापने विधिः ॥
द्रव्याणि यन्त्रलिखने पीठनिर्णय एव च ।
शालग्राममणिशिलाद्याश्च उर्ध्वपीठस्थानानि च ॥
कर्पूराद्दिसताष्टूर्ध्वगन्धाद्यादिकूपतिकाहा ।
एतेषां भेदतो भेदः सम्यगुक्तः पृथक् पृथक् ॥
मुद्रा सर्व्वोपचारेषु प्रत्येकं लक्षणादिकम् ।
नित्यहोमविधिर्भूतबलिरारात्रिकं ततः ॥
देवताभेदतो भिन्ना जपमाला प्रणोदिता ।
जपार्पणादिकं सर्व्वं सप्तदशप्रकाशके ॥
कुलमार्गसमुत्पत्तिः पञ्चशुद्धिविधिस्ततः ।
शक्तिशुद्धिस्तु कौलादिविशेषन्यासनिर्णयः ॥
द्रव्यदानविवेकश्चाष्टादि[:] पापकर्म्मणः ।
मांसादिनिर्णयः सम्यक् मकारस्यानुकल्पकम् ॥

आन्तरीयविशेषस्तु संस्कारकथनं क्रमात् ।
पात्रसंस्थाप्रकथनं मानश्रेष्ठादिनिर्णयः ॥
म(ा)च्छापात्रस्य च पुनः साधनं लक्षणं शुचिः ।
श्रीपात्रस्थापनादिश्च तर्पणं तत्त्वशोधनम् ॥
वटुकादिबलिस्त्वाष्टादशमेतिप्रकाशके ।
पूर्णोपचारसम्मास्त्व कुलद्रव्यनिषेवणम् ॥
ऊनविंशतिसंख्येऽस्मिन् प्रकाशे प्रकटीकृतम् ।
भोजनादिविधिः साय(ा)न्तनीयज्ञव्यसेवनम् ॥
शिवाबलिर्निशाकृत्यं नित्यभेदविनिर्णयः ।
लिखितो विंशतितमे प्रकाशे सर्व्वसम्मते ॥
श्यामापूजाक्रमस्त्वेकविंशत्याख्यप्रकाशके ।
स्तोत्रादिलिखनं सम्यक् द्वाविंशतिप्रकाशके ॥
म(ा)हाकालादिनित्यानां सत्त्वोद्धारादिकं पुनः ।
त्रयोविंशतिसंख्येऽस्मिन् प्रकाशे प्रकटायते ॥
तारार्च्चनक्रमो वेदविंशत्याख्ये प्रकाशके ।
प्रचण्डचण्डिकापूजा पञ्चविंशतिसंख्यके ॥
श्रीविद्यायाः क्रमः सम्यक् षड्विंशतिप्रकाशके ।
भैरवी च महालक्ष्मीर्मातङ्गी भुवनेश्वरी ॥
धूमावती च बगला चासां पूजा पृथक् पृथक् ।
सप्तविंशतिसंख्येऽस्मिन् प्रकाशे प्रतिपादिता ॥
चक्रपूजा पूर्व्वकृत्यं सामयीलक्षणं ततः ।
द्विविधं यजनं तत्र दूतीनां लक्षणं पृथक् ॥
दशविद्याक्रमेणैव दूतीयागविधिस्ततः ।
चक्राचारः स्मृतोऽप्यष्टाविंशत्याख्यप्रकाशके ॥
प्रस्तारादिश्च यन्त्राणां क्रमाद्दक्षिणवामयोः ।
प्रतिष्ठा द्विविधा प्रोक्ता ऊनत्रिंश(ति)प्रकाशके ॥
चलाचला द्विधा माला देवताम्नायभेदतः ।
पृथक् पृथक् दशा प्रोक्ता ग्रहास्त्रसम्भवादिकम् ॥

रुद्राक्षादिभिर्भिन्ना मालाफलविनिर्णयः ।
ग्रथनादिविवेकस्तु संस्कारो मुख्यसाधनम् ॥
महामालाविनिर्माणं संस्कारौ मुख्यभेदयोः ।
आयतीकरणं तस्यां प्रोक्तं त्रिंशत्प्रकाशके ॥
कालस्यार्थस्ततोऽङ्गानि पुरश्चरणकर्म्मणः ।
विप्रगार्भविधिर्विद्याविशेषाश्रयनिर्णयः ॥
क्रमेण दशविद्यायाः जपसंख्यादिनिर्णयः ।
सर्व्वसिद्धिप्रदं स्थानं देवतानां पृथक् पृथक् ॥
पीठानाञ्च समुत्पत्तिः देवस्य ग्रहणे विधिः ।
कूर्म्मचक्रपरिज्ञानमभिषेकविधिस्ततः ॥
कार्य्याकार्य्यविचारश्च सङ्कल्पकरणं ततः ।
जपस्य कालकथनं रहस्यमनुत्तमं ॥
मन्त्रविद्याविभेदेन प्रबोधकालनिर्णयः ।
तयोर्भेदो मन्त्रशिखामन्त्रचैतन्यकं ततः ॥
क्रमेण दशविद्याया कुल्लुकाविधिरीरितः ।
सेतुविद्यादिभेदेन निर्व्वाणकथनं ततः ॥
शापोत्कीलनयोर्भेदः शापोद्धारोऽपि मनोः ।
मन्त्रस्य हृदयं चार्थनिर्णयोऽत्र विशेषतः ॥
जपस्यापि प्रभेदा हि पञ्चाङ्गपुरस्क्रिया ।
अथवान्यप्रकारेण त्रिविधा तु पुरस्क्रिया ॥
शापस्य च लोपादेश्चैकत्रिंशत्प्रकाशके ।
मन्त्रसिद्ध्युपायाश्च चितासाधनकर्म्म च ॥
वीरसाधनभेदाश्च युग्मत्रिंशत्प्रकाशके ।
जपसंख्याप्रमाणञ्च युग्मत्रिंशत्प्रकाशके ॥
विद्याभेदे जपात् सिद्धिप्रदा संख्या मनोरपि ॥
रहस्यक्रमयोगाश्च चतुस्त्रिंशत्प्रकाशके ।
नैमित्तिकस्य कालादि कुलाकुलविनिर्णयः ॥

ग्रहणं द्विविधं प्रोक्तं बाह्याभ्यन्तरभेदतः ।
दमनारोपणोत्पत्तिर्दमनारोपणे विधिः ॥
पवित्रारोपणोत्पत्तिः पवित्रारोपणे विधिः ।
ग्रन्थिभेदो देवतायाश्चयस्त्रिंशत्प्रकाशके ॥
शारदीयविधानञ्च चतुस्त्रिंशत्प्रकाशके ।
पशुदानविवेकस्तु पशुभेदादिनिर्णयः ॥
देवतादृष्टिकालश्च पशोर्लक्षणवीक्षणम् ।
निषेधोऽप्यनुकल्पश्च पूजामहिषमोक्षणम् ॥
नराणां प्रोक्षणं खड्गलक्षणं पात्रनिर्णयः ।
शुभाशुभञ्च नैवेद्यं पञ्चत्रिंशत्प्रकाशके ॥
कुमारीपूजनविधौ तासां लक्षणनिर्णयः ।
शुभाशुभादिसंकेतः षट्त्रिंशत्प्रकाशके ॥
सामान्यतः काम्यविधिः षट्कर्मक्रमनिर्णयः ।
तेषां प्रकीर्णकथनं आसनादिनिरूपणम् ॥
मन्त्रग्रथनभेदादिर्मालाकुण्डादिनिर्णयः ।
होमद्रव्यप्रमाणञ्च सप्तत्रिंशत्प्रकाशके ॥
क्रमेण दशविद्यायाः प्रयोगश्च पृथक् पृथक् ।
प्रायश्चित्तविधिः पश्चादष्टत्रिंशत्प्रकाशके ॥
नानाख्यमुद्रिका पश्चादन्यासां लक्षणं क्रमात् ।
मन्त्राणां प्राणायोगनचत्वारिंशत्प्रकाशके ॥
प्रत्येकं मातृकावर्णध्यानादीनां निरूपणम् ।
क्रमेण दशविद्याया मन्त्रभेदाः प्रकीर्त्तिताः ॥
नानाप्रयोगमन्त्रास्तु चत्वारिंशत्प्रकाशके ।
कुमारी योगिनी काली वाराही कुब्जिका परा ॥
नारायणी मुण्डमाला चामुण्डा भुवनेश्वरी ।
गौतमी समया मौत्रामर्णविजयमालिनी ॥
लीलावती गुह्यसिद्धिर्मालिनी परमेश्वरी ।
प्रचण्डचण्डिकाख्या च नित्या कात्यायनीति च ॥

फेत्कारी भैरवी भूतसिद्धिः सिद्धेश्वरी तथा ।
मेरुनीलमतञ्चास्य शक्तिसङ्गमभैरवौ ॥
साङ्ख्यायनं किरणाख्यं गन्धर्व्वभूतभैरवौ ।
वीराद्वैतं वीरभद्रं रुद्रकालानलोत्तरे ॥
सिद्धसारस्वतं हाहारावो मत्स्यानभैरवः ।
सिद्धेश्वरो विश्वसारस्तथा बौधायनं पुनः ॥
माहेश्वरमहाहारौ कालाग्निश्च महा[illegible]ण्यपि ।
एतेषामन्ततो ज्ञेयस्तन्त्रशब्दः पृथक् पृथक् ॥
सिद्धनाथो महाकालो दक्षिणामूर्त्तिरेव च ।
दुर्गेन्द्रवश्यगौरक्षा वैशम्पायनमेव च ॥
नन्दिकेश्वरवायव्यौ वाराही शाम्भवीति च ।
सनत्कुमारः श्रीकण्ठोऽप्यगस्त्यस्तत्त्वसारकौ ॥
वशिष्ठः पुनरेतेषां अन्ते स्यात् संहिताभिधा ।
ब्रह्मविष्णुरुद्रसिद्धदेवभास्करस्त्रयः ।
एतेषामन्ततो ज्ञेयं यामलं शास्त्रसंज्ञकम् ॥
कुलवीरमन्त्रभावचूडामणिभिरीरितः ।
हयग्रीवनारदाभ्यां महाकपिलतो भवेत् ॥
पञ्चरात्रं ततो देवी शैवलिङ्गागमानि च ।
कुमारीविजयाकालीतारकल्पाश्च विश्रुताः ॥
मातृकामन्त्रधानानि कुलसूत्रं कुलानि च ।
माद्यन्तेभ्यः शब्देभ्योऽप्यर्णवं परिकीर्त्तितम् ॥
रहस्यक्रमतः कल्लोलिनीश्रीमतकालयोः ।
उत्तरञ्च पदं ज्ञेयं चक्रीपीठं प्रकीर्त्तितम् ॥
नित्याह्निको मातिलके चोड्डीशं कुलपूर्व्वकम् ।
स्वायम्भुवः सोमशम्भुस्तथैव पिङ्गलामतम् ॥
शङ्करयो महाराजनवरत्नेश्वरावपि ।
कामधेनुमतं कुम्भकुलसम्भवसंज्ञकौ ।

कालीक्रमो मत्स्यसूक्तमुदयाकल्पऋतिः ।
योगिनीहृदयञ्चैव कालीहृदयमेव च ।
त्रिशक्तिरत्नकं सोमभुजङ्गावलिरेव च ॥
कुलावतारकं पञ्चवाराहीश्वरपूर्व्वतः ।
गौरीसंवादकं ज्ञेयं समयाख्यकमातृका ॥
तुर्य्यायागस्य ललितस्वच्छन्दं परिकीर्त्तितम् ।
कुलप्रकाशकञ्चेति कुलामृतप्रदायिका ॥
नवदुर्गाकल्पसंज्ञं कुलमूलावतारकम् ।
तन्त्रराजस्य कामाख्या शब्दान्तं चासिका स्मृता ॥
कुलगह्वरोतिकं स्यादेतेभ्यः ग्रन्थमध्यतः ।
वचनानि समानीय लिख्यते क्रियते न तु ॥

End :—

तन्त्राणि [यानि] न सकलानि न तानि [म]र्त्ये
मर्त्ये च यानि न पुनः प्रकटानि तानि ।
देशान्तरे कति कतीह न सर्व्वमस्ति
ग्र[न्थे त्व]पूर्णवचनं किमु दूषणं मे ॥
एकस्याः पदपद्मपूजनविधेर्निःशेषतो निर्णये
शम्भोः पञ्चमुखोऽप्यनेकक[वपु]र्भूत्वाप्ययो न क्षमः ।
दिग्विद्यागम(ना)निर्णयोचिततया ग्रन्थे प्रवृत्तोऽस्मि य-
त्स[त्साह]स्यतरं कृतं बुधजनैः क्षन्तव्यमेतद्ध्रुवम् ॥

Last Colophon : –

इति श्रीतन्त्रचिन्तामणौ मातृकावर्णध्यानदशविद्यादिनानामन्त्र-
भेदमुख्योपायान्यैष्टिनिर्णयनामा चत्वारिंशत्तमः प्रकाशः सम्पूर्णः ।

Post-colophon Statement :—

समाप्तश्चायं दामोदरसूरिणा कृतो ग्रन्थः ।

This is a comprehensive Tantric compilation dealing with the details of Tantric worship. The name of the author is found in one of the introductory verses while the post-colophon statement of the present MS attributes the work to Dāmodara Sūri.

6218.

11311. *Tantracintāmaṇi.*

Substance, country-made paper. 13 × [illegible] inches. Folia, 1-411. Lines, 11 on a page. Extent in ślokas, 15,000. Character, Nāgarī. Appearance, fresh. Complete in [illegible] chapters.

A complete table of contents is given in the beginimg of the MS in Folia markel 1-15

6219.

Yadunātha Śarmā.

3982A. आगमकल्पवल्ली । *Āgamakalpavallī.*

Substance, country-made paper. 9¼ × 6¾ inches. Folia, 10. Lines, 22 on a page. Extent in ślokas, 350. Character, Kaśmīrī. Appearance, old, worn out and discoloured. Incomplete.

MSS of the work are noticed in Oudh. XI. 20 and Stein. 227. A MS of the work, complete in 25 chapters, is in the Society's old collection. It is a comprehensive compilation dealing with the details of the worship of various deities, specially the Mahāvidyās. The present MS contains the first two chapters and a portion of the third chapter up to the beginning of the Nāḍīcakra.

Beginning :—

ॐ स्वस्ति । श्रीगणेशाय नमः । ॐ नमः शिवाय ।

यत्पादपङ्कजयुगं हृदि सन्निवेश्य
विश्वं सृजत्यविकलं खलु पद्मजन्मा ।
विष्णुश्च पालयति संहरते महेशः
तं देवमादिपुरुषं सततं नतोऽस्मि ॥

नत्वा गिरीशं गिरिजां गणेशं वाणीं मुनीन्द्रैः स्तुतपादपद्माम् ।
विलोक्य शास्त्रं सद्गुणाद्यमेषा वितन्यते ह्यागमकल्पवल्ली ॥
प्रपञ्चसारसिद्धान्तं शारदातिलकं तथा
सपरिष्कारमालोक्य तथा सारसमुच्चयम् ।
यत्नेन दीपिकां दृष्ट्वा तथा च लघुदीपिकाम्
तथा पूजाप्रदीपञ्च पुरश्चरणचन्द्रिकाम् ॥
मन्त्रदर्पणसिद्धान्तं मन्त्रदेवप्रकाशकम् ।
मन्त्रनेत्रञ्च मन्त्रान्तं श्रीरामार्चनचन्द्रिकाम् ॥
मन्त्रमुक्तावलीं रत्नावलीं ज्ञानार्णवादिकान् ।
तन्त्रं सनत्कुमारस्य नारदीयचतुश्शतीम् ॥
पूजायागं सोमशम्भुमतं चागस्त्यसंहिताम् ।
संहितां वैष्णवीं तद्वत् तत्त्वसागरसंहिताम् ॥
संहितां कपिलप्रोक्तां श्रीमन्नवरसंहिताम् ।
तन्त्रं श्रीभुवनेश्वर्याः सर्वसिद्धान्तमादरात् ॥
कल्पं श्रीवनदुर्गायास्तन्त्रं सम्मोहनादिकम् ।
हयग्रीवमतं तद्वत् तथा विज्ञानभारतम् ॥
शुद्धं च तन्त्रराजं च तथा वै पिङ्गलामतम् ।
वामकेश्वरतन्त्रञ्च समस्तं रामदीक्षितम् ॥
विद्यानेश्वरसिद्धान्तसारं श्रीसंहिताक्रमात् ।
विज्ञानललितं तन्त्रराजं नागायकीमपि ॥
वशिष्ठसंहितागस्त्यसंहितां भैरवं तथा ।
दिव्यसारमतं चिच्चन्द्रिकां कामिकमादरात् ॥
होमाकरोत्तरं ग्रन्थं प्रतिष्ठासारसंग्रहम् ।
संहितां वायवीं तद्वत् संहितां [ब्र]ह्मणस्तथा ॥
कश्यपोः संहितां ब्रह्मविष्णुरुद्रादियामलम् ।
तथैव यामलोद्धारं मत्स्यसूक्तमपि क्रमात् ॥
पार्वतीश्वरसंवादं वाराहीतन्त्रमादरात् ।
तथैव कुब्जिकातन्त्रं [त्व]रिताख्यमादरात् ॥

तथैव योगिनीतन्त्रं कामधेन्वादिकाद्वयम् ।
ईशानसंहितां तद्वत् सिद्धान्तं विश्वकर्मणः ॥
तन्त्रं श्रीदक्षिणामूर्तेः वैशम्पायनसंहिताम् ।
कुलचूडामणिं तद्वत् भावचूडामणिं तथा ॥
कुलार्णवं कुलोड्डीशं संमोहनाख्यकं तथा ।
पुराणं विविधं तद्वत् स्मृतिशास्त्राणि भारत ॥
ज्योतिःशास्त्राणि चालोक्य सकलं पद्धतिं क्रमात् ।
अन्ये ये सद्ग्रन्थाः सन्ति तान् दृष्ट्वा च पुनः पुनः ॥
विधानं सम्यगस्माभिः कौलादीनां प्रपञ्चितम् ।
ज्ञानानुसारतो ग्रन्थं विभाव्य च मुहुर्मुहुः ॥

Colophons:—

2B, इत्यागमकल्पलतायां प्रथमः पटलः; 5B, इत्यागमकल्पलतायां द्वितीयः पटलः ।

6220.

Yogendra.

2897. आगमसारसंग्रहः । *Āgamasārasaṃgraha.*

Substance, country-made yellow paper. 17 × 4 inches. Folia, 5. Lines, 10 on a page. Extent in ślokas, 150. Character, Bengali. Appearance, fresh. Incomplete.

The present MS. which has been described in L. N. 4050, contains the first two chapters of the work which speak of the omnipresence and supremacy of Śakti as well as the greatness of the Kaula form of worship.

Of the works quoted and referred to, mention may be made of the following:—

कामधेनुतन्त्र, ज्ञानार्णव, कौलावलि, कुमारीकल्प, कणादसंहिता, लिङ्गार्च-
वासुदेवरहस्य, विश्वसार, वाराहसंहिता, भूतशुद्धितन्त्र, गुरुपादुका, चिन्तामणि-
तन्त्र, उत्तरतन्त्र, कौमुदीतन्त्र, कुलार्णव, योगाचार ।

6221.

Kāśinātha.

6542. **अवतारभेदप्रकाशिका ।** *Avatārabhedaprakāśikā.*

Substance, country-made paper. 10¼ × 3¾ inches. Folia, 17. Lines, 7 on a page. Extent in Ślokas, 300. Character, Nāgara. Appearance, fresh. Complete.

The title as well as the name of the author are found in a later hand on the reverse of Fol. 1 as also at the end of the work where the title is given as **नित्याद्यवतारभेद-प्रकाशिका.** The work gives an account of some of the religious sects of the Hindus, describes the origin of various deities including some of the Mahāvidyās and some of the incarnations of Viṣṇu, and points out the characteristics of their worship.

Beginning:—

श्रीदक्षिणामूर्तिगुरुभ्यो नमः ।
श्रीशाक्तसंप्रदायमतम् [I. S. 38-50]

देव्युवाच ।

देवेश श्रोतुमिच्छामि विष्णुभेदान् शिवस्य च ।
वैखानसो भवेदादौ श्रीराधारमणो तथा ॥
गोकुलेशो महेशानि तथा वृन्दावनो भवेत् ।
पाञ्चरात्रं पञ्चमं स्यात् षष्ठः श्रीवो वैष्णवः ॥
रामानन्दी हरिव्यासी निम्बार्कश्च महेश्वरि ।
ततो भागवतो देवि दश भेदाः प्रकीर्तिताः ॥
शिवशैवौ मुण्डी जटी चैव दिगम्बरश्च कमेण च ।
एकदण्डी महेशानि वीरशैवस्तथैव च ॥
सप्त पाशुपताः प्रोक्ताः दशधा वैष्णवा मताः ।
एतेषां लक्षणं देवि शृणु यत्नेन शाम्भवि ॥

देवेशि सर्व्वं संत्यज्य यस्तिष्ठति स वैष्णवः ।
वैराग्यसादिदीक्षाद्यैः भूषितः स्मार्त्तवैष्णवः ॥
श्रीराधावल्लभं देवि प्रदद्यु यत्नेन साम्प्रति ।
वैष्णवाचारनिरतो विष्णुमन्त्रैकपारगः ॥
अनन्यचेतसः शान्तात्मा विष्णुभक्तिपरायणः ।
श्रीराधावल्लभो देवि गोकुलेषं प्रदद्यु प्रिये ॥
नानालङ्कारसमाक्रो नानासौगन्धभूषितः ।
गत्वा कुलं प्रीणयिता कामी कृष्णस्वरूपकः ॥
प्राप्य मर्त्यपायस्य नित्यमिविन्नकारकं ।
अन्ते मुक्तिपदो देवि वासुदेवस्वरूपकः ॥
गन्धर्व्वाभिसारनिरतो ललितविग्रहतत्परः ।
समस्तार्थो गोकुलेशः सर्व्वसिद्धिकरो भवि ॥
वृन्दावनाख्यं देवेशि प्रदद्यु यत्नेन साम्प्रतम् ।
विरतात्मा प्रसन्नात्मा विष्णुभक्तिपरायणः ॥
कामिनीसङ्गचपलो वनक्रीडाविनोदकृत् ।
सौगन्धभूषिततनुः स्त्रीध्यानैकपरायणः ॥
विष्णुस्वरूपतत्त्वज्ञः प्रोक्तो वृन्दावनो प्रिये ॥

6222.

6012. **तन्त्रसिद्धान्तकौमुदी ।** *Tantrasiddhāntakaumudī.*

Substance, country-made paper. 12 × 5 inches. Folia, 6. Lines 1[illegible] on a page. Extent in ślokas, 170. Character, Nāgarī. Appearance, fresh. Complete in three chapters.

This work deals in short with the philosophy of the Tantras. Of the works and authors referred to, mention may be made of **सत्यजित्भट्टारक, विज्ञानभैरव** (1B), **प्रत्यभिज्ञा, स्वच्छन्द** (2A), **भर्गशिखा, वीरावलि, मालिनीविजय** (2B), **कुलयुक्ति, सत्यत्रयभट्टारक, लक्ष्मीकौलार्णव** (3A), **ज्ञानार्णव, सर्वज्ञानोत्तर, तन्त्रसद्भाव, श्रीकण्ठीयसंहिता** (4A) and **देवीयामल** (4B).

Beginning:—

श्रीगणेशाय नमः । श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः ।
अनाद्यायाखिलाद्याय मायिने गतमायिने ।
अरूपाय सरूपाय दक्षिणामूर्त्तये नमः ॥
नत्वा श्रीशङ्कराचार्य्यचरणाम्भोजद्वयम् ।
काशीनाथः प्रकुरुते तन्त्रसिद्धान्तकौमुदीम् ॥

तत्र प्रथमं नरेश्वरभेदवादिप्रातिपक्ष्येण चैतन्यपरमार्थः शिव एव विश्वस्य आत्मा इत्यादिश्रुतिः; चैतन्यमात्मा । इत्यत्रेति-तस्य कस्यापि सत्त्वाभावात् चितिक्रिया सर्व्वसामान्यरूपेति । चेतयतीति चेतनः सर्व्वज्ञानक्रियास्वतन्त्रस्तस्य भावः चैतन्यं सर्व्वज्ञानक्रियासम्बन्धमयं परिपूर्णस्वातन्त्र्यमुच्यते । तच्च परमशिवस्यैव भगवतोऽस्ति ।

End:—

देहप्राणसुखादिभिः प्रतिकलं संरुध्यमानो जनः
पूर्णानन्दघनामिमां न चिनुते स्वादिशक्तीं स्वां चितिम् ।
तां तु बोधसुधाब्धिविश्वमभितस्तत्फेनपिण्डोपमं
यः पश्यत्युपदेशतस्तु कथितः साक्षात् स एकः शिवः ॥

Colophons of the different chapters:—

3B. इति श्रीमद्भट्टोपनामकजयरामभट्टसुत-वाराणसीगर्भसम्भव-काशीनाथ-विरचितायां तन्त्रसिद्धान्तकौमुद्यां शाम्भवोपायप्रदर्शनं नाम प्रथम-प्रकाशः. 5A, ०शाक्तोपायप्रदर्शनं नाम द्वितीयप्रकाशः; 6A, ०आणवोपायप्रदर्शनं तृतीय-प्रकाशः ।

6223.

6531. *Tantrasiddhāntakaumudī.*

Substance, country-made paper. 10½ × 6¾ inches. Folia, 8. Lines, 10 on a page. Extent in ślokas, 150. Character, Nāgara. Date, Samvat 1961. Appearance, fresh. Complete in three chapters.

Post-colophon Statement:—

श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः। सं १९६[१] मौः श्रावण
वदी १०। मालवीयबालमुकुन्दस्येदं पुस्तकम्।

6224.

6522. **मन्त्रसिद्धान्तमञ्जरी।** *Mantrasiddhāntamañjarī.*

Substance, country-made paper. 9¾ × 5 inches. Folia, 6. Lines, 8 on a page. Extent in ślokas, 70. Character, Nāgarī. Date, Samvat 1961. Appearance, fresh. Complete.

The work which is divided into three sections gives in a general way the inner sense of *mantras*, as referring to the Supreme Being, speaks of different types of initiation meant for different rites and followers of different sects, and enumerates thirty-two kinds of shortcomings of human beings.

Beginning:—

श्रीगणेशाय नमः। श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः।
दक्षिणामूर्त्तिपादाब्जमध्येनुनमाम्यहम्।
काशीनाथः प्रतनुते मन्त्रसिद्धान्तमञ्जरी[म्]॥
अथातः सर्वमन्त्राणां देवता ब्रह्म शाश्वतम्।
उद्दिष्टं ब्रह्म तत् सर्वोपास्यादिकं ककम्॥
पृथक् पृथगुपासिभ्य उक्तानां तच्च केवलम्।
निराकारं सर्वगतं सच्चिदानन्दलक्षणम्॥

... ...

मन्त्रेषु नाममात्रे तु भवेत् हि विभक्तयः॥
तासामर्थ[र्थो?] प्रथम[म]भिव्यक्ता मन्त्राणां ...
यथाक्रमः प्रातिपदिकं ... ब्रह्म ... ॥

2A. सर्वत्र चतुर्थ्यन्तपदे यत्प्रातिपदिकं तद्रूपा।
नमः स्वाहादियोगेन ... स्फुटं ...॥

Colophon:—

इति श्रीभट्टोपनामककाशीनाथविरचिता सर्वसिद्धान्तमञ्जरी समाप्ता ।

6225.

5911. वैदिकतान्त्रिकाधिकारनिर्णयः । *Vaidikatāntrikādhikāranirṇaya.*

Substance, country-made paper. 12 × 5 inches. Folia, 4. Lines, 10 on a page. Extent in ślokas, 100. Character, Nāgarī. Appearance, fresh. Complete.

This work shows how particular classes of Tantras are meant for particular classes of worshippers. Of the works and authors referred to, mention may be made of विद्यारण्य (1B), पुरुषार्थप्रबोध (2A, B) and अनन्तभट्ट (3B), maternal grand-father of the author.

Beginning:

श्रीदक्षिणामूर्तिगुरुभ्यो नमः ।

अथ वैदिकतान्त्रिकाणामधिकारनिर्णयः

शुद्धवैदिकः, तान्त्रिकवैदिकः, शुद्धतान्त्रिकः, वैदिकतान्त्रिकः, इत्ये
चत्वारः अधिकारिणः स्वस्वकर्मानुसारतः ।

सार्वाधिकारिणः प्रोक्ताः शिवेन परमात्मना ।

तन्त्रशास्त्रं न सहते यः सोऽयं शुद्धवैदिकः ।

तन्त्रशास्त्राभिप्रीतः प्रोक्तस्तान्त्रिकवैदिकः ॥

वेदशास्त्रं न सहते यः सोऽयं शुद्धतान्त्रिकः ।

मिश्रशास्त्ररतः प्रोक्तो योऽसौ वैदिकतान्त्रिकः ॥

वेदे वेदानुकूले च अधिकारी तु वैदिकः ।

तन्त्रोपसर्जने शास्त्रेऽधिक[ारी ?]तान्त्रिकवैदिकः ॥

वेदशास्त्रासहे तन्त्रेऽधिकारी शुद्धतान्त्रिकः ।

वेदोपसर्जने तन्त्रेऽधिकारी वैदिकतान्त्रिकः ॥

श्रीमद्विद्यारण्यचरणास्तु ।

सद्भूतसंहितं यत्तु भागधेयं पराशरम् ।
शुद्धवैदिकमित्युक्तं विद्वद्भिः शुद्धवैदिकैः ॥
शिवराघवसंवादवायवीयादिकं बुधैः ।
वेदागमविभागज्ञैः प्रोक्तं तान्त्रिकवैदिकम् ॥
वेदबाह्यागमं तन्त्रं सौरं पाशुपतादिकम् ।
शुद्धतन्त्रमिति प्रोक्तं वेदतन्त्रार्थकोविदैः ॥
पञ्चरात्रं भागवतं शैवसिद्धान्तसंज्ञितम् ।
सर्व्वमेतन्महाप्राज्ञैः प्रोक्तं वैदिकतान्त्रिकम् ॥
पाणिनीयं जैमिनीयं शास्त्रं वैयासिकं तथा ।
भाष्यं मद्भगवत्पादैः प्रोक्तं तच्छुद्धवैदिकम् ॥
अक्षपादीयकाणादकापिलानि तथैव च ।
पातञ्जलं च तत्सर्वं प्रोक्तं तान्त्रिकवैदिकम् ॥
शारदातिलकं तद्वत् मन्त्रदेवप्रकाशिका ।
प्रपञ्चसारं चाप्येवं प्रोक्तं वैदिकतान्त्रिकम् ॥

Colophon:—

इति श्रीमद्भट्टोपनामकदक्षिणाम्बात्मजमतप्रवर्त्तककाशीनाथेन विरचितः वैदिकतान्त्रिकाधिकारनिर्णयः समाप्तः ।

6226.

5910. **आगमोत्पत्त्यादिवैदिकतान्त्रिकनिर्णयः ।** *Āgamotpattyādivaidikatāntrikanirṇaya.*

Substance, country-made paper. 12 × 5 inches. Folia, 11. Lines, 10 on a page. Extent in ślokas, 330. Character, Nāgara. Appearance, fresh. Complete.

The work, which is called *Āgamotpattinirṇaya* in one of the introductory verses, concerns itself not only with a description of the origin of the Tantras and an enumeration of the important Tantric texts but incidentally gives

an account of various Tantric rites, especially the sacraments meant for a follower of the Tantras. It is presumably on account of the variety of topics dealt with that the work is called *Āgamotpattyādivaidikatāntrikanirṇaya* in the last colophon.

Beginning:—

श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः ।

अनन्ताख्यं गुरुं नौमि कवित्वप्रतिभाकरम् ।
शास्त्रवल्लीजलधरं स्फुरत्कीर्त्तिकरं परम् ॥
नत्वा श्रीदक्षिणामूर्त्तिचरणाम्भोरुहद्वयम् ।
काशीनाथः प्रतनुते आगमोत्पत्तिनिर्णयम् ॥

तत्र रुद्रयामले ।

देव्युवाच ।

शाधि शाधि महादेव सर्वागमस्वतन्त्रम् ।
माहेश्वरः स्वयं मुक्तः ईश्वरः इति वादिनः ॥
महाकामः कथं ज्ञेयः कथं मुक्तिर्भविष्यति ।
मुक्तिः [च] कतिधा देव श्रेष्ठा का किञ्च साधनम् ॥
यद्यस्ति यदि कृपा देव निवेदौ सुरेषु च ।

ईश्वर उवाच ।

ज्ञायते तत्प्रभावेण सकलं वेदवाक्यतः ॥
वेदेभ्यः सारमुद्धृत्य यत्कृतं शङ्करेण वै ।
वेदाभिन्नतया देवि आगमः परिकीर्त्तितः ॥
आगतं शिववक्त्रेभ्यो गतं च गिरिजामुखम् ।
मलत्रयविनाशित्वात् तस्मादागम उच्यते ॥
आगमोत्पत्तिसंबन्धे च कथ्यते शृणु साम्प्रतम् ।
साङ्गवेदाध्यापको ब्रह्मा यदा जातस्तु देवता ॥
अहंकारी महान् जातस्तत्र विद्याप्रभावतः ।
तदा तस्मिन् कलियुगे शिश्नोदरपरायणाः ॥

नाद्रुतास्तैस्तु वेदादिस्मृतयो वै ह्ययागमे ।
खानं पानं मैथुनञ्च देशे देशे पुरे पुरे ॥
न कश्चिन्मन्यते विष्णुं गणेशं न रविं शिवम् ।
मत्वा सर्व्वे जगत्क्लान्तं भगपूजां प्रकुर्व्वते ॥
तदा वटुकरूपेण मया पृष्टः पितामहः ।
ब्रह्मणादिषु यतो धर्म्मो वयं येन तरेमहि ॥
तदा तु ब्रह्मणा प्रोक्तं ममोर्द्ध्वमुखनिर्गतः ।
आगमः पञ्चमो वेदः भुक्तिमुक्तिप्रदायकः ॥
तदा हि कलिमध्ये तु मया प्रोक्तः पितामहः ।
ब्रह्मेदं त्वया वाच्यं सृष्टिकर्त्ता सदाशिवः ॥
तदा पितामहेनोक्तं कर्त्ताहं चापि रुद्रकः ।
ममोर्द्ध्वमुखतो जातं मन्यसे चान्य आगमः ॥
एवं तथाचारनिष्ठा यास्यन्ति परमां गतिम् ।
वटुरूपं ततस्ते भो मौग्ध्यं खानपानाकुलाभवन् ॥
इति श्रुत्वा ब्रह्मवचो धर्म्मसंस्थापनाय तु ।
युगाश्रयं तदा ज्ञानं कोपसंक्रान्तलोचनम् ॥
अवज्ञां वीक्ष्य धातुश्च प्रतरेण नखेन च ।
शिरो निपातितं धातुः कराकृष्टा धरातले ॥
तन्मुखात् पञ्चमो वेदो मम देहे लयं गतः ।
तस्मादागमकर्त्ताहं वेदकर्त्ता पितामहः ॥
पञ्चाशद्वै महापद्मो ह्यागमग्रन्थ ईरितः ।
तत्र मन्त्रा महादेवि सर्व्वेऽपि सुप्रतिष्ठिताः ॥
त्रिंशत्सहस्रलक्षञ्च वृन्दनवखर्व्वुदकोटयः ।
मन्त्राः प्रोक्ता महेशानि त्वागमे कुत्र किं स्थितम् ॥
तत् शृणु त्वं महेशानि यदाहं तव वल्लभः ।
पञ्चाशच्च महापद्मं षड्विंशति भुवि स्थितम् ॥
चतुर्दश स्थितं स्वर्गे [र्गे ?] दश पातालगोचरम् ।
एवं क्रमेण देवेशि ह्यागमः कथितो मया ॥

A list of Tantra works is given in Fol. 2A:—

कुमारी-योगिनी-काली-वाराही-कुब्जिका परा ।
नारायणी मुण्डमाला चामुण्डा भुवनेश्वरी ॥
गौतमी समया नीलामणिर्विजयमालिनी ।
लीलावती गुह्यसिद्धिर्मालिनी परमेश्वरी ॥
प्रपञ्चपञ्चिका-शम्भु नित्या कात्यायनीति च ।
फेत्कारी भैरवी भूतसिद्धिः सिद्धेश्वरी तथा ॥
मेरुनीलमतञ्चाख्य शक्तिसंगमभैरवी ।
साङ्ख्यायनं किरणाख्यं गन्धर्वभूतभैरवी ॥
वीरार्हनं वीरभद्रं रुद्रकालानलो[लो ?]त्तरे ।
सिद्धसारस्वतं हाहारावो मशानभैरवः ॥
सिद्धेश्वरो विश्वसारस्तथा बौधायनं पुनः ।
माहेश्वर-महाहारी कालाग्निश्च महान्त्यपि ॥
एतेषां सप्ततो ज्ञेयस्तन्त्रशब्दः पृथक् पृथक् ।
सिद्धनाथो महाकालो दक्षिणामूर्त्तिरेव च ॥
सुरेन्द्रब्रह्मगोरक्षा वैशम्पायनमेव च ।
नन्दिकेश्वरवायव्यौ वाराही शाम्भवीति च ॥
सनत्कुमारः श्रीकण्ठो भृगुच्यवनमारकौ ।
वसिष्ठः पुनरेतेषां अन्ते स्यात् संहिताभिधा ॥
ब्रह्मविष्णुयमसिद्धदेवमाचन्द्रपालकः ।
एतद्यामलतो ज्ञेयं यामलं चाष्टसंख्यकम् ॥

Colophons and sectional headings:—

2A, इत्यागमोत्पत्तिः ; 2B, अथ युगधर्मानाह ; 3B, अथ कौलिकवैदिककर्मविचारः ; 4B, अथ षोडश संस्काराः ; 5B, अथ जातकर्माख्यसंस्कारः ; अथ नामप्रदानाख्यसंस्कारः ; 6A, अथान्नप्राशनसंस्कारः ; अथ चौलाख्यसंस्कारः ; 6B, अथ मौञ्जीबन्धाख्यसंस्कारः ; अथ प्राजापत्यव्रताख्यसंस्कारः ; अथ सौम्यव्रतसंस्कारः ; अथ आग्नेयाख्यसंस्कारः ; 7A, अथ वैश्वदेवाख्यसंस्कारः ; अथ

गोदानाख्यसंस्कारः; 7B, अथ समावर्त्तनाख्यसंस्कारः; अथ विवाहाख्यसंस्कारः; अथ पितृमेधाख्यसंस्कारः; 8A, इति षोडश संस्काराः; अथ अग्रे तन्त्रमन्त्रोपासना-क्रममाह; अथ पूर्णाभिषेकप्रकारमाह; 9A, इति दक्षिणाम्नायोक्तमार्गद्वयस्य पूर्णाभिषेकविधिप्रकारः; 9B, अथ महाविद्यायाः षडाम्नायप्रकारमाह; अथ श्रीविद्यायन्त्रधारणमाहात्म्यम्; 10A, [शाभिनामन्त्रोद्धिक्रिया]; इति श्रीमद्भट्टोपनामककाशीनाथभट्टसुतश्रीजयरामभट्टगर्भसम्भवकाशीनाथविरचित आगमोक्तवैदिकतान्त्रिकनिर्णयः समाप्तः।

6227.

6014. तन्त्रभूषा। *Tantrabhūṣā.*

Substance, country made paper. 11¾ × 5 inches. Folia, 8. Lines, 10 on a page. Extent in ślokas, 260. Character, Nāgarī. Appearance, fresh. Complete.

The work seeks to establish the authoritativeness of the Tantras. Of the works and authors referred to, mention may be made of—शङ्कराचार्यकृतसंग्रह (2A), भट्टोजिदीक्षित (4A) and प्रपञ्चसारविवरण (5B).

Beginning:—

श्रीगणेशाय नमः।

श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः।

वाराणसीमहं वन्दे सच्चिदानन्दरूपिणीम्।
मातृरूपेण सततं सर्वभारेऽखिलेष्टदाम्॥
नत्वा श्रीदक्षिणामूर्त्तिं काशीनाथमहेश्वरम्।
काशीनाथः प्रतनुते तन्त्रभूषां समासतः॥

तत्र ईश्वरः सर्व्वा अपि श्रुतीः भवपाशबद्धानां जन्तूनां धर्माय मुक्तये च समुपदिष्टवान् इति। अन्येषां स्मृतिशास्त्रादीनां तन्मूलकत्वेन च प्रामाण्यमिति सुप्रसिद्धतरम्। तथा तन्त्रागमस्यापि तन्मूलक-

त्वमिति चेदुच्यते । सर्व्वासु श्रुतिषु काण्डत्रयम् कर्म्मोपासना-
ज्ञानभेदेन । तत्र कर्म्मकाण्डं जैमिनिप्रभृतिभिः सम्यक्तया विवृतम् ।
इदमुपासनाकाण्डं परशुरामनारदहयग्रीवशिववसिष्ठादिभिः । ब्रह्म-
काण्डं भगवद्व्यासादिभिरिति श्रुतिमूलकतास्य प्रत्यक्षोपलब्धा । श्रुति-
मूलकता च त्रिपुरापूर्व्वोत्तरतापनीय-शिवपूर्व्वोत्तरतापनीय-नृसिंह-
पूर्व्वोत्तरतापनीय-रामपूर्व्वोत्तरतापनीय-गोपालपूर्व्वोत्तरतापनीय-
गणेशपूर्व्वोत्तरतापनीय-दक्षिणामूर्त्त्युपनिषदादि-कालीतारात्रिपुरा-
बालाभुवनेश्वरीबगलागणेशवासुदेवाद्युपनिषदादि-सौराष्टाक्षरनारा-
यणाष्टाक्षरशैवपञ्चाक्षरात्मिकश्रुतिभ्यः अनुसन्धातुमुपलभ्यत एव ।

Colophon:—

6B, इति श्रीमत्कूर्म्मोपनामकजयरामभट्टसुतवाराणसीगर्भसम्भव-काशीनाथ-विरचिता तन्त्रभूषा समाप्ता ।

After the colophon the work continues as follows :—

श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः ।

अथ वार्त्तिके शिष्टाचारपरिग्रहवेदविरोधहेतोरन्यैश्च नानामत-
श्रीविद्यादौ सुरामांसपुष्पपरकीयसुरतादौ सत्यपि वेदविरोधस्यैव
आगमस्य अप्रामाण्यम् । यत्र पञ्चरात्रपाशुपतादिधर्मे सन्ध्याग्नि-
होत्रादि-श्रौतस्मार्त्तकर्म्मबाधो भूतशुद्धिमातृकान्यासादेर्नैयत्यप्र-
माणात् तत्रैव पूर्व्वोक्तहेतुभ्यामप्रामाण्यम् । न सर्व्वत्र ।

Another colophon in a later hand is found at the end:—

इति तन्त्रभूषा समाप्ता ।

6228.

Harilāla.

10123. धर्मवितानम् । *Dharmavitāna.*

Substance, country-made paper. 9 × 6 inches. Folia, 20. Lines, 21 on a page. **Extent in ślokas, 420.** Character, **Nāgara.** Appearance, old **and discoloured. Complete.**

The present work seeks to demonstrate the authoritativeness of the Tantras. In this connection spiritual interpretations are suggested of apparently revolting and nauseating statements concerning the use of wine, women, etc. (Fol. 8A ff).

Beginning:

ज्ञानानन्दमयं समाधिकरणं वेदोक्तमार्गापरं
यद्वै केऽपि भजन्ति भक्तिचतुरा भक्त्या भजन्ति प्रभुम् ।
यं कालं गणयन्ति केऽपि कवयो ब्रह्मेति तेजोमयं
तं शम्भुं प्रणमामि योगसुलभं लोकैकदुःखापहम् ॥ १ ॥
. . . .
सर्वोन्नतो मध्यमाना यत्पादं मूर्ध्नाकल्पान् (न्) ।
धर्मप्रवर्तने ख्यातो भवानीदासभास्करः ॥
तत्पुत्रः कृष्णनामा धर्मधर्मसुतमहत्पद्मानाम् ।
तनुते धर्मवितानं श्रुतिविमानन्तमसतं मत्वा ॥ ६ ॥

End:

कृष्णाद्धर्मवितानं श्रुतितन्त्रस्य गुणसम्पन्नम् ।
कृतमुपमन्नं नियुद्धं चित्तधनानं सतां मुदे ॥
श्रीमान् भवतीर्थ क्षितिपतिः सुसम्मतो विद्वैः ।
तत्र चतुर्भुजपुत्रो विष्णुमनुकल्प इह धन्यः ॥
तत्तनुजो मिश्रेशो भवानीदास इति विश्रुतो लोके ।
तत्पुत्रो कृष्णनामा धर्मवितानं तनोति स्म ॥
ग्रहमुनिवसुचन्द्रमिते विक्रमसंख्यात्मगते वर्षे ।
शुक्लमासशुचिपक्षे मदनतिथौ गुरुवारे पूर्णम् ॥

6229.

Kṛṣṇadeva.

3472. चिदानन्दमन्दाकिनी । *Cidānandamandākinī.*

Substance, country-made paper. 13¾ × 3¼ inches. **Folia**, 54, of which 2 to 8 and 20 to 36 are missing. **Lines**, 9 on a page. **Extent** in ślokas, 2,600.

Character, Bengali. Date, Śaka 1635. Appearance, discoloured. Complete in eight chapters.

The work deals with the philosophy of the Tantras and the esoterics of the Tantra rites.

Beginning:—

ॐ नमः परायै ।

नत्वा श्रीनाथपादाम्बुजनिजपरमानन्दसन्धानकन्दं
वन्दे चन्द्रार्कवह्न्युत्करचिरचिरां सच्चिदानन्दरूपाम् ।
गीर्वाणानामचिन्त्यां प्रणतजनचिदानन्दसन्दोहदक्षां
पूर्णेन्दूनामनेकैरनुमितवदनां भावयन् शब्दभूताम् ॥

आगमानुग्रहादेशमासाद्य सुधौ
प्रपञ्चार्णवोत्तारणे कारणं यत् ।
तदस्मिन् परं ब्रह्मतत्त्वं सुगुप्तं
प्रकाशीकृतं साधकानां हिताय ॥

शिवाभिन्नमानन्दमाकाशकल्पं
शिवं निर्गुणं निर्मलं निष्क्रियञ्च ।
त्रिमूर्त्यात्मकं मूलभूतं गुणानां
प्रपद्ये परात्मानमानन्दकन्दम् ॥

प्रणम्याशुमोक्षप्रदामादिशक्तिं
कृता श्रीमता कृष्णदेवेन सम्यक् ।
सुधा आगमार्थप्रकाशैकहेतु-
श्चिदानन्दमन्दाकिनी पावनीयम् ॥

श्रियं श्रीपतिं भोगमोक्षैककन्दं
सदाशुद्धसत्त्वोदयानन्दरूपम् ।
प्रणम्य पृथिव्यां त्रिनेत्रेण मुक्तां
गतः कृष्णदेवस्तनोतीह तत्त्वम् ॥

सितसरसिजमध्ये भारतीं शुभ्रवर्णां
करविनिहितवीणां वादयन्तीं सुखेन ।
विगलदमृतधारां वाङ्मयीं ज्ञानसारा-
मभिमतवरसिद्धौ सिद्धरूपां नमामि ॥

ननु वेदादि[illegible]
निर्बन्धस्तु सामान्यशास्त्रपाठे कियः । ज्ञानशास्त्रे तु नाय नियमः । जनकात् शुकदेवस्य ज्ञानोपदेशश्रवणात् व्याधतो मुनिपुत्रस्यापि तथा दर्शनाच्च सूतमुखात् शौनकादीनां पुराणश्रवणाच्च ।

End:—

सुरा शक्तिः शिवो मांसं तद्भोक्ता भैरवः स्वयम् ।
तयोरैक्यसमुत्पन्न आनन्दो मोक्ष उच्यते ॥
आनन्दं ब्रह्मणो रूपं तच्च देहे व्यवस्थितम् ।
तस्याभिव्यञ्जकं द्रव्यं योगिभिस्तेन पीयते ॥
लिङ्गत्रयविशेषज्ञः षट्चक्रपद्मभेदनः
पीठस्थानानि चागत्य महापद्मवनं व्रजेत् ॥
आमूलाधारमाब्रह्मरन्ध्रं गत्वा पुनः पुनः ।
चिच्चन्द्रे कुण्डलीशक्तिः सा शिवस्य महोदयः ॥
व्योमपङ्कजनिष्यन्दसुधापानरतो नरः ।
मधुपानमिदं देवि चेतरं मद्यपानकम् ॥
पुण्यापुण्यपशुं हत्वा ज्ञानखड्गेन योगवित् ।
शिवे लयं नयेच्चित्तं पलाशीति निगद्यते ॥
मनसा इन्द्रियगणं संयम्यात्मनि योजयेत् ।
मांसाशी स भवेद्देवि इतरे प्राणघातकाः ॥
परशक्त्यात्ममिथुनं संयोगानन्दनिर्भराः ।
मुक्तास्ते मैथुनं तत् स्यात् इतरे स्त्रीनिषेवकाः ॥

इति कुलाचारः ॥

Available colophons:—

16B, इति चिदानन्दमन्दाकिन्यां मन्त्रमोक्षादिनिरूपणं नाम द्वितीयस्तरङ्गः; 18B, इति चिदानन्दमन्दाकिन्यां प्रकृतित्वेनैव साक्षाच्छिवज्ञानाविर्भावनिरूपणेन तत्प्राधान्यकथनं नाम तृतीयस्तरङ्गः; 40B, °जपानुष्ठानादिविवेचनं नाम षष्ठस्तरङ्गः; 47B, °भावनिरूपणं नाम सप्तमस्तरङ्गः; 54A, °शारीरयोगसाधनादिनिरूपणं नामाष्टमस्तरङ्गः। इति पंचाननपरमहंसकौलशेखरगुणाश्रितकलेवरनवममहाश्रीकृष्णादेवगणसंगृहीता चिदानन्दमन्दाकिनी समाप्ता ॥

The date of copying of the MS:—

शकाब्दे मिते बाणकालर्तुचन्द्रे
शुचौ मासि कृष्णे तिथौ वै चतुर्थ्याम् ।
गुरोः पादपद्मं प्रणम्य व्यलेखीत्
चिदानन्दमन्दाकिनीं बाणशर्मा ॥
लिखितामतियत्नेन पुस्तीं प्राणपणेन च ।
खलो हरेत् प्रमादेन तस्य कष्टं भविष्यति ॥
श्मोऽस्तु लेखके मयि ॥

6230.

Gopālapañcānana.

5097. तन्त्रदीपिका । *Tantradīpikā.*

Substance, country-made paper. 16 × 3½ inches. Folia, 3 to 196 with the following folia missing: 6, 53, 117, 123 and 124. Lines, 6 on a page. Extent in ślokas, 4,500. Character, Bengali (written in different hands). Appearance, old and discoloured. Incomplete.

The author is stated to be the son of Harinātha Bhaṭṭācārya, and grandson of Āgamavāgīśa.

This is a comprehensive compilation. Two MSS of it are fully described in L. VI. 2202 and HPR. I. 138.

There is only one colophon in the manuscript on Fol. 35A :—

इति आगमवागीशपौत्र-हरिनाथभट्टाचार्यात्मज-श्रीगोपाल-पञ्चाननविरचितायां तन्त्रदीपिकायां प्रथमः परिच्छेदः ।

A batch of leaves (numbered 116-129) found along with the present MS seems also to belong to the present work if not to the present MS. A colophon found in Fol. 121A of this portion runs:—

इति गणेशादिपूजाक्रमः चतुर्थः परिच्छेदः ।

Of works and authors referred to, mention may be made of the following:

दीक्षातत्त्वप्रकाशधृतप्रमाण (7A), आचार्यधृतरुद्रतन्त्र (64A), कामरूपीय-निबन्धधृतलक्षणाज (69B), पुरश्चरणचन्द्रिका (69B), क्रमदीपिका (111B), शारदा (112A and in many other places), माधवभट्टधृततन्त्रान्तर (120A), मुक्तादीपिकाधृतवचन (122B), शिवार्चनचन्द्रिका (122B), मन्त्र-सिद्धेश्वरतन्त्र (128A), रहस्यधृतस्वतन्त्र (128B), तन्त्रचन्द्रिकाधृतकुलार्णव (132A), रहस्यधृतसिद्धसारस्वततन्त्र (134B).

6231.

Śrīnivāsa Bhaṭṭa.

11306. **शिवार्चनचन्द्रिका ।** *Śivārcanacandrikā.*

Substance, country made yellow paper. 13¼ × 8¼ inches. Folia, 1-592. Lines, 12 on a page. Extent in ślokas, 18,000. Character, Nāgarī. Appearance, fresh. Complete in 46 chapters.

The work deals with Tantra rites in general (initiation, daily worship, *puraścaraṇa*, etc.—chapters I-XV) and with the rituals of Gaṇeśa (chapters XVI-XIX), Śakti (chapters XX-XXXI), Viṣṇu (XXXII-XL), Sun (chapter XLI) and Śiva (chapters XLII-XLVI). MSS of the work are noticed in Ben., p. 320 and ASB, p. 202, Peters. i, p. 120, Bik. No. 1332.

Beginning:—

श्रीमन्तं सिन्दूरास्यं शशिशकलधरं बन्धुजीवाभिरामं
दानाद्रि[ः] सिक्तगण्डस्खलदलिकलभान् लीलया खेलयन्तम् ।
प्रत्यूहध्वान्तभानुं पृथुतरजठरं ब्रह्मविष्ण्वीशवन्द्यं
वन्दे सिन्दूरपूरैर्गिरिवरसुतया चर्चितोत्तुङ्गकुम्भम् ॥

... ...

... ...

श्रीमत्सुन्दरदेशिकेन्द्रचरणद्वन्द्वारविन्दं मुहु-
र्वन्दे वन्दकमन्दभाग्यतिमिरप्रध्वंसभानूदयम् ।
यद्दृष्ट्वैव बुधाश्चराचरमिदं जानन्ति मायामयं
यन्नत्वात्र सदा करामलकवत् पश्यन्ति चात्मं महः ॥
देशोऽस्ति दक्षिणदिशि द्रविडाभिधानः
काञ्चीति यत्र नगरी नगराभिनन्द्या ।
पुण्या पुरी पुरनिसूदनभागधेयं
सौभाग्यदन्तुरितकीर्तिरतुललक्ष्मीः ॥
आविर्बभूव कृतमेधमखे विरिञ्चे-
र्यत्र स्वयं स भगवाननया रमेशः ।
अद्यापि हस्तिगिरिनाथ इति प्रसिद्धः
संदृश्यते सकललोकसमर्चिताङ्घ्रिः ॥
तस्या दक्षिणदिग्गतः क्षितिसुरैः
षट्शास्त्रविद्भिश्चतुर्वेदैः सोपनिषद्भि-
रङ्गसहितैराढ्यैः सदाधिष्ठितः ॥
योऽगस्त्य इति विश्रुतः क्षितितलेऽप्येनामदीतीरभू-
देशे यागमहाकुलसकलविद्यालयश्चाग्रे महान् ।
आत्रेयगोत्रशतपत्रविकासमित्र-
सत्रातिरात्रमुखयागशतस्य कर्ता ।
भर्तादीक्षितपान्थमुकुन्दनामा
षट्शास्त्रवित्समरपुङ्गवदीक्षितोऽभूत् ।

तस्यात्मजः फणिपतिर्वरदाग्निचीवे
    मीमांसकेष्वपि गुरुः श्रुतिषु स्वयम्भूः ।
महादशाश्वचयनान्वितवाजपेय-
    सोमाध्वरो भुवि निमुक्तमदीक्षितोऽभूत् ॥
तन्नन्दनः सकलवेदविदां वरिष्ठः
    श्रौतक्रियासु निपुणः श्रितसोमदीक्षः ।
आसीदशेषगुणसन्निधिः प्रसिद्धः
    श्रीश्रीनिकेतन इति प्रथितोऽध्वरीन्द्रः ॥
तत्सूनुः श्रीनिवासः सकलनिगमविस्तारशास्त्रार्थविज्ञः
    श्रौतस्मार्तेषु कर्मस्वखिलपथनिपुणः सत्कविः सौन्दर्ययोगात् ।
पीठं भास्वत्कराख्यं प्रकटितविभवं प्राप्य यज्ञप्रसादात्
    तत्र श्रीसुन्दराख्यं सकलगुणनिधिं प्राप्य सद्देशिकेन्द्रम् ॥
तत्पादपद्मयुगं परिचर्य तस्मात्
    प्राप्याभिषेकमखिलागममप्यधीत्य ।
तस्याज्ञया समधिगम्य पुरीं स काशीं
    तत्राकरोद्वसतिमागमविदां वरिष्ठः ॥
तत्र स्थितः सकलदेशसमागतैस्तैः
    शिष्यैः शिवार्चनपरैः श्रितशैवदीक्षैः ।
अभ्यर्थितो वितनुते सकलागमार्थ-
    सारोदयां भुवि शिवार्चनचन्द्रिकां सः ॥

This is followed by a detailed and versified list of contents of the work.

End:—

चत्वारोऽत्र कृताः प्रश्ना मया ह्यागमदर्शने ।
नित्यादेर्विधिकल्पस्य मन्त्रप्रदाप्रवृत्तये ॥
तत्राद्यः पारिजाताख्यो भैरवार्चापदादिकः ।
अन्यो रत्नाकराख्यः स्यात् श्रीसौभाग्यपदादिकः ॥

तृतीयः कल्पवल्ल्याख्यः सपर्य्याक्रमपूर्वकः ।
चतुर्थस्याभिधानं तु श्रीशिवार्च[न]चन्द्रिका ॥
तत्राद्ये भैरवार्चोक्ता श्रीविद्यायै[:] द्वितीयके ।
तृतीये सप्तशत्याख्यमालामन्त्रवतार्चयोः ॥
विधि(f)र्वण्यतः सम्यक् सपर्य्यायां सुविस्तरः ।
पञ्चायतनमन्त्राणां चतुर्थे विस्तरं कृतम् ॥
संसारसागरं घोरं तर्तुमिच्छन्ति ये नराः ।
आश्चर्य्यं देवतास्तेषां पोता एते मया कृताः ॥
एतेष्वेकं समारुह्य तल्लोकदीपमेत्य च ।
तत्र भुक्ताखिलान् भोगान् मुक्तिं क्रमवाप्नुयात् ॥
सुन्दराचार्यशिष्येण श्रीनिवासेन धीमता ।
षट्चत्वारिंशदमत् प्रणीताय्यं प्रकाशकः ॥

The last verse is found *mutatis mutandis* at the end of every chapter.

Last Colophon :

इति श्रीसुन्दराचार्यचरणारविन्दद्वन्द्वान्तेवासिना श्रीश्रीनिवास-
भट्टेन विरचितायां श्रीशिवार्चनचन्द्रिकायां षट्चत्वारिंशः प्रकाशः ॥

6232.

Janārdana Gosvāmi.

8478. मन्त्रचन्द्रिका । *Mantracandrikā.*

Substance, country-made paper. 9½ × 4 inches. Folia, 140. Lines, 8 on a page. Extent in ślokas, 2,600. Character, Nāgara. Appearance, fresh. Complete in 12 chapters.

This work deals with the mantras and peculiarities of worship of various deities arranged in five groups, e.g. Gaṇeśa. Śivā (Śakti). Kṛṣṇa, Sūrya and Śiva. MSS of the work have been described in Peters. IV. No. 1137 and

L. II. 911, the latter representing a shorter version in nine chapters which cover 11 chapters of the MS of the Society (as far as Fol. 129A). This version has only one benedictory verse in place of 9 in the other two MSS; the genealogical verses of the author are also not found here. According to one of these verses the work is based on the *Śivārcana-candrikā* of Śrīnivāsa, the grandfather of the author. The colophons of the Society's MS refer to the father of the author as will be clear from the last colophon quoted above.

Last Colophon.

इति श्रीगोस्वामिश्रीनिवासात्मजगोस्वामि [illegible] भट्ट [illegible]
मन्त्रचन्द्रिकायां द्वादशः प्रकाशः

Post-colophon Statement :—

श्रीशुभमस्तु सं० १८५७ श्रावण ११ शु

6233.

Yaśodhara.

5502 मन्त्राराधनदीपिका *Mantrārādhanadīpikā*

Substance, country-made paper. 14½ × [illegible] inches. Folia 1-54 [illegible]. Lines, 12 on a page. Extent in ślokas, 2,160. Character, Nāgarī. [illegible] ance, discoloured. Incomplete.

A MS of the work, complete in 16 chapters, is described in *Ulwar* 2270. Extr. 654. The date of composition as given in the last verse in this description is 1488 Śaka. Of the 11 introductory verses given here, we have only [illegible]. IO. IV. 2581 describes an incomplete MS of the work. It deals with Tantric rites like *dīkṣā*, *vāstuyāga* and worship of various deities.

Beginning :—

श्रीविघ्नवैरिणे वक्रतुण्डाय नमः ।

यन्नामस्मरणेन पातकमलप्रक्षालनं जायते
यस्मिन् कर्णपथं गते तु सुमहत्पुण्योदयः प्राप्यते ।
यत्र न्यस्तमतिः प्रयाति पुरुषो मोक्षं महादुर्लभं
[वं]दे तं परमेश्वरं त्रिजगतामाद्यन्तमध्येश्वरम् ॥
लक्ष्मीकान्तं नमस्कृत्य भवानीं तदनन्तरम् ।
यशोधरेण क्रियते मन्त्राराधनदीपिका ॥
उच्यते प्रथमं तावत् ग्रन्थेऽस्मिन् लक्षणं गुरोः ।
गुरवो बहवः सन्ति दीपवच्च गृहे गृहे ॥
दुर्लभोऽयं गुरुर्देवि सूर्यवत् सर्वदीपकः ।

तन्त्रराजे ।

सुन्दरः सुमुखः स्वच्छः सुलभो बहुमन्त्रवित्
असंशयः संशयच्छित् निरपेक्षो गुरुर्मतः ॥

Colophons of the different chapters

9B, इति श्रीकंसारिमिश्रात्मजयशोधरविरचितायां मन्त्राराधनदीपिकायां प्रथमः प्रकाशः ; 22B, ०द्वितीयः प्रकाशः ; 36A, ०तृतीयः प्रकाशः ; 55B, ०चतुर्थः प्रकाशः ; 58A, ०पञ्चमः प्रकाशः ; 62B, ०षष्ठः प्रकाशः ।

The works quoted are:—

1A, तन्त्रराज, शारदा, श्यामार्चनचन्द्रिका ; 2A, पिङ्गलागम, कुलार्णव, रुद्रागम ; 2B, सारसंग्रह ; योगरत्नावली, अगस्त्यसंहिता ; 3B, तन्त्ररत्नमाला ; 4A, मन्त्रदर्पण ; 7B, रुद्रयामल ; 8B, कल्पलता ; मन्त्रसंग्रह ; 9B, कादिमत, कुलमूलावतार ; 10A, सूर्यसिद्धान्त ; 10B, मन्त्रदेवप्रकाशिका ; 14A, मत्स्यपुराण, शतहारीय ; 14B, देवल, वराह ; 15A, मन्त्रमुक्तावली ; 19A, भैरवतन्त्र ; 22B, मन्त्रतन्त्रप्रकाश ; 23A, वशिष्ठसंहिता ; आकालि ; 24A, वैद्यावतिलक, ब्रह्माण्डपुराण ; 27B, सिद्धार्चनचन्द्रिका ;

28A, क्रमदीपिका ; 29A, प्रणवकल्प ; 34B, शारदा, त्रिपदीशाटीका ; 36B, हरिगाद ; 37A, भौतकागम ; मन्त्रकोष ; प्रपञ्चसार ; 43A, ज्ञानमाला ; 48B, वायवीयसंहिता ; 55A, तत्त्वसार ; 57B, मन्त्रकोष ।

6234.

Viṣṇudeva.

9059. मन्त्रदेवप्रकाशिका । *Mantradevaprakāśikā.*

Substance, country-made paper. [illegible] 49·78 × 1·30. Lines, 10, 16, 12, 7 on a page. [illegible] 1·60 × 36 × 1,660. Character, Nāgarī. Appearance, [illegible] some portions new. Complete in 62 chapters.

Fol. 1-4 in the first batch, the entire [illegible] fourth batches are later insertions and hence are [illegible] appearance. The work deals with *dīkṣā*, *homa* and other Tantric rites in general as also the worship and [illegible] of various deities. The first and last chapters are [illegible] philosophical. It is asserted that, strictly speaking, *mantras* relate to one deity alone who is the [illegible] Brahman. A MS of the work has been described [illegible] 2815.

Beginning.—

ॐकारमात्मादमवीङ्कुरमपर्याप्तविष्टहिमानुरिंपित
गणेन्द्रमक्षोद्यनस्तविष्टरममघामायद्यादिकपि
महागाँढादप्रगाप्रियन्त्वहरितनो: श्रीश्वराद्यान्दर्वाक्ष
कृष्णात्मन कामविग्रो विविधगुणमहार्यलिभास्वरम्भं ।
अनन्तनारायणरामयोगात् ब्रह्मप्रभो ज्ञानघन [illegible]
अनन्तयोगीश्वर भानुहस्त रामाश्रयानन्दगुरो नमस्ते ।
..............अथ प्रपञ्चसारागमतन्त्रप्राक्तानुसारतः
गुरूपदिष्टमन्त्राणां देवतादि प्रकाश्यते ॥

End:—

श्रीमत्प्रपञ्चसारादिशास्त्रसंग्रहविग्रहा ।
कृतिर्विजयते सैषा मन्त्रदेवप्रकाशिका ॥
परमाराध्यपौत्रस्य लक्ष्मीधरकृतात्मजन्मनः ।
कृतिः श्रीविष्णुदेवस्य श्रीमत्कोटीश्वरार्पिता ॥

6235.

2242. *Mantradevaprakāśikā.*

Substance, country made paper. 10½ × 4¾ inches. Folium 1. Lines, 9 on a page. Extent in ślokas, 20. Character, Nāgarī. Appearance, fresh. Complete in 17 verses.

This contains only the second chapter of the work.

6236.

Vijayarāmācārya.

10160. **मन्त्ररत्नाकरः ।** *Mantraratnākara.*

Substance, country made paper. 6¾ × 5 inches. Folia, 58. Lines, 7–10 on a page. Character, modern Nāgarī. Appearance, fresh. Incomplete.

The present MS contains the 14th *taraṅga* only dealing with *mantras* and prayers, addressed to Rādhā. I.O. IV. 2588 describes the 13th chapter of the work. Ulwar. Extr. 653 quotes from the beginning of the work. Stein (p. 233) refers to a MS of a commentary on the work by the author himself.

Beginning:—

श्रीगणेशाय नमः ।
अथ राधां(?) प्रवक्ष्यामि सर्वतन्त्रेषु गोपिताम् ।
साधको यां समाराध्य चतुर्वर्गफलं लभेत् ॥

यस्याः संप्राप्तिमात्रेण जीवन्मुक्तो भवेन्नरः ।
कल्पस्थितिः कृते सा जायते धर्मविद्ययो[ः] ॥
प्रसन्नो [illegible] यान्ति दास[ः] स्या[illegible]श्रीपतिः ।
यस्मै भक्तै न दातव्या विद्यागाढी सुदुर्लभा ॥
विना श्रीगुरु[illegible]मन्त्रं कृत्वा मन्त्रं तु यो जपेत् ।
स दरिद्रो महामूढः कृष्णशापमवाप्नुयात् ॥
श्रीकार्त्तवीर्य[illegible]दायामन्त्रं समाश्रयेत् ।
मन्त्रोद्धारं प्रवक्ष्यामि सर्वतन्त्रेषु गोपितम् ॥

End

[illegible] सत्पुष्टी विद्या श्रीवीर्यसिद्धिविधायिनी ।
[illegible] गुरुं संतोष्य साधयेत् ॥
गुरौ तुष्टे तु सिद्धि[ः] स्यान्नान्यथा कल्पकोटिभिः ।
तस्मात् सर्वप्रयत्नेन गुरुं सन्तोषयेत् सुधीः ॥

Colophon

इति [illegible] नवमतमस्तरङ्गटीका-
[illegible] मन्त्ररत्नाकरे(?)
[illegible] ॥

6237.

5806. *Mantraratnākara.*

Substance, country-made paper. 12 × [illegible] inches. Folia, 22. Lines, 11 on a page. Character, Nāgarī. Appearance, fresh. Incomplete.

The present MS contains the 16th (13th according to IO. IV. 2588) chapter of the work dealing with the details of the worship of Kārtavīrya.

6238.

Kamalākara Bhaṭṭa.

5529. **मन्त्रकमलाकरः ।** *Mantrakamalākara.*

Substance, country-made paper. 12¼ × 5 inches. Folia, 126. Lines, 10 on a page. Extent in ślokas, 3,780. Character, Nāgara. Appearance, fresh. Complete.

The work deals with initiation, various sorcery rites and the worship of deities like Sūrya, Gaṇeśa, Rāma, Kartavīryārjuna, etc. The section on the worship of Rāma is written by Rāmakṛṣṇa, father of Kamalākara. This section is introduced thus (Fol. 36B):—

अथास्मत्पितृकृतो रामपूजाविधिः ।

Beginning.—

श्रीगणेशाय नमः । श्रीरामः ।
श्रीरामपितरौ नत्वा कमलाकरशर्मणा ।
अनन्तभट्टसुतस्यार्थं मन्त्रतत्त्वं विलिख्यते ॥

शारदायाम् ।

अथ दीक्षां प्रवक्ष्यामि मन्त्राणां हितकाम्यया ।
विनानया न लभ्येत सर्वमन्त्रफलं यतः ॥

Colophons:—

21A, इति श्रीमद्रामकृष्णभट्टात्मजकमलाकरभट्टकृते मन्त्रकमलाकरे दीक्षाविधिः परिभाषा च समाप्ता; 35B, इति कमलाकरभट्टकृता महागणपतिपद्धतिः; 36B, इति कमलाकरभट्टकृते मन्त्रकमलाकरे गणेशमन्त्राः; 47B, इति श्रीमन्नारायणभट्टसुतश्रीमद्रामकृष्णभट्टविरचितो रामपूजाविधिः समाप्तः; 50B, इति श्रीमन्नारायणभट्टसुतरामकृष्णभट्टकृतः संक्षेपतो रामपूजाविधिः; 53B, इति श्रीमद्विद्वन्मुकुटभीरामेश्वरभट्टसूरिसूनुनारायणसुतश्रीरामकृष्णभट्टविरचितो रामपूजाविधौ रामयन्त्रोद्धारः; 70B

इति श्रीमन्नारायणभट्टसूरिसूनु-महामहोपाध्याय-रामकृष्णभट्टात्मज-कमलाकरभट्टकृतः कार्त्तवीर्यदीपदानप्रयोगः सम्पूर्णः ; 79A. इति कार्त्तवीर्यार्जुनपद्धतिः ; 82B, इति कुलिकानन्दोक्तं नन्द्यावर्तहरणम् ; 97B. इति शिवपञ्चाक्षरमन्त्रप्रयोगो भट्टकमलाकरकृतः समाप्तः ; 109A. इति कमलाकरभट्टकृतौ बन्दिमोक्षप्रयोगः ; 110B. सर्वविधोत्तारणम् ; 126B, इति श्रीआनन्दभैरवेश्वरसंवादे कार्त्तवीर्यार्जुन-सहस्रनामस्तोत्रं समाप्तम् ; इति श्रीमन्नारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजमहामहोपाध्याय-श्रीकमलाकरभट्टकृते मन्त्रकमलाकरे मन्त्रौषधप्रकरणं समाप्तम्।

6239.

Pūrṇaprakāśa.

6553. **मन्त्रमुक्तावली ।** *Mantramuktāvali.*

Substance, country-made paper. 11¼ × 3½ inches. Folia, 1–174, of which fol. 35–45, and 45B (which does not belong to the present work and contains an extract from the *Śāradātilaka*) are written in a later hand. Lines, 8 on a page. Extent in ślokas, 5,000. Character, Nāgara. Date, Samvat 1420. Appearance, old, discoloured and repaired. Complete in 25 chapters.

The work deals with various Tantric topics like *dīkṣā*, *puraścaraṇa* and worship, as well as *mantras* of different deities. For two incomplete MSS of the work, described as anonymous, cf. C. S. V, 623.

The MS has occasionally many marginal notes in a later hand.

Beginning :—

ॐ शिवादिभ्यो गुरुभ्यो नमः ।

जयति जगदधीशाधीश्वरी सा भवानी

गुणपदमधिरूढा मन्त्रमुक्तावली या ।

हिमकरविरहार्त्या (?) तया ...

भजकुहरकलायाः प्रोल्लसन्ती दयार्द्रा ॥ १ ॥

विद्यापङ्कजबन्धुबोधितमहापद्मप्रबद्धासना
मुद्रामुद्रितलोचनाम्बुजयुगा सद्योगमुद्राधरा ।
देहोन्मीलितनीलनीरदविभाध्याधूतमन्मोहभू-
राज्ञा कापि मदीयदैवतमयी मूर्त्ता समुज्जृम्भताम् ॥ २ ॥

... ...

संसारघोरार्व्वरविदारणदारुणोपि
यत्संप्रदायतरणिः करुणां करोति ।
अस्मादृशेषु भुवि शङ्करपूज्यपादान्
वन्दामहे गुरुकुलस्य गुरूनभूम्नां ॥ ५ ॥

यच्चिन्तामणिकुण्डकैरवसुहृद्बिम्बेतरुन्मीलति
प्रौढानन्दसुधाम्बुधौ मयि परामुद्वेलतां तन्वति ।
लीनं तत् सनिदानमेतदखिलं सोढुं (?) भगज्ञानकं
श्रीकाञ्चीनगरीमुनेरनुदिनं तत् पादपद्मं नुमः ॥ ६ ॥

यदमलयशःकामारेरस्मिन् विभाति हरेः पदं
सरसबिसिनीपत्रच्छायं विधुः सरसीरुहम् ।
अपि च रुचिरं ताराचक्रं तुषारपरम्पराः
सततमिह तं वाणीतीर्थं गुरुं समुपास्महे ॥ ७ ॥

श्रीमत्प्रपञ्चसाराञ्जलधेवपदेशमुक्तागर्भेभ्यः ।
मनुमुक्ताफलमालां सन्मतिभूषार्थमुद्धराम्येताम् ॥ ८ ॥

क्वापि क्वापि महागमनिकराकरभाजि मन्त्ररत्नानि ।
सत्सम्प्रदायगुम्फैर्गोपकतामत्र यास्यन्ति ॥ ९ ॥

End :—

ग्रामे काञ्चिदिहाद्भुतलौकिककलासम्पन्नवर्षेगुणा
मुद्रोन्मुद्रितपद्मयामपरमा चन्द्रावलस्यन्दिनी ।
श्रीकाञ्चीनगरी मुनीन्द्रचरणद्वन्द्वानुचर्यावशाद्
या लब्धा च मयार्पिता भगवती भायात् वागीश्वरी ॥

\+ + + + स्य तं नित्यरमणीयं
त्रिभुवने मनोवाणीमार्गातिगमगणितानन्दसुभगं।
गभीरं निःपारं गुरुचरणसेवैकसुलभं
अपूर्व्वांगीर्वाणया जयति जगया + + + + + ॥

\+ + + + +
\+ + + पापेन कदर्थितोसि।
अज्ञस्य वागीश्वरि मेऽपराधं
कारुण्यमूर्त्ते तमिमं क्षमस्व ॥

जन्मनाग्र[कणा]संकुलाद्भवादंबुधेर्जगति कौतुकादहं ॥
उद्धृतोस्मि यदपांगलीलया
तं नमामि निजदैवतं गुरुम्।
विश्वेशचिन्ताभरमाहरन्तं
भागीरथीकार्य्यकरं नमामि ॥

निर्दोषदोषाकरशोभकं तं
श्रीभारतीतीर्थमुनेर्गुणौघं।
नव (?) कलनकलावान् नैव जातु स्वभावात्
परिभवनवदर्शिन् कोऽपि ख्याते (?) भवन्तं।
जयति रसनिधानं गोस्तनीं वर्ज्जयित्वा
लशुनमशुचि केचित् किं न खादंति मन्दाः ॥

यद्यवद्यमिह जल्पते मया(मा) किं विचाररचनाकदर्थने।
उल्लसन्त्यपि मदोषदर्शिनां रम्यवस्तुनि कलङ्ककोटयः ॥

अस्मन्नृपनीलापरितोषणाय
तवाङ्घ्रियोविन्दमुदेऽस्मदीयः।
यम्भातुर्याति बलेन योगं
वागीश्वरीचिन्तनवारिपुष्टा ॥

कद्रिकामिनीकर्णभूषणाय मनोरमां।
मत्तमुक्तावलीमेनां कल्पय शतमोर्मुनिः ॥

Last Colophon:—

इति परमहंसपरिव्राजकाचार्यश्रीमदनन्तप्रकाशपूज्यपादशिष्य-पूर्णप्रकाशस्य कृतौ मन्त्रमुक्तावल्यां पञ्चविंशतिमः पटलः ।

Post-colophon Statement:—

संवत् १४८० समये पौष सुदि १४ भौमे विद्यानगरावस्थितघट्-कर्म्माचार्ज्जितशर्म्मा द्विवेदश्रीपापाख्यमिश्रः कृते श्रीपुरुषोत्तमदासेन लिखिता मन्त्रमुक्तावली ।

शुभमस्तु सर्व्वजगतः । यथादृष्टमिति परिहारः ।

श्रीनारायणाय नमः । श्रीकृष्णाय नमः ।

यज्ञेशाच्युतगोविन्दमाधवानन्तकेशव ।

कृष्णविष्णो हृषीकेश वासुदेव नमोस्तु ते ॥

काष्ठ राजा स केवलं । मान्यजगाज (?) मैत्रेय लिखित सप्तान्तरेष्वपि ॥

6240.

Kāśinātha Bhaṭṭa.

6015. **मन्त्रचन्द्रिका** । *Mantracandrikā.*

Substance, machine made modern paper. 11¼ × 4 inches. Folia, 80. Lines, 9 on a page. Extent in ślokas, 2,000. Character, Nāgara. Appearance, new. Complete in 12 chapters.

The work deals with Tantric rites in general and gives the *mantras* for the worship of various deities. The author gives the names of his father and grandfather in the last colophon. He also refers to his maternal grandfather Anantabhaṭṭa, references to the *Tattvabodha* of whom are found in several passages in the present work (Fol. 71B, 76A). MSS of the work are also described in Peters. 6, p. 37 and L. IV. 1709. The MS described in L. IV. 1709 seems to contain another recension of the work which

begins from the middle of the MS described here and by Peterson, and has a different introductory verse.

Beginning :—

श्रीगणेशाय नमः । श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः ।

विश्वेश्वरं नमस्कृत्य मातरं पितरं तथा ।

काशीनाथः प्रतनुते सिद्धिदां मन्त्रचन्द्रिकाम् ॥

तत्रादौ गुरुलक्षणम् ।

श्रोत्रियो ब्रह्मनिष्ठः तत्त्वप्रतिपादनसमर्थः समस्तमन्त्रप्रयोगकुशलः, etc. etc.

Colophons of the different chapters :—

5A. इति मन्त्रचन्द्रिकायां दीक्षाविधानाख्यः प्रथमोल्लासः ; 15A, ०सामान्यपूजाविधानाख्यो द्वितीयोल्लासः ; 21B, ०गणेशमन्त्रविधानाख्यस्तृतीयोल्लासः ; 27A, ०लक्ष्मीमन्त्रविधानाख्यश्चतुर्थोल्लासः ; 33A, ०राममन्त्रादिवैष्णवमन्त्रविधानाख्यः पञ्चमोल्लासः समाप्तः ; 38B, ०सद्योमन्त्रादिवागीश्वरीनर्मदाविधानाख्यः षष्ठोल्लासः ; 49A, ०महाविद्यामन्त्रविधानाख्यः सप्तमोल्लासः ; 54A, ०त्वरितादिपार्वतीमन्त्रविधानाख्योऽष्टमोल्लासः ; 59A, ०शैवमन्त्रविधानाख्यो नवमोल्लासः ; 61B, ०सुब्रह्मण्यादिमन्त्रविधानाख्यो दशमोल्लासः ; 66B, ०नवग्रहादिमन्त्रविधानाख्य एकादशोल्लासः ; 79B, इति श्रीमद्गडोपनामकशङ्करभट्टात्मज-जयरामभट्टाभिध-शिवभक्तसुमनश्चापवीणदक्षिणाचारमतप्रवर्तक-काशीनाथविरचिता मन्त्रचन्द्रिका समाप्ता । श्रीदक्षिणामूर्त्तिशिवार्पणमस्तु ।

6241.

Somanātha.

10599. **अज्ञानध्वान्तदीपिका ।** *Ajñānadhvāntadīpikā.*

